SAHITYAM

ACHARYA II YEAR

Paper - VI

# RASAGANGADHARAH

BLOCK - I

**Directorate of Distance Education**

Rashtriya Sanskrit Vidyapeetha

Accredited at 'A' level by NAAC

Tirupati - 517 507 (A.P.)

**CHIEF EDITOR**

**Prof. H.K. Sathapathy**
**Vice-Chancellor**

**GENERAL EDITOR**

Dr.Ch.P.Satyanarayana
Director, DDE

**PROGRAME CO-ORDINATOR**

Dr.Ch.P.Satyanarayana

**ADDITIONAL CO-ORDINATORS**

1. Dr.R.Deepta (Academic)
2. Sri.B.chandrasekharam (Technical)

**SUBJECT CO-ORDINATOR**

Prof.G.S.R. Krishna Murthy

**COURSE WRITER**

Dr.S.L. Kumara Sharma

DIRECTORATE OF DISTANCE EDUCATION
R.S.VIDYAPEETHA,
TIRUPATI.

अयि प्रियान्तेवासिनः,

शुभाभिनन्दनानि,

स्वागतं भवतां राष्ट्रिय-संस्कृत-विद्यापीठान्तर्गते आराद्विद्या-निदेशक-निकेते। विद्यापीठमिदं राष्ट्रिय- मूल्याङ्कनपरिषदा(NAAC) ए + इति, विश्वविद्यालयानुदानायोगेन (UGC) पारम्परिक -शास्त्रीय -समुत्कर्ष केन्द्रमिति चोद्घोषितम् ।

निकेतोऽयं मातुः सरस्वत्याः आवासस्थानत्वेनाभिमतः यस्मिन् भवतामपि विद्यानन्दाह्लादः लभ्यते तराम् । संस्कृतवाङ्मयपाटवमभिलषतां भवताम् आधारशिला भवति भवतां श्रद्धैव। श्रद्धायाः प्रोत्साहनार्थम् अध्ययने रुचिमुत्पादयितुञ्च,इयं स्वाध्ययनसामग्री निर्मिता, याञ्च भवन्तः स्वयम् अधिगन्तुं शक्नुवन्ति।

श्रद्धावतः शिष्यस्य एकलव्यस्येव गुरूपदेशः 'आराद्' मनसि प्रविशति येन च शिष्यः सत्यकामो भवति। आचार्योऽपि श्रद्धावतः शिष्यान् आरादपि दृग्दीक्षाख्योपदेशेन समेधयति कूर्मः स्वापत्यानीव -

**स्वापत्यानि यथा कूर्मो वीक्षणेनैव पोषयेत् ।**

**दृग्दीक्षाख्योपदेशस्तु तादृशः कथितः प्रिये।। इति**

कुलार्णवागमाम्नातेन दृग्दीक्षाख्योपदेशोपायानुसारिणाचार्येण श्रद्धावान् शिष्यः सत्यकामं जाबालं गौतमः हारिद्रुमतः इव उद्धरिष्यति।

सत्यकामो जाबालः जबालां मातरमामन्त्रयामास। 'मातः ब्रह्मचर्यं गुरौ वत्स्यामि किं गोत्रोऽहमि' ति। सा चैनमुवाच। सा'हमेतन्नवेद यद्गोत्रस्त्वमसि। गुरुसमीपे सत्यकामो जाबालोऽहमस्मि भोः इति ब्रुवीथाः' इति। एवमेव जाबालः हारिद्रुमतं गौतमं गत्वा 'भवत्सु ब्रह्मचर्यं वत्स्यामी' ति प्रार्थयामास। तेन च गोत्रे पृष्टे मात्रा यदुक्तं तदेव प्रोवाच।

गौतमस्तुष्टः सत्यकामं सत्यवादिनमुपनीय चतुश्शतं गावः यूथात् पृथक्कृत्य शिष्याय दत्त्वोवाच -'यदा एताः चतुश्शतं गावः सहस्रं भवन्ति तदा भवान् गुरुकुलं प्रतिनिवर्तस्व'।

अधुना चतुश्शतं गाः नीत्वा अरण्ये चारयतात् इति।

स एवमुक्तः सत्यकामः तृणोदकबहुलम् अरण्यं गाः प्रवेश्य बहुकालं पोषयामास। सम्यग्गावो रक्षिताः यदा सहस्रं सम्पन्ना बभूवुः तदा यूथस्थः कश्चन ऋषभः सत्यकाममाहूय 'सोम्य! वयमधुना सहस्रं सम्पन्नाः अस्मानाचार्यकुलं प्रापय' इत्यादिश्य 'ब्रह्मणश्च ते पादं

ब्रवाणी'ति स्वयमेव ब्रह्मज्ञानमुपदिशति।

एवम् अग्निः हंसः मद्गुः च सत्यकाममुपदिशन्ति इति आख्यायिका छान्दोग्योपनिषदि चतुर्थाध्याये आम्नाता वर्तते। इयमौपनिषदाख्यायिका आराद्विद्यया केन सादृश्येन सङ्गच्छत इति चेत् उच्यते -

अस्ति तावत् सत्यकामविद्याप्राप्तेः आराद्विद्या निकेततो विद्याप्राप्तेश्च महत् सादृश्यम् । तथाहि - सत्यकामः - गुरुकुलात् बहिरेव ब्रह्मविद्यामध्यगीष्ट अधिगमोऽपि मानवेतरमाध्यमेन। यतोऽहि ऋषभाग्निमद्गवादयः उपदेशकर्तारः । अन्ते गुरूपदेशः इति।

आराद्विद्याबोधनमपि विश्वविद्यालयात् दूरे बहिरेव भवति। बोधनसामग्र्यपि प्रवाचकभिन्नमेव मुद्रितपुस्तकसान्द्रमुद्रिकादीति, अन्ते किञ्चित्कालं साक्षादुपदेशः (Contact Programme) इति च।

अतस्सत्यकामवद्विद्यकामा भूत्वा कृतार्था भूयासुरिति धिया पृष्ठपत्रं जाबालोपाख्यानेन सचित्रितम् । अतोऽस्माकमवगत्यान्तरङ्गं श्रद्धया पाठ्यांशानामध्ययने रता भवन्तु।

**श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः।**
**ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति।।**

निदेशकः

# विषयसूची


| क्रमसङ्ख्या | विषयः | पृष्ठसङ्ख्या |
|---|---|---|
| I. | 1. मङ्गलाचरणम् | i |
| | 2. विषयसूची | i-v |

## प्रक्रमः (i-x)

| | | |
|---|---|---|
| II. | 1. पण्डितराजस्य तदीयरसगङ्गाधरस्य च परिचयः | ii |
| | 2. पण्डितराजस्य रचनाः | iii |
| | 3. पण्डितराजस्य शास्त्रीयं व्यक्तित्वम् | iv |
| | 4. रसगङ्गाधरनामौचित्यम् | v |
| | 5. प्रथमाननविषयाः | vii |
| | 6. रसगङ्गाधरप्रथमाननवैशिष्ट्यम्, प्रकृतनिबन्धसरणिश्च | vii |

## I. काव्यमीमांसा (1-17)

| | | |
|---|---|---|
| I. 1. | पण्डितराजोक्तं काव्यलक्षणम् | 2 |
| | i. दलसार्थक्यम् | 3 |
| | ii. रमणीयार्थप्रतिपादकत्वविचारः | 3 |
| | iii. रमणीयता-लोकोत्तरत्वपरिष्कारयोः बीजनिरूपणम् | 4 |
| | iv. काव्यलक्षणपरिष्कारत्रयम् | 6 |
| I. 2. | प्राचीनकाव्यलक्षणखण्डनम् | 7 |
| | i. व्यवहाराच्छब्दस्य काव्यत्वम् | 7 |
| | ii. युक्त्यभावात् शब्दार्थयोरकाव्यत्वम् | 8 |
| | iii. विशेषणदलखण्डनम् | 9 |
| | iv. सङ्क्षेपतः दर्पणकारलक्षणखण्डनम् | 10 |
| I. 3. | दर्पणकारोक्तकाव्यलक्षणस्य खण्डनम् | 11 |
| I. 4. | काव्यकारणविचारः | 12 |
| | i. प्रतिभैव काव्यकारणम् | 12 |

**ii.** किं नाम प्रतिभात्वम् ? ........................................................ 13

**iii.** अदृष्टव्युत्पत्त्यभ्यासानां समुच्चित्य कारणतावादखण्डनम् ................ 14

**I. 5.** पाठ्यांशेऽस्मिन् सम्भाविताः प्रश्नाः ............................................ 17

## II. काव्यविभागमीमांसा (18-37)

**II. 1.** सोदाहरणं पण्डितराजस्य काव्यभेदाः-तत्सामञ्जस्यञ्च ................ 18

**i.** उत्तमोत्तमकाव्यलक्षणम् ........................................................ 18

(अ) दलसार्थक्यम् ........................................................ 19

**ii.** उत्तमकाव्यलक्षणम् .................................................................. 20

**iii.** मध्यमकाव्यलक्षणम् .................................................................. 21

**iv.** अधमकाव्यलक्षणम् .................................................................. 23

**v.** पण्डितराजोक्तकाव्यविभागे सामञ्जस्यम् .................................... 23

**II. 2.** 'शयिता सविधे...' इत्यादिपद्ये रसध्वनित्वनिरूपणम् ................ 25

**i.** चुम्बनेच्छाध्वनित्वशङ्कानिराकरणम् ............................................ 26

**ii.** त्रपायाः भावध्वनित्वनिराकरणम् ............................................ 27

**II. 3.** 'निश्शेष...' इत्यादिपद्यविचारः ............................................ 28

**i.** दीक्षितोक्तध्वनित्वनिरूपणम् ........................................................ 28

**ii.** पण्डितराजकृतदीक्षितमतखण्डनम् ............................................ 30

(अ) प्राचीनसकलग्रन्थविरोधः तथा हि .................................... 30

(आ) उपपत्तिविरोधः ........................................................ 32

**II. 4.** चित्रान्यत्वदलखण्डनम्, "प्रहरविरतौ वा........."
इत्यादिदीक्षितोक्तगुणीभूतव्यङ्ग्यविचारश्च .......................... 34

**i.** चित्रान्यत्वदलखण्डनम् ........................................................ 34

**ii.** "प्रहरविरतौ वा....." इत्यादिदीक्षितोक्तगुणीभूतव्यङ्ग्यविचारः ...... 35

**II. 5.** ध्वनिप्रभेदपञ्चकम् .................................................................. 36

**II. 6.** पाठ्यांशेऽस्मिन् सम्भाविताः प्रश्नाः ............................................ 37

# III. रसस्वरूपमीमांसा (38-69)

III. 1. रसविचाराध्ययनोपयोगिविषयनिरूपणम् .................................... 38
i. भट्टलोल्लटस्य उपचयवादः, उत्पत्तिवादः, प्रतीतिवादः, ................ 40
ii. श्रीशङ्कुकस्य अनुकरणवादः, अथवा अनुमितिवादः .......................... 41
iii. भट्टनायकस्य भावितिवादः अथवा भुक्तिवादः .......................... 42
iv. अभिनवगुप्तस्य अभिव्यक्तिवादः .............................................. 44
v. मतान्तरनिरूपणम् ................................................................... 45
vi. रसविषये वेदन्तप्रभावः ....................................................... 46
vii. विविधमतनिरूपणे पण्डितराजेनाश्रितः क्रमः .......................... 47
III. 2. रसस्वरूपविषये विविधमतानि .............................................. 48
i. पण्डितराजोक्तम् अभिनवगुप्त मम्मटयोः रसस्वरूपम्, 'यद्वा' मतञ्च ...... 48
(अ) पण्डितराजरसगद्यम् .............................................. 48
(आ) रसगद्यविवरणम् ................................................... 49
(इ) रसास्वादसोपनानि ................................................... 50
(१) श्रवणम् अथवा दर्शनम् .................................... 50
(२) भावना (मननम्) .............................................. 50
(३) चर्वणा व्यञ्जना (निदिध्यासनम्) .......................... 50
(उ) रत्याद्यभिव्यक्तिप्रकारः .............................................. 51
(ऊ) वेदान्तीकृतरसव्याख्यानम् .............................................. 52
(ऋ) 'यद्वा' मतम्-(अथवा वेदान्तीकृतं द्वितीयं रसस्वरूपम्) ....... 53
(ॠ) रसस्य नित्यत्वानित्यत्वव्यवस्था .................................... 54
(लृ) रसानुभवस्य शाब्दापरोक्षत्वम् .................................... 55
ii. भट्टनायकमतम् ....................................................................... 56
(अ) भट्टनायकस्य पूर्वपक्षः .............................................. 56
iii. भट्टनायकमतसिद्धान्तः ....................................................... 58

iv. नव्यमतम् ........................................................................ 59
१. रसप्रक्रिया ........................................................................ 60
२. रसादेः नित्यताद्युपपादनम् .............................................. 60
३. भावनात्मकदोष विशेषस्य फलानि .................................... 60
४. भावनात्मकदोषे दोषः, तन्निवारणम्, करुणादिषु रसव्यवस्था च ..... 61
v. 'परे तु' मतम् ........................................................................ 63
vi. भट्टलोल्लटमतम् ............................................................... 65
vii. श्रीशङ्कुकमतम् ..................................................................... 66
III. 3. विविधमतेषु रससूत्रसमन्वयः ............................................. 67
III. 4. पाठ्यांशेऽस्मिन् सम्भाविताः प्रश्नाः .................................... 69

## IV. रससङ्ख्यादिमीमांसा (70-84)

IV. 1. शान्तस्य नाट्ये नवमरसत्वम् ............................................. 71
IV. 2. भक्तेः रसत्वनिरूपणम् ........................................................ 73
IV. 3. स्थायिभावलक्षणम्-स्थायिनां लक्षणानि-स्थायिव्यभिचारिणोः भेदाश्च ....... 73
i. स्थायिभावलक्षणम् ................................................................ 73
ii. स्थायिनां लक्षणानि .............................................................. 76
iii. स्थायि-व्यभिचारिणोः भेदाः .................................................. 77
IV. 4. शृङ्गारादिरसचतुष्टये रससामग्रीनिरूपणम् .......................... 78
IV. 5. रसदोषाः ........................................................................... 79
IV. 6. पाठ्यांशेऽस्मिन् सम्भाविताः प्रश्नाः .................................... 84

## V. रसप्रभेदविरोधमीमांसा (85-54)

V. 1. शृङ्गार-वीर-हास्यानां सप्रभेदानां निरूपणम् .......................... 85
i. सप्रभेदः शृङ्गारः .................................................................. 85
(अ) संयोगशृङ्गारध्वनेः उदाहरणम् .......................................... 85
(आ) विप्रलम्भशृङ्गारो यथा ..................................................... 86

V. 2. वीररसस्य चातुर्विध्यम्-अनेकविधत्वात् तदसामञ्जस्यञ्च ................ 87
i. वीररसस्य चातुर्विध्यम् ........................................................ 87
(अ) दानवीरः यथा ........................................................ 88
(आ) दयावीरो यथाः ........................................................ 90
(इ) युद्धवीरो यथा ........................................................ 90
(ई) धर्मवीरो यथा ........................................................ 91
ii. वीरस्य चातुर्विध्ये असामञ्जस्यम् ............................................. 92
iii. हास्यरसप्रभेदाः ................................................................ 93
V. 3. शान्त-रौद्र-अद्भुतानां निरूपणम् ............................................. 96
i. शान्तः ........................................................................... 96
ii. रोद्रः ........................................................................... 97
iii. अद्भुतः ......................................................................... 99
V. 4. करुण-भयानक-बीभत्सानां निरूपणम् ................................ 101
i. करुणः ........................................................................ 101
ii. भयानकः ........................................................................ 101
iii. बीभत्सः ........................................................................ 102
V. 5. विरोधिरससमावेशप्रकारः ..................................................... 103
i. स्थितिविरोधः ............................................................... 104
ii. ज्ञानविरोधः ............................................................... 104
V. 6. पाठ्यांशेऽस्मिन् सम्भाविताः प्रश्नाः ............................................ 108

# रसगङ्गाधरः

## उपक्रमः

**यस्यानुग्रहमात्रेण विधिविष्णुमहेश्वराः ।**
**स्वस्वकार्यक्षमाः क्षिप्रं तद्वन्दे तुन्दिलं महः ।।**

**शब्दशास्त्रादिशास्त्रेषु विख्यातं सद्गुरुं परम् ।**
**साम्बमूर्तिं शास्त्रिणं तं नौमि सत्कृतिभाजनम् ।।**

**सोपानोन्नतमार्गे स्थित्वा चाशु स्तुवानं यम् ।**
**गङ्गा सङ्गतभङ्गा मातेव नन्दनं समाश्लिष्टा ।।**

**वाल्मीकेः कविता यं वैमर्शनी कला चाभिनवा ।**
**स्वयमवृणुत, तं वन्दे पण्डितराजं जगन्नाथम् ।।**

**'रसगङ्गाधरसङ्गमनी'यं गङ्गेव सङ्गता शर्वम् ।**
**प्रमुदे भूयाद्विदुषां, मोदाय भवेदथ छात्राणाम् ।।**

इह हि अलङ्कारशास्त्ररङ्गे, प्रविविक्षूणां छात्राणां समग्रालङ्कारशास्त्रीयविषयपरिज्ञानार्थम्, प्राथमिकस्तरे प्रतापरुद्रीयम्, माध्यमिकस्तरे साहित्यदर्पणम्, स्नातकस्तरे काव्यप्रकाशः, अथ ध्वन्यालोकः, स्नातकोत्तरस्तरे तत उत्तरेषु अध्ययनेषु रसगङ्गाधरश्च महान्तमुपकारमादधाति इति नाविदितं प्रेक्षावताम्। शास्त्रीयविषयविवेचने स्पष्टीकरणे नव्यन्यायस्य विविधशास्त्रेषु प्रभावः अनिवार्यः आसीत्, यत्र च अलङ्कारशास्त्रमपि स्वीयं भागमगृह्णात्। तेन च नव्यन्यायप्रभावेण यथा एकतः अस्पष्टविषयाणां स्पष्टीभावः आसीत्, तथा शास्त्रसाङ्केतिकपदोपयोगेन काचित् दुरवगाहतापि रसङ्गाधरतुल्यप्रौढनिबन्धेषु सञ्जाता। अतः व्याख्यासापेक्षता ग्रन्थस्यास्य सञ्जाता। अत एव पण्डितबदरीनाथझापण्डितकेदारनाथ ओझाप्रभृतयः ग्रन्थमेनं व्याचख्युः।

किन्तु सर्वेषामपि ग्रन्थविषयाणां छात्रदृष्ट्या एकवाक्यतासम्पादनार्थं परीक्षापाठ्ये रसङ्गाधर-प्रथमानने सारसङ्ग्रहं निर्मातुं तिरुपतिराष्ट्रियसंस्कृतविद्यापीठीय-आराद्विद्यानिदेशालयनिदेशकैः परमसहृदयैः **डा.सिहेच्.पि.सत्यनारायणमहाभागैः** आदिष्टः। अहञ्च यथाशक्ति मामकीनं प्रयत्नं विषयेऽस्मिन् विधास्ये। नूनं शिवस्य वैभवं शक्तिरिव, रसगङ्गाधरपाठ्यवैभवं सङ्गमनीनाम्नी सारसञ्चिकेयमाविष्करोतीति मामकीनो विश्वासः। सन्दर्भेऽस्मिन् साहित्यशास्त्रसेवां संविधातुम् ईदृक् अवकाशं दत्तवद्भ्यः

तिरुपतिराष्ट्रियसंस्कृतविद्यापीठकुलपतिभ्यः **आचार्य हरेकृष्णशतपथिमहाभागेभ्यः** तथा आराद्विद्याधि-कृतेभ्यश्च मामकीनमाधमर्ण्यं विनिवेदयामि ।

## १. पण्डितराजस्य तदीयरसगङ्गाधरस्य च परिचयः

अत्र च प्रक्रमे पण्डितराजस्य किञ्चित् स्मर्तव्यम्। तत्र भवान् साहितीजगन्नाथो जगन्नाथः स्वजनुषा गोदावरीमण्डले कोनसीमप्रान्ते मुङ्गोण्डग्राममलङ्कृतवान् । स्वपितुः पेरुभट्टस्य सकाशात् सकलशास्त्रेषु निर्मलप्रज्ञां सम्पाद्य, स्वप्रतिभया क्री.प. १६२८-१६५९ समये विलसतः दिल्लीवल्लभस्य चक्रवर्तिनः **षाजहानस्य** दृष्टिमाकृष्य तेन '**पण्डितराज**' बिरुदेन कनकाभिषेकेण च सत्कृतः ।

तथा सत्कारस्वीकारे पण्डितराजस्य वास्तविकी एकसन्धानग्रहणकुशलतापि निदानमिति किञ्चित् ऐतिह्यम् आन्ध्रलोके प्रसृतमस्ति। कदाचित् जलार्थं सरस्समीपं गतवतीनां महम्मदीयमहिलानां विवादे पराङ्कोटिमधिरूढे सति, तत्र व्यवहारे साक्षितया आहूतः अयं जगन्नाथः अक्षरश्रावकयन्त्रवत् अर्धघण्टाधिकसम्भाषणमपि 'तुचा' दिकमपि अविहाय राज्ञः पुरतः श्रावयामास। तेन विस्मितचित्तः राजा षाजहानः तस्य इस्लामीयपवित्रखुराणादिग्रन्थान्तरपाठग्रहणक्षमतामपि दर्शं दर्शम्, स्वास्थान-पण्डितपदव्यां नियोजयामासेत्यैतिह्यम्।

जगन्नाथोऽयं पञ्चलहरीः, अन्याश्च कवितामयान् प्रबन्धान् विरच्य स्वरसगङ्गाधरे अन्यविरचितोदाहरणानि परित्यज्य स्वयमेव उदाजहार । प्रकटीकृतञ्चैतत् पण्डितराजेन।

**निर्माय नूतनमुदाहरणानुरूपं काव्यं मयात्र निहितं न परस्य किञ्चित् ।**
**किं सेव्यते सुमनसां मनसापि गन्धः कस्तूरिकाजननशक्तिभृता मृगेण ।।**

किञ्च अयं ग्रन्थः प्राचीन-नवीनालङ्कारिकसिद्धान्तानां सारभूतः। यतः पण्डितराजः काव्यप्रकाशस्य सारबोधिन्यादिटीकाः बह्वीः ; बहूंश्च स्वतन्त्रालङ्कारग्रन्थान् परिशील्य आविर्भावियामास । अत एव ग्रन्थकृता जगन्नाथेन---

**'मयोन्नीतो लोके ललितरसगङ्गाधरमणिः'** ---इति सहर्षमाविष्कृतम्। रसगङ्गाधराख्य-निबन्धेऽस्मिन् प्रायशः अलङ्कारशास्त्रीयाः बहवो विषयाः विचारिताः।

पण्डितराजेनापि स्वग्रन्थस्य 'काव्यमीमांसा' इति नामकरणम् व्यधायि। उक्तञ्च पण्डितराजेन--- **रसगङ्गाधरनाम्नीं करोति कुतुकेन काव्यमीमांसाम्'** । इति। अत एव प्रकृतनिबन्धकारेणाऽपि निबन्धेऽस्मिन् अध्यायाः 'मीमांसा'पदेन व्यवहृताः ।

**स्वावलोकनप्रश्नाः**

१. पण्डितराजस्य मूलनिवासः कः ?

२. जगन्नाथः कस्य आस्थाने कदा आसीत् ?

३. रसगङ्गाधरस्य अपरं नाम किम् ?

४. रसगङ्गाधरनिर्माणे कः ग्रन्थः परिशीलितः ?

५. जगन्नाथस्य आसाधारणीप्रतिभा कीदृशी ?

## २. पण्डितराजस्य रचनाः

**१. अमृतलहरी (यमुनास्तुतिरूपा) २. करुणालहरी (विष्णुस्तुतिरूपा)**

**३. पीयूषलहरी अथवा गङ्गलहरी ४. लक्ष्मीलहरी ५. सुधालहरी**

**६. यमुनावर्णनम् (गद्यकाव्यम्) ७. जगदाभरणम् ८. प्राणाभरणम्**

**९. भामिनीविलासः १०. आसफविलासः**

**११. मनोरमाकुचमर्दनम् (व्याकरणे प्रौढमनोरमाखण्डनम् ।)**

**१२. चित्रमीमांसाखण्डनम्** **१३. रसगङ्गाधरः**

**१४. शब्दकौस्तुभशाणोत्तेजनम्**---- इति अन्याऽपि व्याकरणशास्त्रीया रचना अस्तीति विदुषामभिप्रायः । आसु रचनासु रसगङ्गाधरः चित्रमीमांसाखण्डनम् इति द्वेऽपि रचने ऋ.क़्. १६४१-१६५० मध्ये रचिते इति ६.ज. ख़्ढुदङ्ख महाशयस्य निश्चयः ।

**स्वावलोकनप्रश्नाः**

१. पण्डितराजस्य पञ्चलहर्यः काः ?

२. विलासनाम्ना रचितौ ग्रन्थौ कौ ?

३. शास्त्रीयाः पण्डितराजरचिताः ग्रन्थाः के ?

४. रसगङ्गाधरे चित्रमीमांसाखण्डनं कदा दृश्यते ?

## ३. पण्डितराजस्य शास्त्रीयं व्यक्तित्वम्

त्रयोदशशताब्दादारभ्य गङ्गेशादिभिः प्रवर्तितस्य नव्यन्यायस्य शास्त्रजगति परीवाहरूपेण विजृम्भणं सम्प्रवृत्तम्, यत्र च अलङ्कारशास्त्रमपि सम्पूर्णशास्त्रत्वव्यवस्थामर्थयमानं नव्यन्याय-प्रभावेणातितमां प्रभावितमजायत। अत एव पण्डितराजस्य वाग्विन्याससरणिरपि नव्यन्यायपरिग्रहात् प्रौढा स्पष्टा च सञ्जाता । अन्यच्च पण्डितराजः स्थूलदृष्ट्या न किञ्चिदपि विषयमनुमन्यते । तत्तत्सिद्धान्तसारस्य परं यावन्न निरीक्ष्यते, तावन्नैव संतृप्तो भवति । यद्यपि पण्डितराजः आक्षेपालङ्कारप्रकरणे---

**'ध्वनिकृतामालङ्कारिकसरणिव्यवस्थापकत्वात् (र.गं.पृ. ५२९.)'** इति ध्वनिकारे तथा **'इत्याहुरभिनवगुप्तपादाचार्याः (र.गं.पृ. २८.)'** इति अभिनवगुप्तमतेऽपि सामान्यतः महतीं मान्यतामेव दर्शयति, तथापि निश्शङ्कोचमितरानालङ्कारिकान् वास्तवदृक्पथानुसारेण विमृशति । **अत एव 'प्राप्तश्रीरेष कस्मात् (र.गं. रूपकप्रकरणे-पृ. ३२८.)'** आनन्दवर्धनाभिमतं रूपकध्वनित्वं दूषयित्वा पयोधिकम्पादिकार्यप्रयुक्तः

अनाहार्याभेदबोधप्रयुक्तः भ्रान्तिध्वनिरेव समर्थितः। '**विमतवाक्यं त्वश्रद्धेयमेव**' इत्यादिना मम्मटमतमपि काव्यलक्षणविषये दूषितम् । पण्डितराजः प्रतिपादनीयसैद्धान्तिकविषयमहिम्नः पुरतः कमपि न गणयति, तथापि '**उच्छृङ्खलतायाश्च मुनिवचननियन्त्रितत्वात्**' इत्यादिना रसभावादिसङ्ख्याविषये मुनिवचने महान्तं गौरवं दर्शयन् आलङ्कारिकाणामप्यनुशासनं शिक्षयति । दीक्षितविषये तु पण्डितराजेन 'निरस्यतां च रूपक-दाक्षिण्यकौपनम्' इत्यादिना उपयुक्ता भाषा, प्रत्येकशः चित्रमीमांसाखण्नग्रन्थोद्यमश्च तस्य अप्पय्यदीक्षिते, विद्यमानं वैरं व्यक्तिगतमिव व्यनक्ति । तथापि '**निश्शेष...**' इत्यादिपद्यविमर्शे दीक्षिते पण्डितराजकृतः विमर्शः अलङ्कारशास्त्रीयमहत्त्वोद्घाटनायैव अकल्प्यत इति, तस्य वैरमपि क्षेमङ्करमेव । अस्तु एवमस्य शास्त्रीयं व्यक्तित्वं महोन्नतम् ।

**स्वावलोकनप्रश्नाः**

१. नव्यन्यायशैली केन आरब्धा ?

२. नव्यन्यायशैल्या अलङ्कारविमर्शनेन साहित्यस्य किमागतम् ?

३. पण्डितराजचिन्तने किं वैशिष्ट्यम् ?

४. पण्डितराजकाव्यप्रकाशं कुत्र कथं खण्डितवान् ?

५. पण्डितराजः ध्वन्यालोके कस्य उदाहरणस्य खण्डनं कृतवान् ? कथम् ?

६. रससंख्यानियमनं पण्डितराजः कस्य वचनम् आदृतवान् ?

७. दीक्षितमतखण्डनविषये किं मूलम् ?

८. निश्शेषच्युत.... इत्यादिश्लोकव्याख्यानं पण्डितराजः किमर्थं कृतवान् ?

## ४. रसगङ्गाधरनामौचित्यम्

पण्डितराजस्य कृष्णभक्तेः प्रसिद्धत्वेऽपि गङ्गाभक्तिरपि महिमान्विता । अत एव गङ्गा परमशिवनामस्मारकतया ग्रन्थनाम कृतम् । रसः एव गङ्गा रसगङ्गा, तस्य धरः ----इति विग्रहः । रसो नाम रसत्वेनोपलक्षितः अलङ्कारशास्त्रीयः रमणीयतासम्पादकः सर्वो विषयः । अथवा रसः **उ**सारः अलङ्कारशास्त्रीयसारः, स एव गङ्गा, तस्याः धरः । यथा हि---- धूर्जटेः गङ्गाधरणसामर्थ्यम्, एवं ग्रन्थस्यास्य गङ्गात्वेनाध्यवसितालङ्कारशास्त्रार्थसारधारणसामर्थ्यम् । तथा च **शिवस्वरूपोऽयं ग्रन्थराजः** ।

शिवश्च 'चतुर्मुखस्तत्पुरुषस्त्रिनेत्रः', 'वक्त्रं सदा रक्षतु पञ्चवक्त्रः' इति स्कान्दपुराण-वचनानुसारेण चतुर्मुखत्वेन, पञ्चमुखत्वेन वा प्रसिद्धः । एवं सति उत्तरालङ्कारे असमग्रतया पूर्णस्यास्य ग्रन्थस्य कति आननानि इत्युक्ते पञ्चानत्वेन ग्रन्थोऽयं प्रणिनीषितः ---इति कश्चिद्वादः अस्ति । परं पण्डितराजेन स्वप्रणालिकायां स्वग्रन्थे त्यक्ताः विषयाः विरला एव दृश्यन्ते ।

**१. व्यङ्ग्यस्य वाच्यीकरणे वमनाख्यदोषस्य वक्ष्यमाणत्वात् । (र.गं. पृ. ६२.)**

**२. एवमेषां रसादीनां प्राधान्येन निरूपितान्युदाहरणानि गुणीभावे तु वक्ष्यन्ते नामानि च । (र.गं. पृ. १३४.)**

**३. न च वैयाकरणमतविरोधो दूषणमिति वाच्यम्, स्वतन्त्रत्वेनालङ्कारिकतन्त्रस्य तद्विरोधस्यादूषणत्वात् । प्रपञ्चयिष्यते चेदमुपरिष्टात् । (र.गं. पृ. ३९६)**

एवञ्च उपर्युक्तग्रन्थात्---- १. वमनादिकतिपयदोषाणाम्, २. रसवदाद्यलङ्काराणाम्, अलङ्कारशास्त्रत्व-सम्पादकविषयाणाम्, असङ्गत्यलङ्काराणे अभावस्य जन्यत्वस्य च पण्डितराजस्य निरूपयितुमिष्टत्वेन, निरूपणीयाः अतिस्वल्पा एवेति ज्ञायते । ततश्च गङ्गाधरस्य डा.पुल्लेल श्रीरामचन्द्रुडुमहाशयोक्तरीत्या अर्धनारीश्वरतत्त्वात्मकत्वेन, उमामहेश्वरात्मकाननद्वय-योगित्वमेवास्य ग्रन्थस्योत्पश्यामः ।

**स्वावलोकनप्रश्नाः**

१. र सगङ्गाधरः इति ग्रन्थनाम्नः सार्थक्यं कथम् ?

२. पञ्चाननः, चतुराननः शिवः इति किं प्रमाणम् ?

३. पण्डितराजेन के के विषयाः परित्यक्ताः ?

४. आननद्वयसमर्थने श्रीपुल्लेल.श्रीरामचन्द्रुडुमहोदयः किमभिप्रैति ?

## ५. प्रथमाननविषयाः

किन्नाम काव्यम् ? को वा काव्यहेतुः ? काव्यस्य कतिविधत्वम् ? को नाम रसः ? कति रसभेदाः? स्थायिनां लक्षणं किम् ? के रसदोषाः ? गुणाः नाम के ? ते च कति ? तदभिव्यञ्जकरचनाप्रकाराः कथं स्युः ? भावसामान्यलक्षणं किम् ? भावविशेषलक्षणानि कानि ? को नाम रसाभासः ? को वा भावाभासः ? के वा अलक्ष्यक्रमध्वनिभेदाः ? रत्यादीनां संलक्ष्यक्रमध्वनित्वमस्ति न वा ? इत्यादयः विषयाः सुस्पष्टमत्र रसगङ्गाधरप्रथमानने पण्डितराजेन व्याख्याताः।

**स्वावलोकनप्रश्नाः**

१. प्रथमानने विरचिताः अंशाः के ?

## ६. रसगङ्गाधरप्रथमाननवैशिष्ट्यम्, प्रकृतनिबन्धसरणिश्च

निबन्धेऽस्मिन् दशाध्यायाः। तत्रादौ प्रथमाध्यायविषयाः परामृश्यन्ते----

१. प्राचीनाः वामनमम्मटादयः अदोषगुणालङ्कारविशिष्टशब्दार्थौ काव्यमित्यूचुः। परं जगन्नाथः शब्दस्यैव ‘काव्यं श्रुतम्’ इत्यादि व्यवहारात् काव्यत्वं समर्थयति।

काव्ये चमत्कारस्य प्राधान्यं प्रत्यभिज्ञाय अदोषगुणालङ्कारदलनिवेशनभारात् काव्यलक्षणं मोचयामास। वस्त्वलङ्कारयोरपि क्वचित्काव्ये प्राधान्यस्य दर्शनात्, पण्डितराजः दर्पणकारस्य रसात्मकत्ववादं दूरीकृतवान्। स्वाभिमतञ्च हेतुबद्धं काव्यलक्षणं प्रकाशयामास। एवं पण्डितराजः काव्यकारणविषये काव्यं प्रति प्रतिभायाः उत्कृष्टस्थानं दत्त्वा, तां प्रति विलक्षणव्युत्पत्त्यभ्यासयोः अदृष्टस्य वा वैकल्पिकरूपेण 'तृणारणिमणिन्यायेन' कारणत्वं व्यवस्थापयामास। एषा च मीमांसा सर्वाऽपि काव्यमीमांसात्मके **प्रथमे अध्याये** वितनिष्यते।

२. मम्मटादिभिः व्यङ्ग्यं पुरस्कृत्य काव्यत्रैविध्यं निरूपितम्। तत्र अधमकाव्ये क्वचित् उद्भूतव्यङ्ग्यस्य, क्वचिदनुद्भूतव्यङ्ग्यस्य च सद्भावेन द्वयोरपि अधमत्वेन रूपेण एकधा परिगणनम् अन्याय्यमित्याकलय्य चमत्मकारप्राधान्येन काव्यविभागं नूतनतया प्रदर्शितवान्। 'निश्शेष...' इत्यादिप्रसिद्धपद्ये दीक्षिताभिमतं ध्वनित्वं खण्डशः खण्डयामास पण्डितराजः, यत्र च चातुर्यपूर्णः नवीनालङ्कारिकसिद्धान्तोऽपि तेन नूतनतया स्पष्टतया आविष्कृतः ----इत्येषा **द्वितीयाध्यायसरणिः** ।

३. अथ रसस्वरूपमीमांसात्मके **तृतीये अध्याये**--- सामान्यतः रसविचाराध्ययनोपयोगितया भट्टलोल्लटादि मतचतुष्टयनिरूपणम्, रसविषये वेदान्तप्रभावाश्रयणे कारणम्, पण्डितराजनिरूपितेषु रसविषयेषु एकादशमतेषु आश्रितक्रमः इत्यादिकं निबन्धकारेण निरूपयिष्यते । ततः निरूपितेषु एकादशमतेषु रससूत्रानुकूलानाम् अष्टमतानां निरूपणम् अत्र विहितम् । तत्रापि विचारणीयविषय-रमणीयानां षण्मतानां निरूपणमपि प्रत्येकशो विहितम् ।

वेदान्तशास्त्रप्रसिद्धावच्छेद्यावच्छेदकभाववादम्, उपाध्युपधेयभाववादञ्च आधारीकृत्य क्रमेण प्रवृत्ते अभिनवगुप्तमते 'यद्वा' इति मते च, क्रमेण सविकल्परसास्वादः निर्विकल्परसास्वादश्च फलतया अस्तीति निबन्धकारेण निरूपितम्। एवमत्र पण्डितराजोपयुक्तवेदान्तसाङ्केतिकपदावल्याः अवच्छेद-उपाधि-अनिर्वचनीयख्यातिप्रमुखायाः व्याख्यानपुरस्सरं तत्तन्मतव्याख्यानम् अत्र प्रपञ्चितम्।

४. **चतुर्थे अध्याये----** तु शान्तस्य नाट्यरसत्वम्, भक्तेः रसत्वनिराकरणम्, स्थायिसामान्य-विशेषलक्षणानि, स्थायिव्यभिचारिणो भेदाः, रसदोषाः इत्यादयः विषयाः

प्रत्येकशः परिशीलिताः।

प्रायशः आधुनिकाध्ययनकाले पञ्चदशविषयाणां विंशतिविषयाणां वा मुख्यातिमुख्यानां परीक्षासन्नाहाय स्वीकारात्, विकीर्णतया ग्रन्थकारेण लिखितेषु विषयेषु एकवाक्यताभावेन, ग्रन्थस्य समग्रस्य पठनाभावेन च, छात्रेषु व्युत्पत्तिः, हसन्तीव दृश्यते। तत्परिहाराय च तेषामपि प्रश्नप्रतिवचन-रूपेण छात्रैः पाठनाय प्रयासः अत्र अध्यायान्तरेष्वपि च विहितः।

५. एवं **पञ्चमे अध्याये-----** रसानां सप्रभेदानां सोदाहरणं निरूपणं कृतम्। तत्रापि प्रथमतः शृङ्गार-वीर-हास्यात्मकाः अवान्तरप्रभेदवन्तः त्रयो रसाः सोदाहरणं निरूपिताः। ततः उदाहरणप्रत्युदाहरणसङ्कुलाः शान्त-रौद्र-अद्भुतात्मकाः त्रयो रसाः निरूपिताः। ततः एकैकोदाहरणोपशोभितानां करुण-भयानक-बीभत्सानां त्रयाणां रसानां निरूपणमपि व्यधायि । तदनु प्राचीननवीनालङ्कारिकमतपर्यालोचनपुरस्सरं पण्डितराजेन निरूपिताः षड्रसविरोधपरिहारोपायाः अपि निरूपिताः।

६. एवं **षष्ठे अध्याये**---- गुणमीमांसाविचारे गुणसामान्यस्वरूपगुणतारतम्यनिरूपण-रसमात्रधर्मत्वदूषण-वामनोक्तविंशतिगुणनिरूपण-त्रिगुणान्तर्भाववादप्रमुखाः विषयाः परामृष्टाः। अत्र च पण्डितराजेन रसमात्रधर्मत्ववादं दूषयित्वा रसादिधर्मत्वप्रतिपादनेन प्राचीननवीनसिद्धान्तयोः समन्वयमार्ग एव स्वीकृतः।

७. एवं **सप्तमे अध्याये**---- गुणाभिव्यञ्जकरचनामीमांसायां पण्डितराजेन कविसहृदययोः अत्यन्तं श्रद्धेयाः तत्तद् गुणाभिव्यञ्जकरचनादयः विषयाः निरूपिताः, यत्र तस्य विमर्शनकरवालस्य अमरुकोक्तयः अपि लक्ष्याः आसन्।

८. एवम् **अष्टमे अध्याये** भावमीमांसायाम्--- १. भावलक्षणाविचारः, २. भावाभिव्यक्तौ मतभेदाः, ३. कतिपयभावानां पारस्परिको भेदः तत्र तत्र पण्डितराजेन विक्षिप्ततया एकीकृत्य निरूपितः । ४. भावानां पदप्रकाश्यत्वम्, ५. भावानां रसानाञ्च भेदः इत्यमी विषयाः सम्यक् विचारिताः। चतुस्त्रिशंत् भावानामपि लक्षणोदाहरणनिरूपणस्य लघुनिबन्धेऽस्मिन् दुष्करत्वात् विषयविचाररमणीयाः षोडश भावाः सोदाहरणं निरूपिताः। अन्ये च भावाः सोदाहरणं जिज्ञासुच्छात्रैः रसगङ्गाधरादेव विज्ञेयाः ।

९. एवं **नवमे अध्याये**---- रसाभासादिमीमांसायां रसाभासपूर्वपक्षलक्षणेषु दोषाविष्कारपूर्वकं रसाभासलक्षणं प्रतिपाद्य, नव रसाभासाः, भावाभासाश्च विचारिताः। यत्र द्रौपदीगतरत्याख्यभावस्य पञ्चपाण्डवालम्बनस्य रसत्वम् उत ? रसाभासत्वमिति रुचिकरः विचारः सम्यगाविष्कृतः ।

१०. अथ **दशमे अध्याये**---- भावशान्त्यादिमीमांसायां तु भावशान्त्याद्यसंलक्ष्यक्रमप्रभेदानां सोदाहरणं निरूपणम्, भावशान्त्यादिषु भावध्वनित्वमेव इति नूतनविषयाविष्कारः रत्यादीनां संलक्ष्यक्रमध्वनित्वम् इत्यादयः विषयाः सयुक्तिकं निरूपिताः ।

**स्वावलोकनप्रश्नाः**

१. रसगङ्गाधरसङ्गमन्यां कति अध्यायाः सन्ति ?

२. प्रत्यध्यायं के के विषयाः निरूपिताः ?

३. कतमः अध्यायः अत्र सारभूतः ?

४. रसभासाः रसगङ्गाधरे कति निरूपिताः ?

५. गुणानां विषयेरसगङ्गाधरस्य किं महत्त्वम् ?

६. काव्यकारणविषये कः न्यायः अवतारितः ?

७. परिशिष्टे के के विषयाः विचारिताः ?

# रसगङ्गाधरः

## I. काव्यमीमांसा

शास्त्रजगति काव्यशास्त्रं चमत्काराधायककाव्य-गणालङ्कारादिविविधकाव्यशास्त्रीयपदार्थस्वरूप-विश्लेषणात्मकं जागर्ति । संसारेऽस्मिन् परमानन्दाय गुरु-राज-देवताप्रसादावाप्तये पाठकैः काव्यशब्दव्यप-दिष्टश्शब्दराशिः अवश्यमध्येतव्यः। कविभिश्च सरस्वतीकटाक्षलब्धप्रतिभैः अथवा विलक्षणव्युत्पत्त्य-भ्यासससम्पादितप्रतिभाशालिभिः काव्यप्रणयने उद्यमः अवश्यमास्थेयः। यतस्तेषां कीर्तिसम्पादनाय काव्यप्रणयनात् नान्यः अस्ति उपायः । अतः काव्यं पाठकदृष्ट्या कविदृष्ट्या च प्रयोजनवत्।

तस्यास्य काव्यस्य किम् असाधारणं रूपम् ? इति जिज्ञासायां प्राचीनेषु भामहः **'सहितौ शब्दार्थौ काव्यम्'** इति, दण्डिपण्डितः **'सङ्क्षेपाद्वाक्यमिष्टार्थव्यवच्छिन्ना पदावली काव्यम्'** इति, वामनाचार्यः– **'काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोः वर्तत'** —इति च जगदिरे।

नवीनेषु च आनन्दवर्धनः **'शब्दार्थशरीरं तावत् काव्यम्'** इति, महिमभहस्तु–'कविव्यापारो हि विभावादिसंयोजनात्मा रसाभिव्यक्त्यव्यभिचारी काव्यम्' इति, मम्मटाचार्यस्तु–**'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि'** इति, चण्डीदासस्तु– **'आस्वादजीवातुः पदसन्दर्भविशेषः काव्यम्'** इति च स्वस्वदृक्कोणानुसारं काव्यलक्षणान्याविश्चक्रुः। किन्तु एतेषु कानिचित् विशिष्टशब्दस्य काव्यत्वं समर्थयन्ति, कानिचिच्च विशिष्टशब्दार्थयोः काव्यत्वं समर्थयन्ति। कस्यचित्तु लक्षणं विशिष्टकविव्यापारस्यैव काव्यत्वं समर्थयति। एवं सत्स्वपि बहुषु काव्यलक्षणेषु काव्यस्य काव्येतरात् व्यावर्तकं किं रूपम् ? इत्युक्ते- पण्डितराजः **'रमणीयार्थ प्रतिपादकः शब्दः काव्यम्'** इति विशिष्टं काव्यलक्षणं न्यरूरुपत्। एतल्लक्षणादिकमेवात्र विचारणीयम् । विभागेऽस्मिन्—

1. **पण्डितराजोक्तं काव्यलक्षणम्**
2. **प्राचीनकाव्यलक्षणखण्डनम्**
3. **दर्पणकारोक्तकाव्यलक्षणस्य खण्डनम्**
4. **काव्यकारणविचारः इत्यमी विषयाः परिशीलयिष्यन्ते ।**

**स्वावलोकनप्रश्नाः**

१. काव्यं किमर्थं पठनीयम् ?

२. प्राचीनानां काव्यलक्षणानि कानि ?

३. चण्डीदासस्य काव्यलक्षणं किम् ?

४. लक्षणस्य प्रयोजनं किम् ?

# I. 1. पण्डितराजोक्तं काव्यलक्षणम्

**'रमणीयार्थप्रतिपादकः शब्दः काव्यम्'** इति पण्डितराजेन परमरमणीयतया प्राचीनसकलालङ्कारिक-विलक्षणतया च काव्यलक्षणम् आविष्कृतम्। शब्दार्थयोः चमत्कारसम्पादने परस्परस्पर्धार्थित्वेऽपि बोधकस्य बाह्यस्य शब्दस्य पाठकदृष्ट्या प्रथमोपस्थिततत्वाच्च, रमणीयस्यार्थस्य च तत् प्रसूतत्वात्, शब्दस्य विशेष्यत्वलक्षणं प्राधान्यं पुरस्कृत्य इदं लक्षणं प्रवृत्तम्। काव्ये चमत्कारस्य अवश्यम् आपेक्षितत्वात् तज्जनकगुणालङ्कारादिप्रसक्तिं विहाय इदं निर्दुष्टं काव्यलक्षणं प्रवर्तितम्।

रमणीयश्चासौ अर्थश्च रमणीयार्थः। रमणीयार्थस्य प्रतिपादकः इति विग्रहः। रमणीयार्थप्रति-पादकत्वे सति शब्दत्वं काव्यस्य लक्षणम्।

**'मुखं चन्द्रः'** इत्यादिवाक्ये **'चन्द्राभिन्नं मुखम्'** इति चमत्कार्यर्थप्रतिपादकत्वस्य शब्दत्वस्य च सत्त्वात् काव्यलक्षणसमन्वयः।

**स्वावलोकनप्रश्नाः**

१. इतरकाव्यलक्षणानामपेक्षया पण्डितराजस्य लक्षणे का **नवीनता** ?

२. **रमणीयार्थप्रतिपादकः** इत्यस्य विग्रहः कः ?

३. उदाहरणं काव्यस्य किम् ? कथम् ?

## I. 1. i. दलसार्थक्यम्

लक्षणे शब्दत्वमात्रोक्तौ ‘घटमानय‘ इत्यादिवाक्ये अतिव्याप्तिः । अतः रमणीयार्थ-प्रतिपादकत्वम्। रमणीयपदानुपादानेऽपि तत्रैव वाक्ये अतिव्याप्तिः। अतः रमणीयपदम्। अर्थपदानुपादाने रमणीयत्वेन साधुत्वेन शब्दप्रतिपादकत्वस्य शब्दत्वस्य च व्याकरणशास्त्रे सत्त्वेन तत्रातिव्याप्तिः। अतः अर्थपदम्। प्रतिपादकम् इति वाचक-लक्षक-व्यञ्जकसाधारणम्। यदि रमणीयार्थवाचकत्वमित्येव उच्येत तर्हि— **‘अहो पूर्णं सरो यत्र लुठन्तः स्नान्ति मानवाः‘** इति लाक्षणिककाव्ये, भ्रमधार्मिकेत्यादिव्यङ्ग्यपरे काव्ये च अव्याप्तिः स्यात्। अतः वाचकादित्रितय-साधारण्येन प्रतिपादकत्वनिवेशः। रमणीयार्थप्रतिपादकत्वमात्रोक्तौ च कामिनीकटाक्षभ्रूविक्षेपादिषु अतिव्याप्तिः। अतः शब्दत्वम्।

**स्वावलोकनप्रश्नाः**

१. दलसार्थक्यं नाम किम् ?

२. **शब्दत्वमात्रोक्तौ** कुत्र अतिव्याप्तिः ?

३. अर्थपदं कुतः निवेशितम् ?

४. प्रतिपादकपदेन कुत्र अतिव्याप्तिः वार्यते ?

५. **रमणीयार्थप्रतिपादकत्वमात्रोक्तौ** कुत्र अतिव्याप्तिः ?

६. **प्रतिपादकम्** इति पदं केषां साधारणम् ?

## I. 1. ii. रमणीयार्थप्रतिपादकत्वविचारः

एवमपि किमिदं रमणीयार्थप्रतिपादकत्वम् ? किं वह्नेः औष्ण्यमिव जलस्य आर्द्रीकरणमिव स्वाभाविकम्? आहोस्वित् प्रयत्नान्तरसाध्यम् ? यदि तत् शब्दस्य स्वाभाविकं तर्हि सर्वेषामेव शब्दानाम् अविशेषात् काव्यत्वप्रसङ्गः। यदि च प्रयत्नान्तरसाध्यम्, कोऽसौ प्रयत्नः इति

वक्तव्यम्। स च प्रयत्नः भावनैव इति पण्डितराजस्य सिद्धान्तः। अयं भावः लौकिकशब्द इव काव्यशब्दोऽपि अर्थं बोधयति। परन्तु काव्यशब्दप्रतिपाद्यस्य अर्थस्य भावनावकाशः भवति। तत्र भावनाया लोकोत्तराह्लादापरपर्यायः चमत्कारः जायते। तादृशभावनाविषयार्थबोधकत्वमेव रमणीयार्थ-प्रतिपादकत्वम्। अतएव पण्डितराजेन अर्थगतसौन्दर्यलक्षणां रमणीयतां परित्यज्य **'रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरता'** इति परिष्कृतम्। तत्र च ज्ञानम् 'पुनः पुनरनुसन्धानात्मक-भावनारूपम्' इति भावनासाध्यमेव रमणीयार्थप्रतिपादकत्वम्।

**स्वावलोकनप्रश्नाः**

१. रमणीयार्थप्रतिपादकप्रयत्नः कः ?

२. भावनया कः जायते ?

३. अर्थगतसौन्दर्यलक्षणां रमणीयतां विहाय रमणीयता कथं परिष्कृता ?

४. भावना नाम का ?

## I. 1. iii. रमणीयता-लोकोत्तरत्वपरिष्कारयोः बीजनिरूपणम्

नन्वेवम् 'घटमानय' इत्यादिवाक्ये काव्यलक्षणस्य अतिव्याप्तिस्तदवस्थैव। तथा हि 'दश दाडिमानि' 'षडपूपाः' इत्याद्यसंसर्गकवाक्यकदम्बापेक्षया 'वह्निना सिञ्चति' इति वाक्यार्थे कनीयसा पक्षेण बाधितस्यापि संसर्गस्य सद्भावादस्ति रमणीयता। ततोऽपि 'घटमानय' इत्यत्र अबाधितस्यैव संसर्गस्य सत्त्वात्, रमणीयतायाः पूर्ववाक्यार्थापेक्षया अधिकत्वात्, 'घटमानय' इत्यादिवाक्ये आपेक्षिकरमणीयताविशिष्टार्थप्रतिपादकत्वस्य सत्त्वात् काव्यलक्षणस्य अतिव्याप्तिः। अतः 'रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरता' –इति परिष्कृतम्। घटमानयेत्यादिवाक्यार्थे आपेक्षिकरमणीयतायाः सद्भावेऽपि, तादृशवाक्यार्थज्ञानस्य लोकोत्तराह्लादजनकत्वाभावात्, तादृश-वाक्यार्थे लोकोत्तराह्लादजनकज्ञानगोचरतारूपरमणीयताया अभावान्नातिव्याप्तिः।

अथ कोऽसौ लोकोत्तराह्लादः ? अथवा किं वा आह्लादगतं लोकोत्तरत्वं किं निरतिशयाह्लादः ? आहोस्वित् सातिशयाह्लादः ? आद्ये ब्रह्मानन्दस्यैव तादृशत्वात्, लोकोत्तराह्लादजनकज्ञानविषयार्थप्रतिपादकशब्दत्वस्य 'तत्त्वमसि' इत्याद्युपनिषद्वाक्येष्वेव सत्त्वात्, काव्यलक्षणस्य तत्रातिप्रसङ्गः । यदि च सापेक्षः अयमाह्लादः पूर्वोक्तयुक्त्या 'घटमानय' इत्यादिवाक्ये पुनरतिव्याप्तिः तदवस्थैव । अत एव पण्डितराजेन **'लोकोत्तरत्वं चाह्लादगतश्चमत्कारत्वापरपर्यायः अनुभवसाक्षिकः जातिविशेषः'** इत्युक्तम् । एवञ्च आह्लादगतं लोकोत्तरत्वं सर्वविधचमत्कारानुगता चमत्कारत्वलक्षणा जातिरेव । सा च जातिः सहृदयानुभवात्मकप्रत्यक्षप्रमाणवेद्यैव । अतश्च तादृशाह्लादगतजातेः घटमानयेत्यादिवाक्यजन्याह्लादे अभावेन नातिव्याप्तिः।

नन्वेवम् 'पुत्रस्ते जातः', 'धनं ते दास्यामि' इत्यादिवाक्यार्थानामपि लोकोत्तराह्लादकारित्वेन तत्र रमणीयतायाः सत्त्वात् काव्यलक्षणस्य अतिप्रसङ्गः स्यात् । अतः 'लोकोत्तराह्लादजनकज्ञान' इत्यत्र ज्ञानपदं पुनःपुनरनुसन्धानात्मकभावनारूपेण ग्राह्यम् । तादृशवाक्यार्थस्य च उत्कण्ठापनोदमात्रफलकत्वेन पुनःपुनरनुसन्धानायोग्यत्वात् भावनाजन्यत्वाभावेन आह्लादे लोकोत्तरत्वाभावात् नातिव्याप्तिः। इत्थञ्च पण्डितराजस्य मते पूर्वोक्तकाव्यलक्षणस्य परिष्काररूपेण त्रीणि समायान्ति ।

**स्वावलोकनप्रश्नाः**

१. **वह्निना सिञ्चति, घटमानय** इत्यादौ कथमाह्लादः ?

२. लोकोत्तरत्वं नाम किम् ?

३. **लोकोत्तराह्लादज्ञानगोचरता** इत्यत्र ज्ञानपदं कथं ग्राह्यम् ?

४. पुनःपुनरनुसन्धानरूपभावनायाः स्वीकारेण कुत्र अतिव्याप्तिः वार्यते ?

५. किं नाम लोकोत्तरत्वम् ?

## I. 1. iv. काव्यलक्षणपरिष्कारत्रयम्

१. चमत्कारजनकभावनाविषयार्थप्रतिपादकशब्दत्वम्।

२. यत्प्रतिपादितार्थविषयकभावनात्वं चमत्कृतिजनकतावच्छेदकं तत्त्वम्।

३. स्वविशिष्टजनकतावच्छेदकीभूतार्थप्रतिपादकतासंसर्गेण चमत्कारत्ववत्त्वम्।

**१.** चमत्कारजनिका मुखं चन्द्रः इत्याद्यर्थविषयकभावना, तद्विषयः यः अर्थः तादृशः चमत्कारी अर्थः। तत्प्रतिपादकत्वे सति शब्दत्वस्य 'मुखं चन्द्रः' इत्यादौ सत्त्वात् समन्वयः।

**२.** एवमपि 'मुखं चन्द्रः' इत्यत्र 'घटवद्भूतलम्' इति वाक्ये अतिप्रसङ्गः। तथा हि 'मुखं चन्द्रः' इति चमत्कारिवाक्यार्थभावनायामेव कदाचित् घटवद्भतलम्' इत्यचमत्कारिणोऽर्थस्य समूहालम्बनविधया भाने, चमत्कारजनकभावनाविषयार्थप्रतिपादकत्वस्य 'घटवद्भूतलम्' इति वाक्येऽपि सत्त्वात् अतिव्याप्तिः। अतः द्वितीयकाव्यलक्षणपरिष्कारानुधावनम्। तत्र च यत्तच्छब्दयोः सत्त्वात् यत्पदेन य एव शब्दसमुदायः स्वीकृतः तत्पदेनाऽपि स एव शब्दसमुदायः स्वीकार्थः। यच्छब्देन 'मुखं चन्द्रः' इति शब्दसमुदायस्य ग्रहणे तादृशशब्दप्रतिपादितार्थविषयकभावनायाः चमत्कारित्वात् तादृशभावनात्वे चमत्कृतिजनकतावच्छेदकमस्तीति, तत्त्वस्य 'मुखं चन्द्रः' इत्यत्र सत्त्वात् लक्षणसमन्वयः। 'घटवद्भूतलम्' इति शब्दप्रतिपादितार्थविषयभावनायास्तु अचमत्कारित्वात् तादृशवाक्यार्थभावनत्वे चमत्कृतिजनकतावच्छेदकतायाः अभावात् नातिव्याप्तिः।

**३.** द्वितीयपरिष्कारेऽपि यत्तदोः अननुगतत्वात् स्वविशिष्टेत्यादितृतीयपरिष्कारानुधावनम्। एतत्परिष्कारे च स्वविशिष्टशब्दत्वं काव्यस्य लक्षणम्। स्ववैशिष्ट्यञ्च शब्दे स्वविशिष्टेत्यादि-पूर्वोक्तसम्बन्धेन। तथा हि स्वम्= चमत्कारत्वम्, स्वविशिष्टम् चमत्कारः। चमत्कारजनिका अर्थविषयकभावना, तस्या एव चमत्कारित्वात्। भावनायां विषयतया अवच्छेदकः अर्थः। तत्प्रतिपादकत्वे सति शब्दत्वं काव्यलक्षणमिति समन्वयः। अयं भावः। लौकिकशब्द इव काव्यशब्दोऽपि कञ्चन अर्थं बोधयति। यस्य अर्थस्य भावनया सामाजिकानां मनसि चमत्कारः जायते, तादृशार्थप्रतिपादकः शब्द एव 'काव्यम्' इति पण्डितराजस्य आशयः।

**स्वावलोकनप्रश्नाः**

१. जगन्नाथमतानुसारं काव्यस्य परिष्कृतलक्षणानि कानि ?

२. प्रथमलक्षणसमन्वयः कथम् ?

३. द्वितीयलक्षणस्वीकारे किं बीजम् ?

४. तृतीयलक्षणस्य आवश्यकता का ?

# I. 2. प्राचीनकाव्यलक्षणखण्डनम्

प्राचीनाः भामह-मम्मटप्रभृतयः आलङ्कारिकाः 'अदोषौ सगुणौ सालङ्कारौ शब्दार्थौ काव्यम्' इति शब्दार्थपरत्वेन काव्यलक्षणम् ऊचुः। तत्रेदं विचारणीयम्।

## I. 2. i. व्यवहाराच्छब्दस्य काव्यत्वम्

सामान्यतः पदस्य शक्तिज्ञानं मुख्यतया व्यवहारप्रमाणाधीनम्। काव्यपदस्य किं शब्दार्थयोः द्वयोरपि शक्तिः ? उत शब्दमात्रे शक्तिः ? इति विचारे प्रसक्ते **'काव्यं श्रुतम्'**, **'काव्यम् उच्चैः पठ्यते'**, **'काव्यादर्थः अवगम्यते'** इत्यादिव्यवहारप्रमाणबलात् काव्यपदस्य शब्दविशेष एव शक्तिरिति निश्चीयते। न हि पाठकर्मत्वं श्रवणकर्मत्वं वा अर्थस्य सम्भवति, अपि तु शब्दस्यैव। न च 'पूर्वे पाञ्चालाः' इत्यत्र पूर्वपश्चिमाद्यनेकदेशशक्तस्य पाञ्चालशब्दपूर्वपदेन अन्वयसिद्धये एकदेशविशेषे यथा लक्षणा स्वीक्रियते, एवमन्यत्र शब्दार्थोभयशक्तस्य काव्यपदस्य 'काव्यं श्रुतम्' इत्यादौ लाक्षणिकत्वस्वीकारेण काव्यपदशक्तिनिर्णायकत्वं नास्ति इति वाच्यम्। शब्दार्थयुगले काव्यपदस्य शक्तिनिर्णायकस्य मुख्यस्य व्यवहारस्य अभावेन, तेषां लाक्षणिकव्यवहारत्वस्य अयोगात्। न च **'शब्दार्थौ काव्यम्'** इति काव्यप्रकाशाद्याप्तवाक्यमेव प्रमाणमिति वाच्यम्। युक्तिं विना अर्थं प्रत्याययितुं प्रवृत्तेषु तेषु आप्तत्वस्यैव अनिश्चयात्। अत एवोक्तं पण्डितराजेन- **'विमतवाक्यं तु अश्रद्धेयमेव'** इति।

**स्वावलोकनप्रश्नाः**

१. **शब्दः काव्यम्** इत्यत्र किं प्रमाणम् ?

२. प्राचीनकाव्यलक्षणं किम् ?

३. **शब्दः काव्यम्** इति स्वीकारे व्यवहारवाक्ये के ?

## I. 2. ii. युक्त्यभावात् शब्दार्थयोरकाव्यत्वम्

किञ्च ' शब्दार्थौ काव्यम्' इति यद्युच्येत, तत्र इदं प्रष्टव्यं किमिदं काव्यपदप्रवृत्तिनिमित्तं काव्यत्वं शब्दार्थयोः व्यासज्यवृत्ति (सम्मिल्य वर्तते) प्रत्येकपर्याप्तं वा ? यदि काव्यत्वं व्यासज्यवृत्ति इत्युच्येत तर्हि एकस्मिन् उभयभेदस्य 'एको न द्वौ' इति व्यवहारात् प्रसिद्धत्वेन श्लोकवाक्यस्य शब्दात्मकत्वेन, काव्यपदार्थस्य च शब्दार्थयुगलात्मकत्वेन 'श्लोकवाक्यं न काव्यम्' इति व्यवहारापत्तिः । न द्वितीयः। एकस्मिन् काव्ये शब्दमादाय एकं काव्यम्, अर्थमादाय अपरं काव्यमिति काव्यद्वयव्यवहारापत्तेः। न च आस्वादोब्दोधकत्वस्य रसोब्दोधकत्वस्य वा शब्दार्थोभयनिष्ठत्वेन द्वयोरपि काव्यत्वं प्रतिपाद्यतामिति वाच्यम्। तथा सति रसव्यञ्जके रागे, रसाभिव्यञ्जकेषु नाट्याङ्गेषु च काव्यलक्षणस्य अतिव्याप्त्यापत्तेः। किं बहुना ? नाट्याङ्गेषु सर्वेष्वेव अतिव्याप्त्यापत्तेः ।

तस्मात् काव्यपदस्य शब्दार्थयुगलशक्तिग्राहकप्रमाणाभावात्, प्रत्युत उभयत्र शक्तिग्रहे बाधकदर्शनाच्च काव्यपदस्य शब्दविशेष एव शक्तिः। एवञ्च 'प्रभुसम्मितार्थप्रतिपादकः शब्दो वेदः' 'सुहृत्सम्मितार्थप्रतिपादकः शब्दः पुराणम्' इति शब्दपरतया वेदपुराणयोः लक्षणं यथा प्रतिपाद्यते, एवं रमणीयार्थप्रतिपादकः शब्दः एव काव्यमिति शब्दपरतयैव काव्यलक्षणं वक्तव्यम्।

**स्वावलोकनप्रश्नाः**

१. व्यासज्यवृत्तिः नाम किम् ?

२. प्राचीनकाव्यलक्षणं किम् ?

३. **श्लोकवाक्यं काव्यम्** इति कस्य लक्षणस्य स्वीकारेण न सम्भवति ?

४. प्रत्येकपर्याप्तं नाम किम् ?

५. **प्रत्येकपर्याप्तम्** इति स्वाकारे को दोषः ?

६. **आस्वादोद्बोधकत्वम् उभयत्र समानम्** इति स्वीकारे कुत्र अतिव्याप्तिः ?

७. वेद-पुराणयोः लक्षणे के ?

## I. 2. iii. विशेषणदलखण्डनम्

**१.** काव्यलक्षणे सगुणौ सालङ्कारौ इत्युपादानञ्च न सङ्गच्छते। 'उदितं मण्डलं विधोः' इति वक्तृबोध्दव्यानुसारेण विविधव्यङ्ग्यविशेषविस्फोरके ध्वनिकाव्ये, अभिसारिकां प्रत्युक्तादेतद्वाक्यात् 'अभिसरणं मास्तु' इति, विरहिण्युक्तादेतत् वाक्यात् 'इतः परं नाहं जीवामि' इत्याद्यर्थविस्फुरणे सत्यपि कस्यचित् गुणस्य अलङ्कारस्य वा अभावेन काव्यलक्षणस्य अव्याप्तिः । एवम् 'गतोऽस्तमर्कः' इत्यादौ च सत्यपि व्यिङ्ग्यवैभवे, कस्यचित् गुणस्य अलङ्कारस्य वा अभावेन अव्याप्त्यापत्तिः ।

**२.** किञ्च शरीरसामान्यलक्षणे दुर्बलदरिद्रादिशरीरं दृष्टौ निक्षिप्य धैर्यादिगुणानां कटककुण्डलाद्यलङ्काराणां वा यथा अनुपादानम्, किन्तु केवलम् 'करचरणाद्यवयवसङ्घातात्मको देहः' इति शरीरसामान्यलक्षणं प्रतिपाद्यते, एवमेव काव्यलक्षणेऽपि गुणालङ्कारौ परित्यज्यैव किमपि काव्यलक्षणं वक्तव्यम्, न तु गुणालङ्कारौ स्वीकृत्य। अतः 'सगुणौ सालङ्कारौ' इत्यनुपादेयमेव।

**३.** किञ्च प्राचीनभावनानुसारेण गुणालङ्कारयोः काव्ये आवश्यकत्वेऽपि गुणालङ्कारसम्पाद्यः कार्यविशेष एव लक्षणे निवेशनीयः। अन्यथा गुणालङ्कारयोः लक्षणपरिज्ञानपर्यन्तं काव्यलक्षणं दुर्ग्रहं भविष्यति। गुणालङ्कारयोः अनुगतः धर्मोऽपि प्राचीनैः काव्यलक्षणे न निर्दिष्टः। अस्माभिस्तु 'रमणीयार्थप्रतिपादकः शब्दः काव्यम्' इति सर्वकाव्यानुगतचमत्कारस्पर्शि रमणीयपदं काव्यलक्षणे निर्दिष्टम्। अतश्च न अननुगमादपि न सगुणौ सालङ्काराविति निवेशनीयम्।

४. एवम् 'अदोषौ' इत्यस्य काव्यलक्षणे निवेशे दोषरहितशब्दार्थयोरेव काव्यपदार्थतया दोषरहितौ शब्दार्थौ दुष्टमिति व्याहतार्थप्रतिपादकत्ववारणाय 'दुष्टं काव्यम्' इति व्यवहारस्य वृथा लाक्षणिकत्वं स्वीकार्यम्। बहूनामेव 'न्यक्कारो ह्ययमेव मे' इत्यादिकाव्यरत्नानाम् अविमृष्टविधेयांशादिदोषदूषितत्वेन अकाव्यत्वापत्तिः। तथा हि अविमृष्टविधीयांशो नाम— 'उद्देश्यवचनं पूर्वं विधेयवचनं ततः' इति प्रसिद्धोद्देश्यविधेयक्रमत्यागेन विधेयांशोपादानम्। प्रकृते च उद्देश्यस्य 'यदरयः' इति पश्चादुपादानात्, विधेयस्य न्यक्कारस्य च पूर्वमुपादानात् विधेयाविमर्शः। किञ्च 'वृक्षे कपिसंयोगस्येव' काव्ये दोषस्य अव्याप्यवृत्तितया स्वीकारे 'अग्रे वृक्षः कपिसंयोगी मूले न' इति प्रतीतिवत् 'इदं पद्यं पूर्वार्धे काव्यम्, उत्तरार्धे तु न काव्यम्' इति प्रतीत्यापत्तिः। अतः काव्यलक्षणे 'अदोषौ' इति दलनिवेशोऽपि असङ्गत एव।

**स्वावलोकनप्रश्नाः**

१. **प्राचीनकाव्यलक्षणस्वीकारे गतोऽस्तमर्कः** इत्यत्र कथमव्याप्तिः ?

२. **सगुणौ सालङ्कारौ** इति दले काव्यलक्षणे कुतः न प्रदेये ?

३. गुणालङ्कारयोः काव्यलक्षणे निवेशने को दोषः ?

४. दोषपदं लक्षणे निवेशने को दोषः ?

## I. 2. iv. सङ्क्षेपतः दर्पणकारलक्षणखण्डनम्

यत्तु 'रसवदेव काव्यम्' इति दर्पणकारेणोक्तम् तत् न, वस्त्वलङ्कारप्रधानानां बहूनां काव्यानां अकाव्यत्वापत्तेः। तत्र रसवत्त्वस्य अभावात्। न च अर्थमात्रस्य विभावत्वेन तत्रापि यथा कथञ्चित् विश्वनाथकविराजोक्तकाव्यलक्षणार्थस्वीकारात् रसस्पर्शः साध्यत इति वाच्यम्। ईदृशरसस्पर्शस्य 'गौश्चलति' 'मृगो धावति' इत्यादावपि सत्त्वेन तत्रापि काव्यलक्षणस्य अतिप्रसङ्गात्। अर्थमात्रस्य विभावानुभाव व्यभिचार्यन्यतमत्वात्। तस्मात् प्राचीनोक्तकाव्यस्य चमत्कारवैशिष्ट्यमास्थाय शब्दप्राधान्येन 'रमणीयार्थप्रतिपादकश्शब्दः काव्यम्' इति विनूत्नं निर्दुष्टं काव्यलक्षणं पण्डितराजेन आविष्कृतम्।

**स्वावलोकनप्रश्नाः**

१. **रसवदेव काव्यम्** इति लक्षणं कस्य ?

२. **गौश्चलति** इत्यत्र कीदृशं रसत्वम् ?

# I. 3. दर्पणकारोक्तकाव्यलक्षणस्य खण्डनम्

विश्वनाथकविराजेन स्वीये साहित्यदर्पणे 'वाक्यं रसात्मकं काव्यम्' इति काव्यलक्षणं प्रोक्तम्। रसाभिव्यञ्जकसामग्रीघटितं वाक्यं काव्यम् —इति तदीयलक्षणार्थः। रसस्य सहृदयनिष्ठत्वेन काव्यनिष्ठत्वाभावात्। अत्र च रसपदस्य न केवलं शृङ्गारादिनवविधः रसः अर्थः अपि तु— 'रसनाद्रसत्वमेतेषां मधुरादीनामिवोक्तमाचार्यैः' इत्यादिरुद्रटोक्तदिशा आस्वाद्यमानः रसभावतदाभासादिः अष्टविध एव असंलक्ष्यक्रमः अर्थः। एतच्च दर्पणे विवृतम्। एतदभिप्रायेणैव पण्डितराजोऽपि 'रसवदेव काव्यम्' इति तदीयं सारमुद्धृतवान्।

वस्तुतः इदं लक्षणम् असमञ्जसमिति पण्डितराजस्याभिप्रायः । यतो हि रसवतः काव्यत्वे रसादिप्रधानेषु काव्येषु लक्षणसमन्वयेऽपि वस्त्वलङ्कारप्रधानानां बहूनां काव्यानाम् अकाव्यत्वापत्तिः। न च इष्टापत्तिरिति वाच्यम्। सर्वस्यैव महाकविसम्प्रदायस्य आकुलीभावप्रसङ्गात् ।

यत्र च जलप्रवाहवेगस्य निपतनम्, उत्पतनम्, भ्रमणं वा वर्ण्यते अथवा निसर्गसुन्दराणि कपिबालादिचेष्टतानि वर्ण्यन्ते, यथा— **'आस्फोटयामास चुचुम्ब पुच्छं ननन्द चिक्रीड जगौ जगाम'** इत्यादौ मण्डोदरीं सीतात्वेन भ्राम्यतः दिव्यकपेः हनुमतः चेष्टावर्णनपरे रामायणपद्ये 'बालः पायसदग्धः दध्यपि फूत्कृत्य भक्षयति' इति बालचेष्टावर्णनपरे पद्ये च रसवत्त्वस्य अभावेन काव्यत्वं न स्यात्। न च अर्थमात्रस्य रसं प्रति विभावत्वेन, अनुभावत्वेन अथवा व्यभिचारित्वेन यथा कथञ्चित् पूर्वोक्तस्थलेऽपि रसस्पर्शः अस्त्येवेति वाच्यम्। ईदृशरसस्पर्शस्य 'गौश्चलति' 'मृगो धावति' इत्यादौ अपि सत्त्वेन अतिव्याप्त्यापत्तेः ।

अतश्च वस्त्वलङ्कारप्रधानेषु अव्याप्तेः, रसवदेव काव्यमिति दर्पणकारस्य निर्णयः न समुचित इति पण्डितराजस्य आशयः। अन्यच्च सर्वत्र रसध्वनेरेव कृतास्पदत्वे भावध्वनिविलोप-प्रसङ्गाच्च 'रसवदेव काव्यम्' इति न सुन्दरमिति दिक्।

**स्वावलोकनप्रश्नाः**

१. विश्वनाथस्य काव्यलक्षणं किम् ?

२. **वाक्यं रसात्मकं काव्यम्** इत्यस्य कः अभिप्रायः ?

३. **रसवत्त्वं काव्यस्य लक्षणम्** इति स्वीकारे को दोषः ?

# I. 4. काव्यकारणविचारः

## I. 4. i. प्रतिभैव काव्यकारणम्

मम्मटादयः प्राचीना आलङ्कारिकाः शक्ति-निपुणता(व्युत्पत्ति)-अभ्यासानां त्रयाणां दण्डचक्रादिन्यायेन समुच्चित्य काव्यं प्रति कारणत्वम् ऊचुः। पण्डितराजस्तु काव्यं प्रति प्रतिभा एकैव कारणम् इति प्रतिभां प्रति तु क्वचित् देवतामहापुरुषप्रसादादिजन्यमदृष्टम्, क्वचित् च विलक्षणव्युत्पत्तिकाव्यकरणाभ्यासौ कारणम् इति च अभिप्रैति। एवं च वह्नेः उत्पत्तिः क्वचित् तृणफूत्कारसंयोगेन क्वचिदरणिमथनसंयोगेन, क्वचित् च सूर्यकान्तमणिसूर्यकिरणसंयोगेनेति वह्निकारणता तृणारणिमणिन्यायेन यथा वैकल्पिकरूपेण इष्टा, एवं पण्डितराजमते क्वचिददृष्टे, क्वचित् विलक्षणव्युत्पत्ति-अभ्यासयोः प्रतिभाकारणता इति, वैकल्पिकरूपेण कारणता दृष्टा। काव्यं प्रति प्रतिभायास्तु एकस्या एव कारणत्वम्, न ममटोक्तरीत्या शक्ति-व्युत्पत्ति-अभ्यासानां त्रयाणां कारणत्वमिति पण्डितरजस्य परमसिद्धान्तः।

एषा च प्रतिभा किमात्मिका इत्युक्ते अभिनवगुप्तेन 'अपूर्ववस्तुनिर्माणक्षमा प्रज्ञा' इति प्रतिभायाः स्वरूपं लोचने निरुक्तम्। नवनवोन्मेषशालिनीं प्रज्ञामेव च प्रतिभात्वेन केचित् ऊचिरे। वस्तुतः पण्डितराजमते का नाम प्रतिभा इत्युक्ते शिल्पादिकारणप्रतिभाभिन्नं काव्यघटनानुकूलत्वेन विद्यमानं स्मरणात्मकं ज्ञानम्। स्मृतौ भासमानानां पदार्थानां नव्यत्वायोगात्, काव्यघटनानुकूलतया जायमानः शब्दार्थयोः विलक्षणः अनुभव एव स्मृतिः ।

**स्वावलोकनप्रश्नाः**

१. **काव्यस्य त्रयं कारणम्** इति का वदति ?

२. **तृणारणिमणि**न्यायः कः ?

३. पण्डितराजानुसारं काव्यकारणं किम् ?

४. प्रतिभायाः विभिन्नकारणद्वयं किम् ?

५. प्रतिभा नाम का ?

## I. 4. ii. किं नाम प्रतिभात्वम् ?

किं नाम प्रतिभात्वम्– इत्युक्ते काव्यकारणतावच्छेदकतया सिद्धः जातिविशेषः उपाधिरूपं वा खण्डनम् इति पण्डितराजस्य संक्षिप्तं समाधानम्। अयमभिप्रायः। स्वानुकूलकृतिमत्तासम्बन्धेन आत्मनि जायमानं काव्यं प्रति समवायेन प्रतिभा कारणम्। तथा च 'स्व (काव्य) अनुकूलकृतिमत्ता-सम्बन्धावच्छिन्नकाव्यत्वावच्छिन्न-कारणतानिरूपिता समवायसम्बन्धावच्छिन्ना कारणता किञ्चित् धर्मावच्छिन्ना कारणतात्वात् घटनिरूपितदण्डनिष्ठकारणतावत्' इत्यनुमानेन प्रतिभानिष्ठकारणताव-च्छेदकतया कश्चित् धर्मः सिद्ध्यति । स एव प्रतिभात्वशब्देन व्यपदिश्यते। लाघवाच्च प्रतिभात्वं जातिविशेषः इत्येकं मतम्।

काव्यघटनानुकूला प्रतिभा शिल्पादिघटनानुकूलप्रतिभायाः विलक्षणैव । तद्गतप्रतिभात्वञ्च काव्यघटनानुकूलाव्यवहितशब्दार्थ-उपस्थितित्वरूपमिति तस्य च गुरुधर्मत्वेन अवच्छेदकत्वायोगात् न जातित्वमिति 'प्रतिभात्वं किं रूपम्' इति पुनः प्रश्ने समुत्पन्ने **'उपाधिरूपं वा खण्डम्'** इति पण्डितराजस्य समाधानम्। तत्र प्रतिभात्वस्य काव्यघटनानुकूलाव्यवहितशब्दार्थोपस्थितिरूपत्वेन निर्वचनार्हतया निर्वचनानर्हत्वायोगात् अखण्डोपाधित्वं न सम्भवति, किन्तु प्रतिभात्वं नीलघटत्वादिवत् सखण्डोपाधिरेव। सखण्डोपाधिस्तु निर्वचनार्हः जातिभिन्नः कश्चित् पदार्थः ।

एवञ्च प्रतिभात्वं सखण्डोपाधिरूपम् । तत्त्वदार्शनिकास्त्वत्र प्रतिभां सर्वोपादानभूतां संविदमेवाचक्षते। एवं चैतन्मते वस्तुतः प्रति भात्वमखण्डोपाधिः । काव्यघटनानुकूलशब्दार्थौ तु प्रतिभायाः उपाधी ।

**स्वावलोकनप्रश्नाः**

१. **प्रतिभा उपाधिरूपा** कथम् ?

२. **प्रतिभा जातिविशेषः** इति कथने किं प्रयोजनम् ?

३. **प्रतिभा खण्डम्** इति कथम् ?

४. **प्रतिभा अखण्डम्** इति कथम् ?

## I. 4. iii. अदृष्टव्युत्पत्त्यभ्यासानां समुच्चित्य कारणतावादखण्डनम्

हेमचन्द्रादयः केचिदालङ्कारिकाः 'सापि द्विविधा– प्रतिभा-व्युत्पत्तिभ्यासाभ्यां संस्कार्या' इति कथयन्तः मन्त्रादिजन्य-औपाधिकप्रतिभायां विलक्षणव्युत्पत्तिभ्यासजन्यप्रतिभायाञ्च व्युत्पत्त्यभ्यासयोः कारणत्वमाहुः। एवञ्च एतन्मतानुसारेण प्रतिभां प्रति अदृष्टव्युत्पत्त्यभ्यासानां त्रयाणामपि समुच्चित्य प्रतिभाकारणत्वं पर्यवस्यति। परं पण्डितराजः मतमिदं न सहते। यतो हि कार्यकारणभावनिश्चयः अन्वयव्यतिरेकप्रमाणाभ्यां जायते। तथा हि– 'तत्सत्त्वे तत्सत्त्वम् अन्वयः'। 'तदभावे तदभावः व्यतिरेकः'। यथा दण्डसत्त्वे घटसत्त्वम् अन्वयः। दण्डाभावे घटाभावः व्यतिरेकः ।

एवं कारणताग्रहप्रतिबन्धकौ निश्चयात्मना ज्ञाते अन्वयव्यभिचारः व्यतिरेकव्यभिचारश्च। तत्र कारणसत्त्वेऽपि कार्यानुत्पत्तिः अन्वयव्यभिचारः। कारणाभावेऽपि कार्योत्पत्तिः व्यतिरेकव्यभिचारः। अनयोः अन्वयव्यतिरेकव्यभिचारयोः निश्चयस्य सद्भावे कारणत्वज्ञानं प्रतिबध्यते इति तु दृढं वचनम्। प्रकृते प्रतिभां प्रति किम् अदृष्टं व्युत्पत्त्यभ्यासौ च सम्मिल्य कारणम् ? आहोस्वित् वैकल्पिकरूपेण ते द्वे अपि कारणतां भजतः इति शङ्कायां सञ्जातायां वैकल्पिकरूपेणैव प्रतिभायाः कारणत्वमिति पण्डितराजस्य निश्चयः।

यतो हि क्वचित् देवतामहापुरुषप्रसादादिजन्यमदृष्टं प्रतिभां प्रति कारणम्, क्वचिच्च विलक्षणव्युत्पत्तिकाव्यकारणाभ्यासौ। तथा हि बालस्य कालिदासादेः महाकवेर्वा कालीवर-प्रसादलब्धादृष्टद्वारकप्रतिभस्य कारणत्वेनाभिमतयोः व्युत्पत्त्यभ्यासयोः अभावेऽपि प्रतिभारूप-कार्योत्पत्त्या कारणाभावेऽपि कार्योत्पत्तिलक्षणः व्यतिरेकव्यभिचारः।

एवं कियन्तं चित् कालं काव्यं कर्तुमशक्नुवतः कथमपि सञ्जातयोः व्युत्पत्ति-अभ्यासयोः प्रतिभायाः उदयस्थले कारणत्वेनाभिमतादृष्टस्य अभावेऽपि कार्यप्रतिभायाः उत्पत्तेः कारणाभावेऽपि कार्योत्पत्तिः लक्षणः व्यतिरेकव्यभिचारः । न च बालादिस्थले एतज्जन्मसम्बन्धिव्युत्पत्त्यभ्यासयोः अभावेऽपि जन्मान्तरीययोः व्युत्पत्त्यभ्यासयोः कल्पनेन अदृष्टव्युत्पत्त्यभ्यासानां त्रयाणां समुच्चित्य कारणत्वम् इति वाच्यम्।

लोके हि पश्वादिसम्पदं प्रति उद्भिद्चित्रादियागस्य **'उद्भिदा यजेत पशुकामः'** **'चित्रया यजेत पशुकामः'** इत्याद्यागमेन= वेदेन बलवता प्रमाणेन कार्यकारणभावनिर्णये, सति वेदेन यागपशुसम्पदोः कार्यकारणभावस्य निश्चितत्वात्, तत्र प्रसक्तव्यभिचारवारणाय जन्मान्तरीयधर्मादिकस्य कारणत्व-

कल्पनं युक्तम् । यत्र तु प्रबलप्रमाणेन कार्यकारणभावः न गृहीतः, तत्र पूर्वं जाते कारणतानिर्णये भ्रमत्वप्रतिपत्तिरेव जायते।

तस्मात् जन्मान्तरपदार्थकल्पनस्य सर्वत्रायौक्तिकत्वात्, बालादिस्थले व्युत्पत्ति-अभ्यासयोः असम्भवात् तत्रत्यप्रतिभां प्रति अदृष्टस्यैव कारणत्वकल्पनं समञ्जसम्। न च यत्र क्रमेण सम्पादिताभ्यां व्युत्पत्त्यभ्यासाभ्यां प्रतिभा जायते तत्रापि अदृष्टादेव प्रतिभा उत्पद्यत इति, त्रितयकारणतावादः युक्त एवेति वाच्यम् । व्युत्पत्त्यभ्यासाभ्यां प्रतिभायाः सम्पादनस्थलेऽपि यदि अदृष्टस्यैव कारणत्वं स्वीक्रियेत, तर्हि विलक्षण-व्युत्पत्त्यभ्यासयोः उत्पत्तेः प्रागपि प्रतिभायाः उत्पत्तिप्रसङ्गात् । न च व्युत्पत्त्यभ्यासाभ्यां प्राक् केवलादृष्टात् प्रतिभोत्पत्तौ प्रतिबन्धकमदृष्टान्तरं कल्प्यत इति वाच्यम्। एवमदृष्टद्वयस्य कल्पनापेक्षया क्लृप्तयोः विलक्षणव्युत्पत्त्यभ्यासयोः एव कारणत्वकल्पने लाघवात्, प्रतिभां प्रति क्वचिददृष्टम्, क्वचित् विलक्षणव्युत्पत्त्यभ्यासौ कारणमिति प्रागुक्तसरणिरेव गरीयसी।

ननु क्वचित् सतोऽपि व्युत्पत्त्यभ्यासयोः यत्र प्रतिभा नोदेति, तत्र कारणसत्त्वेऽपि कार्यानुत्पत्तिलक्षणान्वयव्यभिचारनिश्चयस्य प्रतिबन्धकतया सद्भावात्, विलक्षणव्युत्पत्त्यभ्यासयोः प्रतिभां प्रति कारणत्वनिश्चयः कथम् ? इति चेत्– उच्यते। न हि वयं प्रतिभां प्रति व्युत्पत्त्यभ्यासावेव क्वचित् कारणमिति ब्रूमः। अपि तु विलक्षणव्युत्पत्त्यभ्यासौ। एवञ्च यत्र सतोरपि व्युत्पत्त्यभ्यासयोः प्रतिभा नोदिता, तत्र व्युत्पत्त्यभ्यासयोः वैलक्षण्ये प्रमाणाभावेन कारणाभावादेव कार्यानुत्पत्त्या नान्वयव्यभिचारः इत्येकं पण्डितराजस्य समाधानम्।

अथवा पापविशेषस्य प्रतिबन्धकत्वकल्पनात् कार्यसामान्यं प्रति सर्वत्रप्रतिबन्धकसंसर्गाभावस्य कारणतया अत्र पापविशेषरूपप्रतिबन्धकस्य सद्भावात् न प्रतिभोत्पत्तिः। एषा च कल्पना शक्त्यादित्रितयकारणतावादिमते अथवा यस्य कस्यापि मते अवश्यमपेक्ष्यत एव। कथमन्यथा प्रतिवादिना कतिपयदिवसव्यापिनि वाक्स्तम्भे मन्त्रादिभिः कृते विहितानेकप्रबन्धस्य कवेः काव्यानुदयदर्शनम्। तस्मात् कारणताग्रहप्रतिबन्धकान्वयव्यभिचार-निश्चयाभावात् नात्र वैकल्पिकरूपेण कारणत्वपक्षे कश्चित् प्रतिबन्धः।

ननु पण्डितराजमते काव्यं प्रति प्रतिभा कारणम्, प्रतिभां प्रति क्वचिददृष्टम्, क्वचित् व्युत्पत्त्यभ्यासौ कारणमिति निर्णीयते। परमिदं न युक्तम्। यतो हि प्रतिभाकारणद्वयेन जायते। तत्र क्वचित् कारणत्वेन अभिमतस्य अदृष्टस्य अभावेऽपि व्युत्पत्त्यभ्यासाभ्याम्, क्वचिच्च कारणत्वेन अभिमतयोः व्युत्पत्त्यभ्यासयोः अभावेऽपि अदृष्टादेव प्रतिभोत्पत्तेः व्यतिरेकव्यभिचारः ।

एवमेव अदृष्टजन्यप्रतिभाजन्यकाव्यस्य, व्युत्त्यभ्यासजन्य-प्रतिभायाः अभावेऽपि उत्पत्त्या, तथा व्युत्पत्त्यभ्यासजन्यप्रतिभाजन्यकाव्यस्य, अदृष्टजन्यप्रतिभायाः अभावेऽपि उत्पत्त्या कारणाभावेऽपि कार्योत्पत्तिलक्षण व्यतिरेकव्यभिचार इति वाच्यम्। कार्यतावच्छेदककुक्षौ कारणाव्यवहितोत्तरत्व-लक्षणवैलक्षण्यनिवेशेन प्रथमदोषस्य, द्वितीयदोषस्य च वारणात्।

तत्प्रकारश्चेत्थम् अदृष्टव्यवहितप्रतिभां प्रति अदृष्टं कारणम्, व्युत्पत्त्यभ्यसाव्यवहितोत्तर-प्रतिभां प्रति व्युत्पत्त्यभ्यासौ कारणम् । एवमदृष्टाव्यवहितोत्तरप्रतिभाजन्यं काव्यं प्रति अदृष्टाव्य-वहितोत्तरप्रतिभा कारणम्। व्युत्पत्त्यभ्यासाव्यवहितोत्तरप्रतिभां प्रति व्युत्पत्त्यभ्यासौ कारणम् इति कार्यतावच्छेदके कारणतावच्छेदके च कारणाव्यवहितोत्तरत्वं निवेशनीयम् । एवञ्च परस्परविरह-प्रयुक्तव्यतिरेकव्यभिचारवारणं भवति।

**स्वावलोकनप्रश्नाः**

१. अन्वयो नाम कः ?

२. व्यतिरेको नाम कः ?

३. हेमचन्द्रादयः काव्यकारणीभूतप्रतिभायाः कारणं किं वदन्ति ?

४. पण्डितराजः किमर्थं प्रतिभां प्रति विभिन्नकारणद्वयं स्वीकृतवान् ?

५. व्युत्पत्ति-अभ्यासयोः जन्मान्तरीययोः कल्पने को दोषः ?

६. कथम् अदृष्टजन्य-व्युत्पत्त्यभ्यासजन्ययोः पार्थक्यं क्रियते ?

# I. 5. पाठ्यांशेऽस्मिन् सम्भाविताः प्रश्नाः

**विंशत्यङ्कप्रश्नाः**

1. पण्डितराजोक्तं काव्यलक्षणं सदलकृत्यं परिष्कुरुत ?
2. प्राचीनोक्तकाव्यलक्षणानि पण्डितराजोक्तदिशा दूषयत ?
3. **प्रतिभैव काव्यकारणम्** इति पण्डितराजोक्तं वादं सोपपत्तिकं समर्थयत ?

**दशाङ्कप्रश्नाः**

1. काव्यलक्षणे **शब्दार्थौ** विशेष्यदलं पण्डितराजोक्तदिशा दूषयत ?
2. प्राचीनकाव्यलक्षणे विशेषणदलत्रयं पण्डितराजोक्तदिशा दूषयत ?
3. दर्पणकारकाव्यलक्षणं पण्डितराजोक्तदिशा विमृशत ?
4. अदृष्टव्युत्पत्त्यभ्यासानां समुच्चित्य कारणतावादं दूषयत ?

**पञ्चाङ्कप्रश्नाः**

1. रमणीयतालोकोत्तरत्वपरिष्कारयोः बीजनिरूपणम्
2. सङ्ग्रहेण दर्पणकारलक्षणखण्डनम्
3. किन्नाम प्रतिभात्वम् ?

# II. काव्यविभागमीमांसा

भागेऽस्मिन्—

1. सोदाहरणं पण्डितराजस्य काव्यभेदाः
2. **शयिता सविधे...** इत्यादिपद्ये रसध्वनित्वनिरूपणम्
3. **निश्शेष...** इत्यादिपद्यविचारः
4. चित्रान्यत्वदलखण्डनम् - प्रहरविरातावित्यादिदीक्षितोक्तगुणीभूतव्यङ्ग्यविचारश्च
5. ध्वनिप्रभेदपञ्चकम् —इत्येते विषया निरूपयिष्यन्ते।

एते च विषयाः छात्रैरत्रावधेयाः।

## II. 1. सोदाहरणं पण्डितराजस्य काव्यभेदाः-तत्सामञ्जस्यञ्च

मम्मटादयः प्राचीनालङ्कारिकाः व्यङ्ग्यार्थस्थितिं पुरस्कृत्य काव्यम् उत्तम-मध्यम-अधमभेदेन त्रिधा व्यभजन्। पण्डितराजस्तु चमत्कारस्थितिं पुरस्कृत्य उत्तमोत्तम-उत्तम-मध्यम-अधमभेदेन चतुर्धा व्यभजत्।

### II. 1. i. उत्तमोत्तमकाव्यलक्षणम्

'शब्दार्थौ यत्र गुणीभावितात्मनौ कमप्यर्थम् अभिव्यङ्क्तः तदाद्यम्' इति उत्तमोत्तमकाव्य-लक्षणम्। अत्र 'कमपि' इत्यस्य चमत्कृतभूमिम् इत्यर्थः। एवञ्च लोकोत्तरचमत्कार्यर्थान्तरप्रतिपादक-गुणीभावितस्वरूपकशब्दार्थाश्रयः काव्यम् उत्तमोत्तमं काव्यम् इति फलति।

**शयिता सविधेऽप्यनीश्वरा सफलीकर्तुमहो मनोरथान् ।**
**दयिता दयिताननाम्बुजं दरमीलन्नयना निरीक्षते ।।**

अत्र नायकालम्बनः सविधशयनाक्षिप्तरहस्स्थानाद्युद्दीपितः निरीक्षणादिना अनुभावितः त्रपौत्सुक्यादिना व्यभिचारिणा परिपुष्टः रत्याख्यः स्थायी व्यज्यते। स च लोकोत्तरचमत्कारकारी। तदपेक्षया च शब्दार्थौ गुणीभूतौ। अतः अत्र उत्तमोत्तमकाव्यस्य लक्षणसमन्वयः। इदिञ्च संयोगशृङ्गारध्वनेः उदाहरणम्।

**गुरुमध्यगता मया नताङ्गी निहता नीरजकोरकेण मन्दम् ।**
**दरकुण्डलताण्डवं नतभ्रूलतिकं मामवलोक्य घूर्णितासीत् ।।**

इति पद्ये, तदुदाहृते द्वितीये पादे तु 'मामवलोक्य घूर्णितासीत्' इति कथनेन 'आः असमीक्ष्यकारिन्', 'किमिदमनुचितं कृतवानसि' –इत्यर्थसंवलितः अमर्षाख्यः भावः व्यज्यते। शब्दः अर्थश्च तत्र गुणः। अतः अत्र भावध्वनिः ।

**तल्पगतापि च सुतनुः श्वासासङ्गं न या सेहे।**
**सम्प्रति सा हृदयगतं प्रियपाणिं मन्दमाक्षिपति।।**

इत्यादिपद्ये द्वितीयपादे तु 'सम्प्रति' इत्यस्य प्रस्थानपूर्वरजन्यामितिव्याख्यासापेक्षतया रत्याख्यः स्थायी संलक्ष्यक्रमतया भासते। अत्र 'सम्प्रति हृदयगतं प्रियपाणिम्' –इत्यनेन व्यक्तः प्रवत्स्यत्पतिः आलम्बनम्। नायिका च आश्रयः। शनैः प्रियपाणेः स्वस्थानप्रक्षेपणात्मना अनुभावेन मन्दाक्षेपेण नायिकानिष्ठः रत्याख्यः भावः संलक्ष्यक्रमतया व्यज्यते।

### (अ) दलसार्थक्यम्

उत्तमोत्तमकाव्यलक्षणे 'कमपि' इति निवेशात् अतिगूढस्फुटव्यङ्ग्ययोः निरासः। कामिनीकुचकलशवत् नातिगूढस्य नातिस्फुटस्यैव व्यङ्ग्यस्य चमत्कारित्वात्, अतिगूढव्यङ्ग्ये व्यङ्ग्यस्य गूढत्वेन, स्फुटव्यङ्ग्ये च व्यङ्ग्यस्य स्फुटत्वेन चमत्काराभावाच्च न उत्तमोत्तमत्वम्। अपराङ्गवाच्यसिद्ध्यङ्गव्यङ्ग्ययोरपि चमत्कारिणः अर्थस्य स्फूर्तेः तद्वारणाय गुणीभावितात्मना-वित्युक्तम्। अपराङ्गे व्यङ्ग्यस्य अप्राकरणिकत्वेन अप्रधानत्वात्, वाच्यसिध्यङ्गे च वाच्यसिध्यङ्गतया गुणीभावात् शब्दार्थयोः अगुणत्वात् नातिव्याप्तिः। इदमेव उत्तमं काव्यमिति प्राचीनानां सङ्केतः ।

**स्वावलोकनप्रश्नाः**

१. प्राचीनानां काव्यविभाजनं किमाधारीकृत्य कृतम् ?

२. जगन्नाथस्य काव्यविभाजनं किमाधारितम् ?

३. उत्तमोत्तमकाव्यलक्षणं किम् ?

४. उत्तमोत्तमकाव्यलक्षणे **कमपि** इत्यस्य कः अर्थः ?

५. **शयिता सविधे** इति पद्यस्य **प्रियमध्यगता** इत्यस्य च को भेदः ?

६. **शयिता सविधे** इत्यस्य **तल्पगताऽपि** च इत्यनयोश्च को भेदः ?

७. कीदृशस्य व्यङ्ग्यस्य चमत्कारिता ?

८. **कमपि** इति पदद्वयेन कस्य निरासः ?

## II. 1. ii. उत्तमकाव्यलक्षणम्

**'यत्र व्यङ्ग्यं अप्रधानमेव सत् चमत्कारकारणं तद्द्वितीयम्'** इति पण्डितराजोक्तं द्वितीयकाव्यलक्षणम्। यत्र व्यङ्ग्यम् अप्रधान्यम् अनुभवदेव चमत्कारकारणं भवति तत् द्वितीयं काव्यमित्यर्थः। अत्र च लक्षणे एवकारनिवेशात् कस्यचित् ध्वनिकाव्यस्य व्यावृत्तिः। यत्र च कश्चित् व्यङ्ग्यार्थः वाच्यापेक्षया प्रधानीभूतः, व्यङ्ग्यान्तरमादाय गुणीभूतश्च भवति, तत्र व्यङ्ग्ये प्राधान्यस्य वाच्यापेक्षया सत्त्वात् ध्वनित्वमेव, न तु तत्र गुणीभूतव्यङ्ग्यत्वशङ्का काचित् कार्या। लीनव्यङ्ग्यस्य वाच्यचित्रस्य वारणाय लक्षणे चमत्कारकारणं इति दलम् उपात्तम्।

**'राघवविरहज्वालासन्तापितसह्यशैलशिखरेषु।**
**शिशिरे सुखं शयानाः कपयः कुप्यन्ति पवनतनयाय'।। पृ.२०**

अत्र 'जानकीकुशलवेदनेन राघवः शिशिरीकृतः इति व्यङ्ग्यम् आकस्मिककविकर्तृकहनुमद्विषयक-कोपोपपादकतया गुणीभूतमपि दुर्दैववशतो दास्यमनुभवद्राजकलत्रमिव कामपि कामनीयकतामावहति। अत्र व्यङ्ग्यस्य वाच्यं प्रति गुणीभूतत्वं कथमिति चेत् इत्थम् । अत्र च कपिकोपः वाच्यः ।

इत्थं कपिकोपश्च किं हेतुकः ? इत्यक्ते— व्यङ्ग्यराघवशिशिरीकरणहेतुकः इति सामान्यतः समाधानम् । तच्च किं हेतुकमित्युक्ते— व्यङ्ग्यजानकीकुशलावेदनहेतुकम्। तस्य कोपस्य च कस्सम्बन्धः ? इत्युक्ते राघवशिशिरीकरणेन सह्यशैलशिखराणि शिशिरीकृतानि, तेन शैलशिखरेषु ऊष्मणो भङ्गः, तेन च कपीनां निद्राभङ्गः, ततः कोपः, इति व्यङ्ग्यस्य राघवशिशिरीकरणस्य परम्परया कपिकोपोपपादकत्वात् गुणीभूतव्यङ्ग्यत्वम्। इदमेव गुणीभूतव्यङ्ग्यम् इति प्राचीनैः परिभाषितम्।

**स्वावलोकनप्रश्नाः**

१. अत्र उत्तमकाव्यं मम्मटरीत्या किं भवति ?

२. जगन्नाथस्य उत्तमकाव्यलक्षणं किम् ?

३. अत्र लक्षणे एवकारविनिवेशात् कस्य निवृत्तिः ?

४. यत्र काव्ये वाच्यापेक्षया व्यङ्ग्यस्य प्राधान्यम्, व्यङ्ग्यन्तरापेक्षया अप्रधानं तत्र किं काव्यम् ?

५. उदाहरणे कपयः किमर्थं हनूमन्तं प्रति (हनूमते) कुपिताः ?

६. कपीनां निद्राभङ्गे किं कारणम् ?

७. व्यङ्ग्यं कथं वा वाच्यं समर्थयति ?

## II. 1. iii. मध्यमकाव्यलक्षणम्

यत्र व्यङ्ग्यचमत्कारासमानाधिकरणः वाच्यचमत्कारः तत्तृतीयम् । यस्मिन् काव्ये व्यङ्ग्यचमत्कारासहवासी वाच्यचमत्कारः अस्ति, तत्काव्यं तृतीयं काव्यम् । यथा—

**'तनयमैनाकगवेषणलम्बीकृतजलधिजठरप्रविष्टहिमगिरिभुजायमानायाः भगवत्याः भागीरथ्याः सखी'** इति ।

अत्र च यमुनावर्णने— यमुना भागीरथ्याः सखी। सा च भागीरथी कथमस्ति इत्युक्ते— भागीरथ्याम् लम्बीकृतहिमगिरिभुजत्वमुत्प्रेक्ष्यते। हिमालयभुजस्य लम्बीकृतत्वं किमर्थम् इत्युक्ते- तनयमैनाकान्वेषणमेव तत्र फलतया उत्प्रेक्षितम्। गङ्गायां हिमगिरिभुजत्वोत्प्रेक्षणे च श्वैत्यं पातालतलचुम्बित्वञ्च व्यज्यमानं समानो धर्मः । यद्यप्यत्र व्यङ्ग्यचमत्कारः श्वैत्यपातालतलचुम्बित्व-प्रयुक्तः अस्ति। तथापि सः वाच्योत्प्रेक्षचमत्कृतिजठरविलीन एवेति नागरिकेतरनायिकापरिकल्पित-काश्मीरद्रवाङ्गरागनिगीर्णः निजाङ्गगौरिमेव प्रतीयते। सर्वोऽपि वाच्यार्थः प्रतीयमानेनामृष्ट एव रमणीयतामादधाति न स्वतः ।

अतः अत्र पायसे भल्लातकीविदलानामिव, शरीरे लिप्यमानानां सुगन्धाणूनामिव व्यङ्ग्य-सम्पर्कद्वारैव वाच्यशोभा। अतोऽत्र मध्यमकाव्यम् । अनयोः एव द्वितीयतृतीयभेदयोः जागरूका-जागरूकगुणीभूतव्यङ्ग्ययोः निखिलः अलङ्कारवर्गः प्रविष्टः इति पण्डितराजः अभिप्रैति। तत्र जागरुकगुणीभूतव्यङ्ग्यं नाम उत्कृष्टचमत्कारजनकताशालिव्यङ्ग्यसहितं गुणीभूतव्यङ्ग्यम्। अजागरूकगुणीभूतव्यङ्ग्यं नाम अपकर्षाश्रयचमत्कारजनकव्यङ्ग्यसहितं गुणीभूतव्यङ्ग्यम्।

**स्वावलोकनप्रश्नाः**

१. अत्र मध्यमकाव्यं मम्मटमतानुसारं किं भवति ?

२. मध्यमकाव्यलक्षणं जगन्नाथमतानुसारं किं भवति ?

३. मध्यमकाव्यस्य उदाहरणं किम् ?

४. उदाहरणे कः वाच्यः कः व्यङ्ग्यः ?

५. अत्र वाच्य-व्यङ्ग्ययोः कथं सामानाधिकरण्यम् ?

६. सामानाधिकरण्ये जगन्नाथः किं दृष्टान्ततया दत्तवान् ?

७. द्वितीय-तृतीयकाव्ययोः भेदे किं निमित्तम् ?

८. जागरूकव्यङ्ग्यं नाम किम् ?

९. अजागरूकव्यङ्ग्यं नाम किम् ?

१०. किं नाम गुणीभूतव्यङ्ग्यम् ?

११. अग्रे प्रायः के परिगणिताः भवन्ति ?

## II. 1. iv. अधमकाव्यलक्षणम्

यत्र अर्थचमत्कृत्युपस्कृता शब्दचमत्कृतिः तत्र अधमं चतुर्थकाव्यम्। यथा–

**मित्रात्रिपुत्रनेत्राय त्रयीशात्रवशत्रवे ।**
**गोत्रारिगोत्रजत्राय गोत्रात्रे ते नमो नमः ।।** इति ।।

सूर्य-चन्द्रनेत्राय, वेदरिपुदैत्यशत्रवे, कुलपर्वतारेः इन्द्रस्य गोत्रे उत्पन्नानां देवानां रक्षकाय ते नमः इति वाक्यार्थः। अत्र वृत्यनुप्रासरूपः शब्दालङ्कारः अर्थचमत्कारसंस्कृतस्सन् प्रतिभाति। अतः इदम् अधमकाव्यस्योदाहरणम्।

**स्वावलोकनप्रश्नाः**

१. अधमकाव्यलक्षणं किम् ?

२. उदाहरणं किम् ?

३. अस्य उदाहरणस्य कथं समन्वयः ?

## II. 1. v. पण्डितराजोक्तकाव्यविभागे सामञ्जस्यम्

यद्यपि अर्थचमत्कारशून्या शब्दचमत्कृतिः यत्र, तत्र अधमाधम इति प्रकारान्तरं किञ्चित् अङ्गीकर्तव्यम्। यथा एकाक्षरपद्यार्धावृत्तियमकपद्मबन्धादि। किन्तु रमणीयार्थप्रतिपादकश्शब्दः काव्यम्' इति सामान्यलक्षणस्यैव तत्र अप्रवृत्तेः, वस्तुतोऽपि शब्दव्यायामात्मकत्वेन तत्र चमत्काराभावात्, तत् काव्यत्वेन न परिगणितम्। न च चत्वारः अपि काव्यप्रभेदाः अनावश्यकाः, प्राचीनोक्तदिशा व्यङ्ग्यस्य त्रैविध्येन काव्यत्रैविध्य एव पर्यवसानात् इति वाच्यम्। चमत्कारस्यैव काव्यविभाजकोपाधितया व्यङ्ग्यचमत्कारस्य प्राधान्ये ध्वनित्वस्य, अप्राधान्ये मध्यमत्वस्य च स्वीकारेण यथा काव्यद्वैविध्यम्, तथा च व्यङ्ग्यचमत्कारोपस्कृतवाच्यचमत्कारस्य प्राधान्ये एकं काव्यम्, अर्थचमत्कारोपस्कृतशब्दचमत्कारस्य प्राधान्ये अपरः काव्यप्रभेदः च स्वीकर्तव्ये । अन्यथा–

**स्वच्छन्दोच्छलदच्छकच्छकुहरछातेतराम्बुच्छटा ।**
**मूर्च्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाऽह्नाय वः ।।**

इत्यादिपामरजनश्लाघ्यश्लोकानाम्–

**विनिर्गतं मानदमात्ममन्दिराद्भवत्युपश्रुत्य यदृच्छयाऽपि यम् ।**
**स सम्भ्रमेन्द्रद्रुतपातितार्गला निमीलिताक्षीव भियाऽमरावती ।।**

इत्याद्युत्प्रेक्षाचमत्कृतिप्रधानपद्यैः–

**सच्छिन्नमूलः क्षतजेन रेणुः ——————————— ।**
**———————————पूर्वोत्थितो धूम इवावभासे ।।**

इत्याद्युपमाचमत्कृतिप्रधानैः श्लोकैः अविशेषः प्रसज्येत। तस्मात् चमत्कारवैविध्यात् काव्यचातुर्विध्यं सुन्दरम्।

यत्र च शब्दार्थचमत्कृत्योः ऐकाधिकरण्यम्, तत्र गुणप्रधानभावं पर्यालोच्य शब्दचमत्कारप्राधान्यं चेत् अधमकाव्यमिति, अर्थचमत्कारप्राधान्यं चेत् मध्यमकाव्यमिति च निर्णयो भवति। यथा 'मित्रात्रिपुत्रनेत्राय' इति पद्ये शब्दचमत्कारप्रधानत्वात् अधमकाव्यत्वम्। समप्राधान्ये तु मध्यमतैव। यथा—

**उल्लासः फुल्लपङ्केरुहपटलपतन्मत्तपुष्पन्धयानां**
**निस्तारः शोकदावानलविकलहृदां कोकसीमन्तनीनाम् ।**
**उत्पातस्तामसानामुपहतमहसां चक्षुषां पक्षपातः**
**सिङ्घातः कोऽपिधाम्नामयमुदयगिरिप्रान्ततः प्रादुरासीत् ।। पृ. २४**

अत्र धामसङ्घातात्मके वर्णनीये सूर्ये फुल्लपङ्केरुहपटलपतन्मत्तपुष्पन्धयानाम् उल्लासहेतुत्वस्य रूपणात् रूपकालङ्कारः, अथवा उल्लासहेतोः सूर्यस्य रूपकार्थोल्लासत्वेन प्रतिपादनात् हेत्वलङ्कारः। 'उल्लासः-फुल्ल-पटलः' इत्यादौ लकारात्मकसरूपवर्णावृत्तेः वृत्त्यनुप्रासः अपि अलङ्कारः। एवञ्चात्र शब्दचमत्कारवाच्यचमत्कारयोः समप्राधान्यात् इदं मध्यमकाव्यस्यैव उदाहरणम्।

**स्वावलोकनप्रश्नाः**

१. अधमाधमकाव्यखण्डने का युक्तिः ?

२. मध्यमाधमयोः भेदकरणे का युक्तिः ?

३. यत्र अर्थ-शब्दयोः समं प्राधान्यं तत्र कः काव्यभेदः ?

इदानीम् 'शयिता सविधे' इत्याद्युत्तमोत्तमकाव्ये ध्वनित्वं परिशीलयामः।

## II. 2. 'शयिता सविधे...' इत्यादिपद्ये रसध्वनित्वनिरूपणम्

**शयिता सविधेऽप्यनीश्वरा सफलीकर्तुमहो मनोरथान् ।**
**दयिता दयिताननाम्बुजं दरमीलन्नयना निरीक्षते ।।**

पद्येऽस्मिन् नायिकालम्बना सविधशयिनाक्षिप्त(कल्पित)रहस्थानाद्युद्दीपिता, दरमीलन्नयन-निरीक्षणादिभिः अनुभाविता, त्रपौत्सुक्यादिना व्यभिचारिणा परिपुष्टा संयोगकालीना रतिः अभिव्यज्यते। ततश्च अत्र संयोगशृङ्गारध्वनिरिति पण्डितराजस्य सिद्धान्तः। परम् अत्र पण्डितराजेनैव चुम्बनेच्छा त्रपा वा मुख्यतया किमिति नाभिव्यज्येत इति भावध्वनिविषयकप्रश्नः कृत्वा समाहितश्च।

**स्वावलोकनप्रश्नाः**

१. **शयिता सविधे** इत्यत्र कः ध्वनिः ?

२. पण्डितराजस्य पूर्वपक्षे विकल्पः कः ?

## II. 2. i. चुम्बनेच्छाध्वनित्वशङ्कानिराकरणम्

ननु 'यद्ययं शयितः स्यात् तदा अस्य आननाम्बुजं चुम्बेयम्' इति नायिकेच्छायाः एव अत्र व्यङ्ग्यत्वात्, भावध्वनित्वं किमिति न स्यात् ? दयितया दयिताननाम्बुजस्य दरमीलन्नयनतया निरीक्षणे चुम्बनेच्छैव तात्पर्यविषयतामातनोति किल ? इति चेत् अत्रोच्यते— 'मनोरथान् सफलीकर्तुमनीश्वरा' इत्यनेन मनोरथाः सर्वे अस्याः हृदि तिष्ठन्तीति प्रतीतेः, स्वशब्देन मनोरथपदेन सामान्याकारेण चुम्बनेच्छायाः अपि निवेदनात्, वाच्यवृत्त्यावेद्यायाः चुम्बनेच्छायाः ध्वनित्वायोगात् । न च मनोरथपदेन मनोरथत्वाकारेण सामान्येच्छायाः अभिधानेऽपि, चुम्बेयमिति चुम्बनात्मकविषयविशेष-विशिष्टेच्छायाः अवाच्यत्वात्, व्यङ्ग्यत्वे किं बाधकमिति वाच्यम्। चमत्काराभावस्यैव बाधकत्वात् ।

यतो हि विशेषाकारेण व्यङ्ग्योऽपि सामान्याकारेण अभिहितः अर्थः सहृदयानां चमत्कृति-मुत्पादयितुं नेष्टे । यथा कथञ्चिदपि वाच्यवृत्त्यानालिङ्गितस्यैव व्यङ्ग्यस्य चमत्कारित्वेन आलङ्कारिकैः स्वीकारात् ।

अन्यच्च चुम्बनेच्छायाः रत्यनुभावतयैव सुन्दरत्वेन रतिमप्रकाश्य केवलचुम्बनेच्छायाः स्वातन्त्र्येण प्रकाशने चुम्बेयमिति शब्दबलात् प्रतीयमानेच्छाया इव अचमत्कारित्वापत्तेश्च। तस्मात् चुम्बनेच्छात्मकभावस्य रत्यङ्गतया व्यक्तस्य गुणीभूतव्यङ्ग्यव्यपदेशहेतुत्वमेव न प्राधान्यम् इति न चुम्बनेच्छायाः अत्र भावध्वनित्वं शङ्क्यम्।

**स्वावलोकनप्रश्नाः**

१. कः व्यङ्ग्यः **चमत्कारकारीति** आलङ्कारिकैः स्वीकृतम् ?

## II. 2. ii. त्रपायाः भावध्वनित्वनिराकरणम्

ननु माभूत् चुम्बनेच्छायाः ध्वनित्वेन भावध्वनित्वम् । किन्तु त्रपायाः ध्वनित्वेन भावध्वनित्वं किं न स्यात् ? सा च त्रपा अत्र 'दरमीलन्नयना' इत्यत्र नयनगतदरमीलनेन व्यज्यते। ततश्च त्रपाध्वनिरेव, तस्या एव मुख्यवाक्यार्थत्वात्। अतः त्रपाध्वनित्वम् अस्तु इति चेत्– अत्राप्युच्यते । पद्येऽस्मिन् नायिकामुद्दिश्य निरीक्षणस्य विधेयत्वात्, नायिकायाः अनुवाद्यत्वेन तद्विशेषणतया प्रतीतेन दरमीलनेन त्रपायाः व्यक्तावपि मुख्यवाक्यार्थत्वं न घटते। न च पद्येऽस्मिन् त्रपायाः ध्वनित्वनिर्वाहाय दरमीलन्नयनात्वं न उद्देश्यनायिकाविशेषणम्, अपि तु विधेयनिरीक्षणविशेषणमेव इति वाच्यम् ।

एवमपि पद्येऽस्मिन् दरमीलन्नयनात्वविशिष्टनिरीक्षणस्यैव विधेयत्वेन दरमीलनस्य विधेयतावच्छेदककोटिप्रविष्टत्वेऽपि विधेयत्वं नास्ति। दरमीलनस्य त्रपाकार्यत्वेऽपि दरमीलन्नयनात्व-विशिष्टनिरीक्षणस्य रतिमात्रकार्यत्वात् रत्यभिव्यञ्जकत्वमेव युक्तम्। किञ्च दरमीलनेन त्रपा एव व्यज्यत इति यद्याग्रहः, एवं तर्हि दरमीलन्नयना अस्ति इत्येवं कविरवक्ष्यत् 'निरीक्षते' इति च नावक्ष्यत्, त्रपां प्रति नयनगतदरमीलनस्यैव व्यञ्जकतया अपेक्षितत्वात् ।

अन्यच्च यथा मन्त्री राज्ञः साचिव्यं निर्वहति, मन्त्रिकुमारश्च राजकुमारस्य साचिव्यकार्यं निर्वहति, तथा वाच्यस्य त्रपायाः अनुभावस्य दरमीलनस्य वाच्यवृत्त्युपस्थाप्ये रतेरनुभवे निरीक्षणेऽ-ङ्गत्वम्, निरीक्षणस्य च अनुभावस्य प्रधानीभूतरत्यङ्गत्वम्। एवं दरमीलनव्यङ्ग्यया: त्रपायाः निरीक्षणव्यङ्ग्यायां रतौ गुणीभावप्रत्ययस्यैव उचितत्वात् व्यक्ताऽप्यत्र त्रपा न मुख्यवाक्यार्थीभवति, अपि तु रतेरङ्गभूतैवेति इच्छात्रपयोः द्वयोरप्यत्र गुणीभावेन संयोगशृङ्गारध्वनित्वमेव न भावध्यनित्वम्।

इदानीम् 'निश्शेष...' इत्यादिपद्ये ध्वनित्वं दीक्षितोक्तं पण्डितराजोक्तदिशा परिशील्य, पद्येऽस्मिन् पण्डितराजोक्तं ध्वनित्वं कथमिति जानीमः ।।

**स्वावलोकनप्रश्नाः**

१. उद्देश्यं नाम किम् ? विधेयं नाम किम् ?

२. **दरमील्लन्नयना** इत्यनेन त्रपा एव व्यज्यते इति चेत् किमवक्ष्यत् ?

३. त्रपायाः शृङ्गारे गुणीभावः कथम् ?

४. अस्मिन् श्लोके भावध्वनिः कथं भवति ?

## II. 3. 'निश्शेष...' इत्यादिपद्यविचारः

**निश्शेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो,**
**नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः ।**
**मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे,**
**वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम् ।।**

अत्र च पद्ये मम्मटाचार्येण 'तदन्तिकमेव रन्तुं गतासीति प्राधान्येन अथमपदेन व्यज्यते' इति (ध्वन्यत इति) व्याख्यायि। अप्पय्यदीक्षितेन चित्रमीमांसायां पद्येऽस्मिन् ध्वनित्वं सोपपत्तिकं विचारितम्।

**स्वावलोकनप्रश्नाः**

१. **निश्शेषच्युतचन्दनम्** इत्यत्र मम्मटमतानुसारं व्यङ्ग्यस्वरूपं किम् ?

२. अत्र प्रधानव्यञ्जकः कः ?

## II. 3. i. दीक्षितोक्तध्वनित्वनिरूपणम्

श्लोकेऽस्मिन् काचित् दूती स्वनायकानयनाय प्रेषिता। ततः किञ्चित्कालानन्तरमागत्य 'मया नायकः बहुधा अनुनीतोऽपि नागतः' इति कथयन्तीं दूतीं प्रति साकूतमिदं वचनम्।

श्लोकेऽस्मिन् चतुर्थचरणे प्रतिपादितस्य नायकगतस्य अधमत्वस्य जात्या प्रतिपादयितुम् अशक्यत्वात्, दूतीसम्भोगातिरिक्तहीनकर्मणापि प्रकाशयितुमशक्यत्वाच्च, प्रकारान्तरेण अनुपपन्नमधमत्वं दूतीसम्भोगमभिव्यञ्जयति। एवं श्लोकस्थाधमपदस्य सहायकत्वेनैव स्थिताः

'निश्शेषच्युतचन्दनम्' इत्यादयः चत्वारः अवान्तरवाक्यार्थाः। तत्र द्वितीयचरणे 'नेत्रे दूरमनञ्जने' इत्यत्र दूरम्= भृशम् कज्जलरहिते इति वाच्यपक्षीयः अर्थः, दूरमापाततः कज्जलरहिते इति व्यङ्ग्यपक्षीयः नेत्रचुम्बनप्रकाशकश्च अर्थः दीक्षितेन वर्णितः। एवम् 'तन्वी तव तनुः, पुलकिता' इति जलस्पर्शजनितपुलकोद्गमाख्यः इति वाच्यक्षीयः अर्थः, 'पुलकितापि तनुः तन्वी रतिक्लेशेन मृदुला' इति व्यङ्ग्यपक्षीयः अर्थः अपि प्रकाशितः ।

किन्तु 'निश्शेषच्युतचन्दनम्...' इति प्रथमावान्तरवाक्यार्थे उत्तरीयाकर्षणेन चन्दनस्य ईषत् च्युतिव्यावर्तकं निः इति पदम्। ततः वाच्यस्नानव्यावर्तनाय 'तटम्' इति विशिष्योपात्तम्। यतस्स्नाने सर्वत्र चन्दनच्युतिः, दूत्यास्तु स्तनयोः तटे एवउ उपरिभाग एव चन्द्रनच्युतिः इति तटग्रहणं सम्भोगाङ्गस्य आश्लोषस्याभिव्यञ्जकम्। एवम् 'निर्मृष्टरागोऽधरः' इति द्वितीयावान्तरवाक्यार्थेऽपि प्रथमतः प्रतीतस्य ताम्बूलग्रहणविलम्बप्रयुक्तरागप्रमोषस्य वारणाय 'निर्' इति पदम्। स्नाने सर्वत्र ओष्ठयोः रागप्रमोषस्य सम्भाव्यतया तद्व्यावृत्यर्थम् 'अधर' इति विशिष्य ग्रहणम् अधरचुम्बनप्रकाशनाय।

एवञ्च चतुर्णामवान्तरवाक्यार्थानां सम्भोगाङ्ग— श्लेष-अधरचुम्बन-नेत्रचुम्बन-रतिक्लेश-जनितपारवश्यप्रकाशनद्वारा प्रधानीभूत' अधम'पदसाहाय्यविधानेन 'तदन्तिकमेव रन्तुं गतासि — इति प्राधान्येन अधमपदेन व्यज्यते' इति दीक्षितेन व्याख्यातम् । अत्र च अवान्तरवाक्यार्थानाम् असाधारणानामेव प्रधानीभूतव्यङ्ग्यव्यञ्जकत्वमित्यप्पय्यदीक्षितेन स्वचित्रमीमांसायां प्रकाशितम्। तदेतत् अलङ्कारशास्त्रतत्त्वानवबोधनिबन्धनमिति पण्डितराजः अभिप्रैति ।

**स्वावलोकनप्रश्नाः**

१. साकूतं नाम किम् ?

२. अत्र साकूतवचनस्य अभिप्रायः कः ?

३. अधमत्वं कथं सम्भवति ?

४. अधमपदस्य अप्रधानव्यञ्जकाः वाक्यार्थाः कति के च ते ?

५. एते वाक्यार्थाः कीदृशान् व्यङ्ग्यार्थान् बोधयन्ति ?

६. अप्पय्यदीक्षितमतानुसारं प्रधानव्यङ्ग्यबोधने अवान्तरवाक्यार्थाः केन प्रकारेण साहाय्यमाचरन्ति ?

७. दीक्षितव्याख्याने किं निबन्धनम् ?

## II. 3. ii. पण्डितराजकृतदीक्षितमतखण्डनम्

पण्डितराजः दीक्षितमतखण्डने प्रधानतया अंशद्वयं प्रतिपादयति— (अ) प्राचीनसकलग्रन्थविरोधः (आ) उप्पत्तिविरोधः चेति ।

**स्वावलोकनप्रश्नाः**

१. दीक्षितमतखण्डने जगन्नाथेन दर्शिते अनुपपत्ती के ?

**(अ) प्राचीनसकलग्रन्थविरोधः तथा हि—**

**(क) भ्रम धार्मिक विश्रब्धः स शुनकोऽद्य मारितस्तेन ।**
**गोदावरीनदीकूललतागहनवासिना दृप्तसिंहेन ।।**

पद्येऽस्मिन् ध्वनिकारेण भ्रमणे वाच्यतया स्थितो भ्रमणाभावः व्यङ्ग्य इति प्रकाशितम्। तच्च न असाधारण्यमार्गमनुसृत्य उपपादितम्।

अत एव काव्यप्रकाशकारेण पञ्चमोल्लासशेषे—

**'निश्शेषेत्यादौ गमकतया यानि चन्दनच्यवनादीनि उपात्तानि तानि कारणान्तरतोऽपि सम्भवन्ति। यतश्च अत्रैव स्नानकार्यत्वेन उपनिबद्धानि न उपभोग एव प्रतिबद्धानीति इत्यनैकान्तिकानि'**

इति साधारणानामेव चन्दनच्यवनादीनां दूतीसम्भोगप्रकाशकत्वं ध्वनिकृत्सम्मतमिति तदीयं हृदयमाविष्कृतम्।

**स्वावलोकनप्रश्नाः**

१. प्राचीनसकलग्रन्थविरोधे ध्वन्योलोकग्रन्थस्य विरोधः कुत्र ?

२. मम्मटग्रन्थस्य विरोधः कुत्र ?

**(ख) एवमेव पञ्चमोल्लासान्ते—**

'गोदावरीतीरं श्वभीरुभ्रमणायोग्यं सिंहवत्त्वात् यन्नैवं तन्नैवम् यथा गृहम्' इति व्यतिरेकव्याप्तिमूलकानुमानेन भ्रमधार्मिकेत्यादौ भ्रमणाभावं व्यञ्जनया गतार्थयतः महिमभट्टस्य मतं प्रत्याचक्षाणः काव्यप्रकाशकारः व्यभिचार-असिद्धि-विरोधाख्यान् त्रीन् दोषान् उपर्युक्तमहिमभट्टानुमाने दर्शयाम्बभूव। तत्र शुनो भीरुरपि वीरत्वेन सिंहात् न बिभेति इति श्वभीरूभ्रमणायोग्यत्वाभाववद्गोदावरीतीरवृत्तित्वेन सिंहवत्त्वस्य साध्याभाववद्वृत्तित्वेन अनैकान्तिकात्वम्। एवं श्वभीरुभ्रमणयोग्यत्वरूपसाध्याभावव्याप्तत्वेन विरुद्धत्वम्। पुंश्चलीवाक्यस्य प्रामाण्याभावेन पक्षे गोदावरीतीरे सिंहात्मकहेतोः असिद्धत्वञ्च मम्मटाचार्येण प्रकाशितम्।

तथा च मम्मटमहिमभट्टग्रन्थनिराकरणपरः सन्दर्भोऽपि साधारणानामेव व्यञ्जकत्वं समर्थयति। एवञ्च व्यञ्जकानां साधारण्यं प्रतिपादयताम् । ग्रन्थैस्सह दीक्षितग्रन्थस्य विरोधः स्पष्ट एव। एवं प्राचीनग्रन्थविरोधः स्फुटीकृतः ।

**स्वावलोकनप्रश्नाः**

१. ध्वनिम् अनुमाने कः अन्तर्भावितवान् ?

२. **भ्रम धार्मिक**.इत्यत्र अनुमानेऽन्तर्भावे के हेत्वाभासाः दर्शिताः ?

**(आ) उपपत्तिविरोधः**

**(क)** किञ्च 'निश्शेष...' इत्याद्यवान्तरवाक्यार्थानां वापीस्नानव्यावृत्तिद्वारेण व्यङ्ग्य-साधारण्यं सम्पाद्यते तत्किमर्थमिति पृच्छामः। व्यङ्ग्यव्यञ्जनार्थमिति चेत्, न हि व्यञ्जकगतासाधारण्यं व्यञ्जनोपायः। यतः–

**'औन्निद्र्यं दौर्बल्यं चिन्ता अलसत्वं सनिःश्वसितम्।**
**मम मन्दभागिन्याः कृते सखि त्वामपि परिभवति'।। पृ.१६**

अत्र श्लोके सम्भोगज्वरसाधारणानामेव विशेषणानां वक्त्रादिवैशिष्ट्यवशात् व्यञ्जकत्वं प्राचीनैरभ्युपगतम्।

**(ख)** किन्तु दीक्षितपादैः असाधारणानां वाक्यार्थानां व्यञ्जकत्वं स्वीकृतम्। असाधारण्यञ्च व्याप्त्यपरपर्यायम्। तच्च अनुमानस्यैव अनुकूलं व्यक्तेश्च प्रतिकूलम्।

**(ग)** अन्यच्च तटादिघटितानां वाक्यार्थानाम् असाधारण्यसम्पादनं न युज्यते। सलिलार्द्र-वसनकरणक-प्रोञ्छनादिनापि निश्शेषच्युतचन्दनस्तनतटत्वस्य सम्भवात्।

**(घ)** किञ्च दीक्षितोक्तदिशा– 'तदन्तिकमेव रन्तुं गतासि' इति व्यङ्ग्यशरीरम्। तत्र 'निश्शेषच्युत' इत्याद्यवान्तर वाक्यार्थानाम् अधमत्वस्य च दीक्षितोक्तदिशा वाच्यार्थे वापीस्नाने बाधितत्वात्, वाच्यार्थबाधं पुरस्कृत्य तदन्तिकगमनस्य विपरीतलक्षणावेद्यत्वमेव वक्तुं युक्तं न व्यङ्ग्यत्वम्। रमणरूपफलांशस्य यद्यपि व्यञ्जानावेद्यत्वावकाशोऽस्ति। किन्तु तस्य दीक्षितोक्तदिशा अधमत्वेन आक्षिप्तत्वात् आक्षेपप्रमाणवेद्ये अर्थे व्यञ्जनायाः अयुक्तत्वात् । 'अनन्यलभ्यः शब्दार्थः' इति न्यायात्। तस्मात् रमणरूपफलांशस्य लक्ष्यशक्तिमूल-ध्वननवेद्यत्वमपि न घटते।

**(ङ)** व्यञ्जनायाः आक्षेपस्य च एकत्वाभ्युपगमेऽपि आक्षिप्तस्य दूतीसम्भोगस्य दीक्षितोक्तदिशा वाच्याधमत्वोपपादकत्वात् वाच्यसिद्ध्यङ्गत्वमेव वक्तुं युक्तं न ध्वनित्वम्।

एवं पञ्चभिरंशैः दीक्षितोक्तविषये उपपत्तिविरोधः प्रदर्शितः। तस्मात् अत्र ध्वनेः नूतनतया समन्वयः एवं द्रष्टव्यः। अत्र च अवान्तरवाक्यार्थाः साधारणा एव न त्वसाधारणाः। तथा हि–

पद्येऽस्मिन् व्याख्यातं स्नानं न सामान्यं स्नानम् अपि तु वापीस्नानम् । वाप्यां हि बहुलयुवजनत्रपापारवश्य-सम्भ्रमात् अंसद्वयलग्नाग्रस्वस्तिकीकृतभुजलतायुगलेन तटस्यैव मुहुरामर्शात्,

तटयोरेव चन्दनच्युतिः न सर्वत्र। एवं त्वरया सम्यगक्षालनेन अधर एव निर्मृष्टरागः न उत्तरः। एवं विदग्धायाः नायिकायाः गूढतात्पर्यैवोक्तिरुचिता। अन्यथा वैदग्ध्यभङ्गापत्तेः ।

एवं वापीस्नानसाधारणैरेव अवान्तरवाक्यार्थैः अनन्तरं वक्तृबोद्धव्यादिवैशिष्ट्यवशात् प्राग्वाच्यार्थतादशायां अपराधान्तरनिमित्तकदुःखदातृत्वाकारेण प्रतीतः अधमः क्रमेण दूतीसम्भोगात्मक-दुःखदातृत्वाकारेण पर्यवस्यतीति अलङ्कारशास्त्रसिद्धान्तनिष्कर्षं पण्डितराजः प्रत्यपादयत्, यत्र च व्याख्याने नायिकायाः चातुर्यं सुरक्षितं भवति। विदग्धोत्तमनायिकायाः सखीसमक्षं तत्कृतदूत्युपभोगस्य प्रकाशयितुमनौचित्येन प्राचीनानामेव सोढानामप्यपराधानामसह्यतया दूतीं प्रति प्रतिपिपादयिषितत्वात्। दीक्षितव्याख्याने तु सखीसमक्षं नायिकया नायककृते दूतीसम्भोगप्रकाशने वैदग्ध्यं दग्धमेव। परं तन्मते असाधारणवाक्यार्थैः निर्भीकतया व्यङ्ग्यप्रकाशनं धार्मिकत्वञ्च प्रकाशितमिति तु अन्यदेतत्।

**स्वावलोकनप्रश्नाः**

१. उपपत्तिविरोधे जगन्नाथेन कति बिन्दवः दर्शिताः ?

२. प्रथमबिन्दोः सारः कः ?

३. **अनन्यलभ्यः शब्दार्थः** इत्यस्य अर्थः कः ?

४. अत्र दीक्षितमते वाच्यसिद्ध्यङ्गं कथम् ?

५. जगन्नाथव्याख्याने साधारणाः व्यञ्जकाः कथं व्यङ्ग्यमर्थं बोधयन्ति ?

इदानीम् उत्तम (द्वितीय) काव्ये ज्ञातव्यान् कांश्चिदंशान् जानीमः ।

# II. 4. चित्रान्यत्वदलखण्डनम्, 'प्रहरविरतौ वा........' इत्यादिदीक्षितोक्तगुणीभूतव्यङ्ग्यविचारश्च

## II. 4. i. चित्रान्यत्वदलखण्डनम्

**(अ)** 'अतादृशिगुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम्' इति द्वितीयकाव्यं मम्मटाचार्येण लक्षितम्। व्यङ्ग्ये वाच्यात् अतादृशि-अनतिशायिनि मध्यमं काव्यमिति मम्मटाचार्याः मेनिरे। वाच्यार्थात् अनतिशयितचमत्कारवत्त्वस्य च चमत्कारजनकव्यङ्ग्यशालिषु पर्यायोक्तसमासोक्त्यादि-गुणीभूतव्यङ्ग्यप्रभेदेषु, अचमत्कारिव्यङ्ग्यवत्सु दीपकादिषु च सत्त्वात् वाच्यार्थापेक्षया अनतिशयित-चमत्कारवत्त्वस्य उभयत्र सत्त्वात्, दीपकादिषु अतिव्याप्तिवारणाय चित्रान्यत्वं विशेषणं देयमिति काव्यप्रकाशसारबोधिनीटीकाकाराः अमन्यन्त। परं वास्तविकदृष्ट्या, तदसङ्गतमिति पण्डितराजः अभिप्रैति ।

यतः 'चित्रमिति गुणालङ्कारयुक्तम्' इति गुणालङ्कारयोगितामात्रेण काव्यप्रकाशकारेण चित्रत्वस्य सर्वेषामेव अलङ्काराणाम् अभ्युपगतत्वात्, पर्यायोक्तिसमासोक्त्यादिषु गुणीभूत-व्यङ्ग्यतायाः चित्रतायाश्च सामानाधिकरण्यात् तत्र चित्रान्यत्वस्य अभावेन अव्याप्तिः ।

**(आ)** अन्यच्च वाच्यसिद्ध्यङ्गरूपगुणीभूतव्यङ्ग्यविषये पण्डितराजेन कश्चित् प्रकाशितः नूतनः अंशः अस्ति यत्– यत्र वाच्यं व्यङ्ग्यं विनैव प्रकारान्तरेण वाच्येनैव उपपद्यते, तत्र व्यङ्ग्यस्य न वाच्यसिद्ध्यङ्गरूपगुणीभूतव्यङ्ग्यत्वम् ।

अत एव 'सम्प्रति सा हृदयगतं प्रियपाणिं मन्दमाक्षिपति' इत्यत्र रतिं विना आक्षेपगतमान्द्यस्य अनुपपत्तेः रत्याख्यः भावः प्रियपाण्याक्षेपेण तन्मान्द्येन वा व्यज्यते । व्यक्तस्य च तस्य रत्याख्यचित्तवृत्तिविशेषस्य मन्दाक्षेपरूपवाच्योपपादकत्वात् वाच्यसिद्ध्यङ्गस्य गुणीभूतव्यङ्ग्यत्वमिति वाच्यम्। अनतिचमत्कारिभिः सख्युपदेशादिभिरपि मान्द्योपपत्तेः, प्रथमचित्तचुम्बिनीं विप्रलम्भरति-मप्रकाशयन् न स्वातन्त्र्येण परनिर्वृतिचर्वणागोचरो भवति वाच्यो मन्दाक्षेप इति न गुणीभूतव्यङ्ग्यत्वम्।

**(इ)** एवम् 'निश्शेषच्युतचन्दनम्' इत्यादिपद्ये अपि अधमत्वादीनि वाच्यानि व्यङ्ग्यातिरिक्तैरेव अर्थैः आपाततः निष्पन्नशरीराणि इति न तत्रापि गुणीभावः शङ्कनीयः ।

एवञ्च उत्तमोत्तम-उत्तमकाव्ययोः व्यङ्ग्यस्य प्राधान्याप्रधान्यकृतः विशेषः न अपलपितुं शक्यते। तथा च पूर्वोक्तपण्डितराजकृतव्यवस्थानुसारेण 'प्रहरविरतौ वा' इति वक्ष्यमाणपद्येऽपि न गुणीभूतव्यङ्ग्यत्वम्, अपि तु ध्वनित्वमेव ।

**स्वावलोकनप्रश्नाः**

१. **चित्रान्यत्वमिति, अताद्दशीति** पदस्य व्याख्याने को दोषः ?

२. **प्रहरविरतौ मध्ये वा** इति पद्ये गुणीभूतव्यङ्ग्यस्य निरासाय के अनुपपत्ती वारिते ?

## II. 4. ii. 'प्रहरविरतौ वा.....' इत्यादिदीक्षितोक्तगुणीभूतव्यङ्ग्यविचारः

**प्रहरविरतौ मध्ये वाऽह्नस्ततोऽपि परेण वा**
**किमुत सकले याते वाह्नि प्रिय त्वमिहैष्यसि ।**
**इति दिनशतप्राप्यं देशं प्रियस्य यिसासतो**
**हरति गमनं बालालापैः सबाष्पगलज्जलैः ।। पृ.२१**

अत्र 'सकलमहः परमावधिः, ततः परं प्राणान् धारयितुम् अहं न शक्नोमि' इति व्यङ्ग्यम्। एतच्च 'हरति गमनम्' इत्यत्र वाच्यस्य प्रियगमननिवारणस्य अङ्गमिति गुणीभूतव्यङ्ग्यम् इति अप्पय्यदीक्षितेन चित्रमीमांसायाम् उपपादितम्। परमेतन्न सङ्गच्छत इति पण्डितराजस्य आशयः। यतः श्लोके 'बालालापैः गमनं हरति' इति प्रतिपादितमस्ति। तत्र आलापपदोत्तरवर्तितृतीयया आलापनिष्ठकरणत्वस्याभिधानात् पूर्वोक्तरीत्या वाच्यस्य वाच्येनैव उपपादितत्वात्, व्यङ्ग्यकृतवाच्योपपादनस्य अत्राननुभूयमानत्वात् नास्ति गुणीभूतव्यङ्ग्यत्वम्। एवं च निश्शेषेत्यादावपि अधमत्वस्य प्रकारान्तरेणैव उपपन्नतया व्यङ्ग्यदूतीसम्भोगानुपपाद्यत्वात् न गुणीभूतव्यङ्ग्यत्वम्।

अथवा व्यङ्ग्यस्य 'ततः परं प्राणान् धारयितुं न शक्नोमि' इत्यादेः प्रियगमननिवारणाङ्गत्वेन वाच्यसिद्ध्यङ्गत्वेऽपि नायकादेः विभावस्य, बाष्पादेः अनुभावस्य, चिन्तावेगादेश्च सञ्चारिणः संयागेन अभिव्यज्यमानेन विप्रलम्भेन सम्पाद्यमानं ध्वनित्वं निवारयितुं गीष्पतिरपि नालम् इति शम्।।

**स्वावलोकनप्रश्नाः**

१. **प्रहरविरतौ** इति श्लोके दीक्षितमतानुसारं गुणीभूतव्यङ्ग्यं कथम् ?

२. **प्रहरविरतौ** इति श्लोके पण्डितराजानुसारं ध्वनिः कथम् ?

## II. 5. ध्वनिप्रभेदपञ्चकम्

एवं पञ्चात्मना अवस्थिते ध्वनौ रसध्वनेः परमरमणीयतया तदात्मा रसः वर्णनीयः। अतः तस्यैव अनन्तरविभागे स्वरूपं जानीमः। पूर्वं निरूपितेषु काव्यभेदेषु उत्तमोत्तमं च उत्तमं ध्वनिरिति व्यपदिश्यमानं काव्यम्। तच्च यद्यपि असंख्याकभेदवत्, तथापि सामान्यतः केऽपि भेदाः निरूप्यन्ते।

तथा हि ध्वनिर्द्विविधः— १. अभिधामूलः, २. लक्षणामूलः चेति।

तत्र अभिधामूलः त्रिविधः— १. रसध्वनिः, २. वस्तुध्वनिः, ३. अलङ्कारध्वनिः इति । तत्र रसध्वनिपदेन– १.रसः २. भावः ३. रसाभासः ४. भावाभासः ५. भावशान्तिः ६. भावोदयः ७. भावसन्धिः ८. भावशबलता —इति अष्टौ असंलक्ष्यक्रमभेदाः सङ्गृहीताः।

लक्षणामूलध्वनिस्तु– १. अर्थान्तरसंक्रमितवाच्यः २. अत्यन्ततिरस्कृतवाच्यः इति द्विविधः ।

## II. 6. पाठ्यांशेऽस्मिन् सम्भाविताः प्रश्नाः

**विंशत्यङ्कप्रश्नाः**

1. चतुर्विधकाव्यभेदान् पण्डितराजोक्तदिशा सलक्षणमुदाहरत ?
2. **शयिता सविधेऽप्यनीश्वरा...** इति पद्ये भवध्वनित्वं वा रसध्वनित्वं वा इति सयुक्तिकं विवेचयत ?
3. **निश्शेषच्युतचन्दनम्...** इत्यादिपद्ये दीक्षितोक्तदिशा ध्वनित्वं दूषयित्वा पण्डितराजोक्तदिशा ध्वनिसरणिं दर्शयत ?

**दशाङ्कप्रश्नाः**

1. पण्डितराजोक्तकाव्यविभागे सामाञ्जस्यं विवेचयत ?
2. **निश्शेष...** इत्यादिपद्ये दीक्षितमतखण्डने पण्डितराजेन प्रदर्शितम् उपपत्तिविरोधं प्रदर्शयत ?
3. **प्रहरविरतौ वा** इत्यादिपद्ये दीक्षितोक्तं गुणीभूतव्यङ्ग्यं पण्डितराजोक्तदिशा विमृशत ?

**पञ्चाङ्कप्रश्नाः**

1. प्राचीनोक्तस्य मध्यमकाव्यलक्षणे चित्रान्यत्वदलस्य दूषणं विवेचयत ?
2. पण्डितराजोक्तोत्तमोत्तमकाव्योदाहरणेषु वैविध्यम् विमृशत ?
3. **शयितासविधे...** इत्यादिपद्ये त्रपायाः भावध्वनित्वनिराकरणं विवेचयत ?
4. **निश्शेष...** इत्यादिपद्ये दीक्षितव्याख्याने प्राचीनसकलग्रन्थविरोधः दर्शयत ?

# III. रसस्वरूपमीमांसा

काव्यं पठतः शृण्वतः अभिनेयार्थञ्च पश्यतः सहृदयस्य पुलकाद्यनुभाविका काचित् अलौकिकी स्थितिः जायत –इति सर्वानुभवसिद्धोऽयमंशः। अत्र किं कारणम् ? इति पर्यालोचने रसवद्भाव एवेति काव्यतत्त्ववेतॄणां मनीषा। तत्र कोऽयं रसः ? किं निष्ठः ? कथं वा अनुभूयते ? इत्यादिप्रश्नानां समाधानं बहवः आलङ्कारिकाः व्यतरन्। तेषां सर्वेषां समाकलनपूर्वकं रसस्वरूपनिरूपणाय पण्डितराजेन रसगङ्गाधरे एकादश मतानि आविष्कृतानि । एवञ्चात्र—

1. रसविचाराध्ययनोपयोगिविषयनिरूपणम्,
2. रसस्वरूपविषये विविधमतानि

इत्यंशद्वयं प्राधान्येन रसस्वरूपविषये जानीमः ।

**स्वावलोकनप्रश्नाः**

१. अलौकिकी स्थितिः कीदृशी ?

२. रसमीमांसायां प्रतिपाद्यमानौ अंशौ कौ ?

## III. 1. रसविचाराध्ययनोपयोगिविषयनिरूपणम्

'विभावानुभावव्यभिचारिसंयोगात् रसनिष्पत्तिः' इति भारतं रसस्वरूपप्रतिपादकं सूत्रम्। तत्र विभावो नाम 'विशेषेण भावयन्तीति विभावाः' इति व्युत्पत्त्या ये रत्यादेः आस्वादाङ्कुरयोग्यतां नयन्ति शकुन्तलादयः दुष्यन्तादयो वा ते विभावाः । अनुभावश्च 'अनुसृत्य भावयन्ति' इति व्युत्पत्त्या रत्यादिचित्तवृत्त्यनुभवजनकाः चेष्टाविशेषाः-कटाक्ष-भ्रूविक्षेपादयः। व्यभिचारिणश्च विशेषेणाभितः स्थायिनं भावं सञ्चरन्ति ये विद्युद्द्योतप्रायाः हर्षादयो व्यभिचारिभावाः ते ।

एतेषां संयोगात्-सम्मेलनात् रसनिष्पत्तिः-स्थायिनः रसत्वसम्पत्तिरिति सामान्यतः रससूत्रार्थः । परं सूत्रे **संयोग-निष्पत्तिपदे** अस्पष्टार्थके। तेषां स्पष्टीकरणाय अभिनवभारत्याम् अभिनवगुप्तेन प्रधानतया मतचतुष्टयं न्यरूपि । तेषु—

i. भट्टलोल्लटस्य उपचयवादः अथवा उत्पत्तिवादः
ii. श्रीशङ्कुकस्य अनुकरणवादः अथवा अनुमितिवादः
iii. भट्टनायकस्य भावितत्ववादः अथवा भुक्तिवादः
iv. अभिनवगुप्तस्य अभिव्यक्तिवादश्च मुख्यानि।

इमांश्च अभिनवभारतीनिरूपितान् वादान् अधिकृत्य मम्मटाचार्येण काव्यप्रकाशे सङ्ग्रहेण अन्यूनानतिरिक्तभाषया निरूपणं विहितम्। तेषाम् अत्यन्तसंग्रहेण प्रस्तावः विषयावगाहनाऽत्र क्रियते।

**स्वावलोकनप्रश्नाः**

१. भारतं रससूत्रं किम् ?

२. विभावस्य लक्षणं किम् ? किमुदाहरणं च ?

३. अनुभावस्य लक्षणं किम् ? किमुदाहरणं च ?

४. व्यभिचारिणां किं लक्षणम् ? किमुदाहरणं च ?

५. अभिनवभारत्यां के के वादाः कस्य कस्य प्रतिपादिताः ?

## III. 1. i. भट्टलोल्लटस्य उपचयवादः, उत्पत्तिवादः, प्रतीतिवादः,

मतेऽस्मिन् सीतादिविषयिणी अथवा रतिः रामादौ नायके उत्पद्यमाना, अनुभावैः रतिभावव्यञ्जिकाभिः चेष्टाभिः-सीतागतैः कटाक्षादिभिः नायकस्य रामादेः प्रतीतियोग्या, व्यभिचारिभिः हर्षौत्सुक्यादिभिः परिपुष्टा च रसः। तथा च उपचित एव रत्यादिः स्थायिभावः रसः। अत एवास्य उपचयवाद इति नाम। तस्य च स्थायिभावस्य नटकौशलात् रामत्वेन भासमाने नटे अवस्थिततत्वेन प्रतीतिः इति भट्टलोल्लटव्याख्या। मतेऽस्मिन् रसः किं निष्ठः ? इति प्रश्नस्य अनुकार्यरामादि-नायकनिष्ठः इति समाधानम्। को नाम रसः ? इति प्रश्नस्य उपचितः रत्यादिः एव रसः इति समाधानम्। तथा च भरतरससूत्रे संयोगनिष्पत्तिपदयोरमी अर्थाः पर्यवस्यन्ति ।

| **संयोगपदस्य** | **निष्पत्तिपदस्य** |
|---|---|
| १. विभावैः रत्यादेः उत्पाद्योत्पादकभावसम्बन्धः | १. उत्पत्तिः |
| २. अनुभावैः रत्यादेः गम्यगमकभावसम्बन्धः | २. अवगतिः |
| ३. व्यभिचारिभिः रत्यादेः पोष्यपोषकभावसम्बन्धः | ३. पुष्टिः अथवा उपचयः |

**स्वावलोकनप्रश्नाः**

१. भट्टलोल्लटस्य वादस्य नामान्तराणि कानि ?

२. भट्टलोल्लटवादस्य **उपचयवादः** इति कथं नाम आगतम् ?

३. संयोगशब्दस्य **विभावानुभावव्यभिचारिभिः** इति कथं सम्बन्धः ?

४. निष्पातशब्दस्य विभावादिषु कोऽर्थः ?

## III. 1. ii. श्रीशङ्कुकस्य अनुकरणवादः, अथवा अनुमितिवादः

भट्टलोल्लटमतस्य वस्तुपक्षानुसारेण उपचयवादः इति नाम, अनुभूतिपक्षाधारेण भ्रान्तिवादः अथवा प्रतीतिवादः इति नाम समञ्जसम्। परं श्रीशङ्कुकमते रसः किं निष्ठः ? इति प्रश्नस्य नटनिष्ठः इत्युत्तरम्। अतश्च रसः किं रूपः रत्यादिः ? इत्युक्ते नटे विद्यमानः अनुकरणात्मैव रत्यादिरिति, अनुकरणात्मा रत्यादिस्थायिभावः एव रसः। रामनिष्ठरत्यादेः वस्तुतः रसत्वेऽपि तस्य च रामादेः अस्मिन् काले अभावात्, रत्यादिचित्तवृत्तेश्च केवलं विभावादिभिः लिङ्गैः अनुमितेरेवोचितत्वात्, रसानुभववेलायाञ्च नटस्यैव सद्भावात्, रामस्याभावात् कथं पक्षज्ञानम् ? पक्षज्ञानाभावे च कथं तस्य विषयताकरत्यनुमितेर्भानम् इति चेत् उच्यते। चित्रतुरगन्यायेन इदमंशो नटः रामत्वेन विलक्षणप्रतीत्या गृह्यते। तत्र च सीतादिविषयिणी रतिः विभावादिभिः वस्तुतः अविद्यमानैरपि विद्यमानत्वेन सम्भावितैः अनुमीयते। तथा चानुमानम्— 'रामोऽयं सीताविषयकरतिमान् तदनुकूलविभावानुभावव्यपारवत्त्वात्' इति ।

एवञ्च मतेऽस्मिन् रससूत्रे संयोगपदस्य वस्तुपक्षे अनुकार्यानुकारकभावसम्बन्धः, अनुभूतिपक्षे तु अनुमाप्यानुमापकभावः सम्बन्धः। वस्तुपक्षे च निष्पत्तिपदस्य अनुकृतिः अनुभूतिपक्षे च अनुमितिरित्यर्थः। यद्यपि धूमादिना वह्न्याद्यनुमाने नास्ति चमत्कारः, तथापि 'वस्तुसौन्दर्यबलात् रमणीयत्वम्' इति मम्मटाचार्येण समाहितम्। एवं सकृदनुमितेः निष्पत्तौ साध्यसिद्धेः, तस्याश्च अनुमितिप्रतिबन्धकत्वात् पुनः अनुमितेरभावे धारावाहिकज्ञानाभावात् तद्विना चमत्कृत्यनिष्पत्तेः कथं पुनरनुमितिः इति शङ्कायाः सहृदये इच्छादिनानुमिति सन्ततेः अप्रत्यूहत्वम् इति समाधानम्।

एतच्च समाधानं मम्मटाचार्येण अन्यानुमीयमानविलक्षण इत्यनेन सूचितम्। एवं चात्र धारावाहिकतया जायमाना रत्यादिविषयकानुमितिसन्ततिरेव मतेऽस्मिन् रसास्वादः। परम् उभयोरपि मते नटमाध्यमिकतयैव रसास्वादस्य वर्णनात् रसानां नाट्यरसत्वमेव। अनुकार्यनिष्ठायाः नटनिष्ठाया वा चित्तवृत्तेः सहृदयं प्रति परकीयचित्तवृत्तित्वेन तस्याः अनास्वाद्यत्वदोषस्तु अस्त्येव। अत एव भट्टनायकमतमुपाक्रान्तम्।

**स्वावलोकनप्रश्नाः**

१. श्रीशङ्कुकरसवादस्य नामान्तरे के ?

२. भट्टलोल्लटवादस्य नामान्तरे के ?

३. श्रीशङ्कुकवादे नटादौ रामादिप्रतीतिः कथं जायते ?

४. श्रीशङ्कुकमते रसः किं निष्ठः ?

५. श्रीशङ्कुकमते नटे जायमानम् अनुमानं किं स्वरूपम् ?

६. अनुमाने कति अंशाः भवन्ति ?

७. श्रीशङ्कुकमते **वस्तुपक्षे** रससूत्रस्थसंयोगपदस्य कोऽर्थः ?

८. श्रीशङ्कुकमते **अनुभूतिपक्षे** रससूत्रस्थसंयोगपदस्य कोऽर्थः ?

९. पुनः पुनरनुमितिः कथं जायते ?

१०. श्रीशङ्कुकमते को दोषः ?

## III. 1. iii. भट्टनायकस्य भावितिवादः अथवा भुक्तिवादः

भट्टनायकः अनुकार्यगतत्वेन रसप्रतीतेः अनास्वाद्यत्वम्, सहृदयगतत्वेन रसप्रतीतौ तु अगम्यात्वज्ञान-विषयायाः शकुन्तलायाः अविभावत्वञ्च प्रतिपाद्य, रसप्रतीत्युपायतया त्रीन् व्यापारान् आह। तत्र—

(१) अभिधया विभावानुभावयोः उपस्थितिः ।

(२) शाब्दभावनायाः पुरुषावृत्ताविव द्वितीयस्याः शब्दनिष्ठभाववत्त्वशक्तेः शकुन्तलात्त-च्चेष्टादिगतदेशकालवयोऽवस्थादीनां साधारणीकरणे उपयोगः ।

(३) तृतीयेन भोजकत्वव्यापारेण च सत्त्वे उद्रिक्ते, निगीर्णयोः रजस्तमसोः, प्रकाशानन्दमयस्य संविदि रत्यादिचित्तवृत्तौ विश्रान्तिः भवति; येन च सहृदयः ब्रह्मास्वादसहोदरेण आनन्देन मोदमानस्तिष्ठति।

मतेऽस्मिन् को नाम रसः ? इति प्रश्नस्य भावितः रत्यादिः रसः, इति समाधानम्। स च किं निष्ठः ? सहृदयनिष्ठः । रससूत्रे संयोगपदस्य एतन्मतानुसारेण– (१) भाव्यभावकभावसम्बन्धः (२) भोज्यभोजकभावसम्बन्धः एवं निष्पत्तिपदस्य– १. भावितिः २. भुक्तिः च अर्थः। एतन्मते काव्ये नाट्ये च रसास्वादः। 'काव्ये नाट्ये च' इति भट्टनायकमतनिरूपणावसरे उक्तत्वात्। किं सहृदये विद्यमानः रत्यादिः वासनात्मा रसः उत तत्कालमागतः ? इत्युक्ते वासनात्मना अवस्थितस्य विषयस्य पश्चादभिव्यक्तौ **दग्धृचक्र(Burner)भ्रमणाधिक्येन** प्रकाशाधिक्यमिव अधिकोपया-स्वीकारे अभिव्यक्तितारतम्यप्रसङ्गः ।

तस्मात् काव्ये नाट्ये तुल्य एव रसास्वादः, नास्ति तयोस्तारतम्यम् इति स्वसिद्धान्तसंरक्षणाय **अभिव्यक्तिवादः** अनेन दूषितः। शब्दे अभिधालक्षणव्यञ्जनातिरिक्ततया भावनात्मकव्यापारस्वीकृतेः अपि एतन्मते गौरवम्। वासनासिद्धान्तस्य निरासः अप्यत्र परिगणनीयो लोपः। अतः अभिनवगुप्तमतं निरूप्यते।

**स्वावलोकनप्रश्नाः**

१. भट्टनायकमतस्य नामान्तरद्वयं किम् ?

२. भट्टनायकेन व्यापारत्रयं किं स्वीकृतम् ?

३. भट्टनायकमते रसः कः भवति ?

४. भट्टनायकमते रससूत्रस्थसंयोगपदस्य के के अर्थाः ?

५. भट्टनायकमते निष्पत्तिशब्दस्य कौ अर्थौ ?

६. भट्टनायकमते रसः किं निष्ठः ?

७. भट्टनायकमते कीदृशो रत्यादिः रसः ?

८. दग्धृचक्रभ्रमणाधिक्यं नाम किम् ?

९. अस्मिन् मते को दोषः ?

## III. 1. iv. अभिनवगुप्तस्य अभिव्यक्तिवादः

'सर्वथा च रसनात्मकवीतविघ्नप्रतीतिग्राह्यः भाव एव रसः'। अत्र भावपदेन वासनात्मा अलौकिकावस्थायां विद्यमानः रत्यादिभावः परामृश्यते। स च भावः लोके स्थायिनमनुमातुमत्यन्त-परिचयवतां सामाजिकानां भावनया देशकालवयोऽवस्थादिसम्बन्धिशून्यत्वेन साधारण्येन प्रतीतैः विभावानुभावव्यभिचारिभिः मिलित्वा चर्वणायां जनितायां सत्यां व्यक्तीभवति। अयञ्च रत्यादिः जन्मजन्मान्तरागतः सहृदयस्य संस्कार एव, न चर्वणाकाले उत्पन्नः। तथा चर्वणारूपसमूहालम्ब-नात्मकैकचमत्कृतिजनकज्ञानरूपः रत्यादिरेव रसः।

मतेऽस्मिन् किं निष्ठो रसः ? इति प्रश्नस्य सहृदयनिष्ठ इति, को नाम रसः ? इति प्रश्नस्य अभिव्यक्तः रत्यादिस्थायिभाव एव रस इति, रससूत्रे 'संयोग' पदस्य व्यङ्ग्यव्यञ्जकभाव-सम्बन्धः इति, 'निष्पत्ति'पदस्य अभिव्यक्तिः इति च अर्थः । किञ्च मतेऽस्मिन् रसः न दण्डादेः घटादिरिव कार्यभूतः, दण्डादिनाशेऽपि घटादेरिव विभावादिनाशेऽपि रसस्यावस्थानप्रसङ्गात्। नापि प्रदीपेन घटादिरिव ज्ञाप्यः। पूर्वसिद्धस्य घटस्येव पूर्वसिद्धस्य रसस्याभावात्। कार्यज्ञाप्यविलक्षणं वस्तु लोके क्व दृष्टमिति चेत्, एवं सति रसस्य अलौकिकत्वसिद्धेः एतदस्माकं भूषणमेव भवति इति अभिनवगुप्तपादाचार्याः आहुः ।

एतन्मते—

**१. भावनायाः न शब्दनिष्ठत्वं अपि तु सहृदयनिष्ठत्वम्**
**२. रत्यादीनां वासनात्मकत्वम्**
**३. 'सन्दर्भेषु दशरूपकं श्रेयः'**

**स्वावलोकनप्रश्नाः**

१. रसः अभिनवगुप्तमते कः ?

२. अभिनवगुप्तमते रसस्य परिनिष्ठतं निर्वचनं किम् ?

३. रसः कथं न कार्यः ?

| |
|---|
| ४. रसः कथं न ज्ञाप्यः ?<br>५. कार्यज्ञाप्याभ्यां रसस्य भिन्नतां किं सूचयति ?<br>६. अभिनवगुप्तवादे विशेषाः के ? |

## III. 1. v. मतान्तरनिरूपणम्

एवं रसविषये मुख्येष्वेषु चतुर्षु मतेषु सत्सु पण्डितराजः नूत्नतया—

i. अनिर्वचनीयख्यात्याधारं वेदान्तानुसारि-आलङ्कारिकमतमेकम् **'नव्यास्तु'** इत्यनेन,

ii. मानससाक्षात्कारात्मकस्य बोधस्य रसत्ववर्णनपरं न्यायदर्शनप्रभावितमेकं मतञ्च विस्तारिकाटीकाकारादिप्रभावितम् **'परे तु'** इत्यनेन निरूपितवान्। एवम्—

iii. विभावादीनां समुदायस्य रसत्वप्रतिपादकम् एकम्

iv. त्रिषु 'य एव चमत्कारी स एव रसः' इति मतद्वयञ्च निरूपितवान्।

तत्र विभावादिसमुदायस्य रसत्वनिरूपणं लोचने दृश्यते। त्रिषु 'य एव चमत्कारी स एव रसः अन्यथा तु त्रयोऽपि न, इति तु स्वाभ्यूह्या कल्पितं मतं स्यात् ।

एवं भट्टलोल्लटादिमतानि **चत्वारि**, 'नव्यास्तु' 'परे तु' इति संज्ञिते **द्वे** मते, विभावादि-समुदायस्य रसत्वनिरूपकमेकम् **(१),** चमत्कारिणः विभावाद्यन्यतमस्य रसत्वनिरूपकं चैकम् **(१)** –इति आहत्य अष्टौ मतानि। भाव्यमानो विभावः, भाव्यमानः अनुभावः, भाव्यमानः व्यभिचारी इति **त्रीणि** मतानि तु लोचनोदाहृतानि। एवमाहत्य एकादश मतानि प्रघट्टकेऽस्मिन् पण्डितरजेन निरूपितानि।

**स्वावलोकनप्रश्नाः**

१. पण्डितराजेन कति मतानि प्रतिपादितानि ?

२. नव्यमतं कस्य दर्शनस्य आधारेण प्रत्यपादि ?

३. परकीयमतस्य आधारः कः ?

४. अन्तिममतत्रयस्य आधारः वादः कः ?

५. रसः वेदान्तदर्शनानुसारं कः ?

## III. 1. vi. रसविषये वेदन्तप्रभावः

एषु मतेषु अभिनव-भट्टनायकमते प्रथमतः काश्मीरशैवभूतप्रत्यभिज्ञनदर्शनधारे। परं पण्डितराजः तयोः काश्मीरशैवावगुण्ठनमपनीय शाङ्कराद्वैतवेदान्तेन रञ्जनमकार्षीत्। एषाञ्च मतानां निरूपणात् प्राक् अलङ्कारशास्त्रे रसनिरूपणविषये वेदान्तप्रभावः किमर्थम् इति च किञ्चित् परामृष्टव्यम्। अत्र केचित् आचक्षते। 'भारतीयानां विज्ञानस्य मूलं वेदः, वेदाधारेणैव सर्वं शास्त्रं प्रामाण्यं भजते' इति। अत एव 'रसो वै सः रसँ ग्येवायं लब्ध्वा आनन्दी भवति' इति श्रुतेः अलङ्कारशास्त्रीयतात्पर्यवत्त्वलक्षणं स्वारस्यं पण्डितराजादिभिः आविष्कृतम्। वस्तुतः तार्किकमतस्वीकारे सुखदुःखाद्यात्मगुणरूपाणां रसानां सुखदुःखाद्यात्मना भिन्नरूपत्वेन तेषां नियततया आनन्दप्रदत्वं न सम्भवति।

किञ्च तार्किकोक्तरीत्या रसस्य सुखस्वरूपत्वे द्विक्षणावस्थायित्वमेव स्यात्। अतः रसस्य नित्यसुखरूपत्वसमर्थनाय वेदान्तदर्शनमाश्रितम्। साङ्ख्यादिदर्शनानुसारेणापि सृष्टेः सुखदुःखमोहात्मकेन सुखैकरूपत्वं न सिद्ध्यति । वेदान्तदर्शने तु प्रतिपाद्यं ब्रह्म सच्चिदानन्दस्वरूपं सर्वगतं च। तस्य अनुभवः अनेकजन्मपुण्यपरिपाकसाध्य एव न च सः हठात् सिद्ध्यति । तस्य वैदिकी योगसाधना गुरूपदेशपूर्वकवेदान्तवाक्यार्थोपदेशः इत्यादीनि आवश्यकानि। सर्वगतमानन्द-चैतन्यमयं तदेव ब्रह्म, सहृदयस्य कदाचित् काव्यार्थभावनया चर्वणया च रत्यादिसंसृष्टं सत् प्रकाशते। तादृशप्रकाशस्यैव वेदान्तभाषायां रसास्वादः इति नाम।

वेदान्ते अन्तःकरणावच्छिन्नचैतन्यं जीवः, अन्तःकरणोपहितचैतन्यं जीवसाक्षी इति लक्षणद्वयस्य प्रभावेण रत्यादिचित्तवृत्तीः चैतन्येन संयोज्य निर्माणे, अन्तःकरणवृत्त्यवच्छिन्नचैतन्यं रसः इति, अन्तःकरणोपहितचैतन्यं रसः इति च लक्षणद्वयं पर्यवस्यति। तत्र प्रथमलक्षणस्य स्वीकारे रसास्वादस्य सविकल्पता, द्वितीयलक्षणस्य स्वीकारे च रसास्वादस्य निर्विकल्पता इति अभिनवगुप्तमतनिरूपणावसरे वक्ष्यते। रसस्य शाब्दत्वम् अपरोक्षत्वं चेत्युभयमपि अद्वैतवेदान्तदर्शने एव सिद्ध्यति। अन्ततः रसस्य आनन्दस्वरूपत्वोपपादनाय नित्यसुखस्वरुपत्वोप-पादनाय च वेदान्तमतमाश्रितं पण्डितराजेन।

**स्वावलोकनप्रश्नाः**

१. अभिनवगुप्त-भट्टनायकमतद्वयं कस्य दर्शनस्य आधारेण भवति ?

२. जगन्नाथेन वेदान्तदर्शनरीत्या सूत्रव्याख्यानं किमर्थं कृतवान् ?

३. **अन्तःकरणोपहतचैतन्यं रसः** इति पक्षः सविकल्पको वा ? निर्विकल्पको वा कथम् ?

## III. 1. vii. विविधमतनिरूपणे पण्डितराजेनाश्रितः क्रमः

एवम् अभिनवगुप्तस्य वेदान्तदर्शनाधारं मतद्वयम् **'यद्वा'** इति मधुसूदनयतीन्द्रमतेन सह उपपाद्य, ततः भावनात्मकशब्दनिष्ठव्यापारस्वीकारेण कल्पनागौरवविशिष्टं भट्टनायकमतम्, रत्यादेः केवलं तत्कालप्रतिभानमात्रवादित्वेन स्थायित्वस्य स्पष्टतया अप्रतिपादकम्, केवलं रत्यादेः सहजसहृदयव्यापारभावितत्वं रत्यादेः शब्दव्यापारभाव्यत्वं वा परित्यज्य, आगन्तुकदोषरूप-भावनाजन्यास्वादविषयत्वमभ्युपगच्छतां नव्यानां मतम् अभिनवभट्टनायकमतापेक्षया अवरम्।

ततोऽपि चैतन्यसमुन्मेषं विहाय केवलं विभावाद्यर्थज्ञानात् रत्यादेर्मानसो बोधः इति मानसालौकिक-साक्षात्कारस्य रसत्ववादिमतं निकृष्टम्, ताभ्यामपि आत्मसम्बन्धं सर्वात्मना विहाय परकीयचित्तवृत्तेः रसत्वप्रतिपादकं भट्टलोल्लट-श्रीशङ्कुकमतद्वयं जघन्यम्। ततः रसप्रतीतिकारण-समुदायस्य अथवा तेष्वन्यतमस्य रसत्ववादिनः मतद्वयमतीव मूल्यरहितम्। का कथा परिशिष्टस्य

मतत्रयस्य ? तस्मात् मान्यताप्रयुक्ता मतनिरूपणसरणिरेव पण्डितराजेनाश्रिता। तदिदानीं रसविषये पण्डितराजनिरूपितानि विविधमतानि पश्यामः।

**स्वावलोकनप्रश्नाः**

१. पण्डितराजरसवादेषु कः वादः उत्तमः ?

२. अभिनवगुप्तवादात् भट्टनायकमते किं गौरवम् ?

३. नव्यमतं कथम् अवरम् ?

४. परकीयं मतं किमर्थं निकृष्टम् ?

५. भट्टलोल्लट-श्रीशङ्कुकमतद्वयं कुतो जघन्यम् ?

६. तदन्यमतद्वयं कुतो मूल्यरहितम् ?

# III. 2. रससस्वरूपविषये विविधमतानि

## III. 2. i. पण्डितराजोक्तम् अभिनवगुप्त मम्मटयोः रसस्वरूपम्, 'यद्वा' मतञ्च

### (अ) पण्डितराजरसगद्यम्

'समुचितललितसन्निवेशचारुणा काव्येन समर्पितैः सहृदयहृदयं प्रविष्टैस्तदीयसहृदयतासहकृतेन भावनाविशेषमहिम्ना विगलितदुष्यन्तरमणीत्वादिभिर्लौकिकविभावानुभावव्यभिचारिशब्दव्यपदेश्यैः शकुन्तलादिभि-रालम्बनकारणैः, चन्द्रिकादिभिरुद्दीपनकारणैः, अश्रुपातादिभिः कार्यैः, चिन्तादिभिः सहकारिभिश्च, सम्भूय प्रादुर्भावितेनालौकिकेन व्यापारेण तत्कालनिवर्तितानन्दांशावरणाज्ञानेनात एव प्रमुष्टपरिमितप्रमातृत्वादिनिजधर्मेण प्रमात्रा स्वप्रकाशतया वास्तवेन निजस्वरूपानन्देन सह गोचरीक्रियमाणः प्राग्विनिष्टवासनारूपो रत्यादिरेव रसः'। (पृ. २५.)

इति गद्येन अभिनव-मम्मटसम्मतं रसस्वरूपं पण्डितराजेनोक्तम्। भग्नावरणकचिद्भास्यः प्राग्विनिविष्टवासनारूपो रत्यादिरेव रसः इति तदीयमतसारांशः।

'व्यक्तः स्सतैः विभावाद्यैः स्थायिभावो रसः स्मृतः' इति मम्मटोक्तावपि, व्यक्तः व्यक्तिविषयीकृतः,रसः व्यक्तिश्च भग्नावरणा चित् इत्यर्थस्वीकारात् इदमेव मतं फलति।

**स्वावलोकनप्रश्नाः**

१. अभिनव-मम्मटमतयोः कः सारः ?

### (आ) रसगद्यविवरणम्

अभिनवगुप्तमतानुसारेण वासनारूपा एव रत्यादयः रसशब्दव्यवहार्याः । अयमेवांशः भट्टनायकमतात् अभिनवगुप्तमतस्य वैलक्षण्यस्य सम्पादकः । तदिदम् अभिनवगुप्तमतं पण्डितराजेन वेदान्तदर्शनमाश्रित्य व्याख्यातम्। तथा हि– आत्मा सच्चिदानन्दमयः। तत्र आत्मनि आनन्दमये असत्त्वापादकं अभानापादकं चेति

शक्तिद्वयविशिष्टम् अज्ञानम् अस्ति। तत्र काव्य-नाटकयोः सामाजिकस्य प्रकृत्या, तयोश्च सामान्यतः दर्शनेन असत्त्वापादकम् अज्ञानं निवार्यते। अभानापादकम् आनन्दांशावारकम् अज्ञानं तु व्यञ्जनाव्यापारेण निवार्यते। अयमेव व्यञ्जनाव्यापारः पण्डितराजेन अलौकिकव्यापारः इति शब्देन परिगणितः।

एवं व्यञ्जनाव्यापारेण आनन्दमयस्वप्रकाशस्वरूपस्य सहृदयात्मनः आवरणाज्ञाने निवारिते, सहृदये वासनारूपतया विद्यमानानां रत्यादिचित्तवृत्तीनां स्वप्रकाशचैतन्येन भाने तस्य रसास्वादो भवतीति पण्डितराजस्य वेदान्तदर्शनाधारं रसव्याख्यानम्। पण्डितराजोक्तरससूत्रे अलौकिकेन व्यापारेण इत्येतत्पर्यन्तं रसप्रकिया त्रिभिः सोपानैः निरूपिता ।

**स्वावलोकनप्रश्नाः**

१. अभिनवगुप्तमतानुसारं रसः कः ?

२. आनन्दानुभूतेः निवारकम् अज्ञानं कति विधम् ?

३. अज्ञानद्वयं कथं कथं निवार्यते ?

४. व्यञ्जनाव्यापारः किं शब्देन परिगणितः ?

५. पण्डितराजः रसनिरूपणावसरे कति सोपानानि प्रतिपादितानि ?

### (इ) रसास्वादसोपनानि

### (१) श्रवणम् अथवा दर्शनम्

प्रथमतः गुणालङ्कारसुन्दरकाव्यस्य पठनम्, समुचितललितसन्निवेशचारुणः नाट्यस्य दर्शनञ्च भवति । तदिदं वेदान्ते ब्रह्मसाक्षात्कारे श्रवणसोपानेन तुलयितुं शक्यते ।

### (२) भावना (मननम्)

ततः काव्यस्य पठने वा नाटकस्य दर्शने वा विभावानुभावव्यभिचारिणाम् अर्थात् शकुन्तला-तच्चेष्टा-हर्षादिलक्षणानां भावनां विशेषेण भावना सहृदयस्य हृदये प्रचलति। तदा शृङ्गारादिरसविषये शकुन्तलादयः साधारणीभूताः सहृदयेन प्रतीयन्ते । दुष्यन्तरमणीत्वादिधर्मविगलनञ्च भवति। इदमेव भावना सोपानम्। भावनं चेदं सहृदयस्यैव व्यापारः न शब्दस्य।

### (३) चर्वणा व्यञ्जना (निदिध्यासनम्)

विभावानुभावव्यभिचारिणां भावनाव्यापारेण प्रत्येकशः भावना जायते। अनन्तरं सहृदयस्य संस्कारवशात् काव्यशब्दबलाच्च अखण्डचर्वणा काचित् उदेति। अस्याः अखण्डचर्वणायाः एव व्यञ्जनाव्यापारः, अलौकिकव्यापारः इति पण्डितराजस्य परिभाषा ।

**स्वावलोकनप्रश्नाः**

१. श्रवण-दर्शने वेदान्तदर्शने केन तुल्ये भवतः ?

२. भावना कस्य व्यापारः ?

३. व्यञ्जनाव्यापारस्य का परिभाषा ?

**(उ) रत्याद्यभिव्यक्तिप्रकारः**

एवं रसविषये चर्वणात्मकतृतीयसोपानेन आवरणाज्ञानस्य नाशे स्वप्रकाशात्मना रत्यादिवासनानां साक्षात्कारः भवति। तद्विषयः रत्यादिरेव रसः। अत्र च पण्डितराजेन घटशरावप्रदीपदृष्टान्तः दत्तः। यथा हि शरावादिना पिहितः मणिमयो दीपः तन्निवृत्तौ सन्निहितान् पदार्थान् प्रकाशयति, स्वयञ्च प्रकाशते, एवं 'आत्मचैतन्यमपि चर्वणाव्यापारेण आवरणाज्ञाने अपसारिते स्वंय प्रकाशमानं सत् विभावादिसंवलितान् रत्यादीन् प्रकाशयति।

एते च रत्यादयः वासनारूपाः इति अभिनवगुप्तेन उक्ताः न सर्वात्मना भ्रान्तिज्ञानविषयाः पदार्थाः। यतस्ते अलौकिकव्यवहारगोचराः अपि तु साक्षात् आत्मना भास्याः। अन्तःकरणधर्माणां वेदान्तिभिः साक्षिभास्यत्वमङ्गीकृतमिति। साक्षिभास्यत्वञ्च इन्द्रियव्यापारसम्बन्धमन्तरा साक्षात् आत्मचैतन्यभास्यत्वम्, अथवा विलक्षणमानसभावनात्मकान्तरवृत्तिवेद्यत्वम्। एवञ्च अन्तःकरणधर्माणां रत्यादीनां पूर्वोक्तं साक्षिभास्यत्वम्, तेषां इन्द्रियव्यापारमन्तरैव विलक्षणभावनावृत्त्या वेद्यत्वात् । रत्यादीनां भासकौ विभावानुभावौ तु स्वप्नतुरग इव रङ्गरजत इव प्रतिभासकौ साक्षिभासस्यौ च। तथा च अवास्तविकेभ्योऽपि विभावानुभावेभ्यः रत्यादिः असत्यसर्पात् रज्जोः भयमिव समुन्मिषति।

**स्वावलोकनप्रश्नाः**

१. घट-शराव-प्रदीपदृष्टान्तः कः ?

२. रत्यादयः केन भाष्याः ?

३. रत्यादीनां साक्षिभाष्यत्वं कथम् ?

४. विभावानुभावौ साक्षिभासकौ कथम् ?

५. विभावानुभावौ साक्षिभास्यौ कथम् ?

६. अवास्तविकेभ्यः विभावादिभ्यः रत्यादिः कथं भासते ?

### (ऊ) वेदान्तीकृतरसव्याव्यानम्

वेदान्तदर्शने जीवतत्साक्षिविषये अवच्छेद्यावच्छेदकभाववादः उपाध्युपाधेयभाववादः, बिम्बप्रतिबिम्बभाववादः चेति वादत्रयमस्ति। रसश्च आनन्दमयः । अतः 'रसो वै सः' इत्याद्युपनिषत् स्वारस्येन अवच्छेद्यावच्छेदकभावमाधारीकृत्य रसस्वरूपं किमिति पर्यालोचने तु रत्याद्यवच्छिन्ना भग्नावरणाचिदेव रसः इति रसस्वरूपं पर्यवस्यति। अन्तःकरणोपहितं चैतन्यं जीवसाक्षी इत्यत्र प्रसिद्धम् उपाध्युपाधेयभाववादमाधारीकृत्य रसस्वरूपपर्यालोचने तु 'रत्याद्युपहितं भग्नावरणं चैतन्यं रसः' इति द्वितीयमतम्। मतद्वयेऽपि रसस्य आत्मस्वरूपत्वान्नित्यत्वम् । एतदेव पण्डितराजसम्मतं मतम्।

**स्वावलोकनप्रश्नाः**

१. वेदान्तमते जीवतत्साक्षिविषये वादत्रयं किम् ?

२. **रसः ब्रह्मैव** इति उपपादकं श्रुतिवाक्यं किम् ?

३. अन्तःकरणोपहितं चैतन्यं जीवसाक्षी इत्यङ्गीकारे रसस्वरूपं किम् ?

## (ऋ) 'यद्वा'मतम्-(अथवा वेदान्तीकृतं द्वितीयं रसस्वरूपम्) पृ.२७

मतेऽस्मिन् रत्यादिः उपाधिः । द्वितीयमतमेव पण्डितराजेन 'यद्वा विभावादिचर्वणामहिम्ना' इत्यादिना व्याख्यातम्। विभावादिचर्वणायां जातायां सहृदयस्य निजसहृदयतासहकारेण स्थायिभाव-मुपाधित्वेन अवगाहमाना आनन्दाकारा चित्तवृत्तिः उपजायते, या च तन्मयीभवनशब्देनोच्यते इति द्वितीयमतसारांशः ।

एतन्मतावगाहनाय विस्तरशः किञ्चिदुच्यते । मतेऽस्मिन् रत्यादिः उपाधिरेव, न तु अवच्छेद्यावच्छेदकत्वपक्ष इव विशेषणम् । तत्र विशेषणं नाम कार्यान्वयी विद्यमानः व्यावर्तकश्च। यथा घटगतनैल्यादिः। स हि विशेष्ये घटे विद्यमानः, कार्येण विधेयेन, आनयनेन अन्वयी, अनीलेभ्यो व्यावर्तकश्च। उपाधिस्तु कार्यानन्वयी विद्यमानः व्यावर्तकः च। यथा 'कर्णशष्कुल्यवच्छिन्नं नभश्श्रोत्रम्' इत्यत्र कर्णशष्कुल्याम् आकाशात्मकस्य श्रोत्रस्य उपाधिः। तच्च शष्कुल्यं विधेयेन श्रोत्रत्वेन श्रोत्रव्यवहारेण नान्वेति। आकाशान्तरेभ्यो व्यावर्तकं च भवति। अपि च शाष्कुल्यं तत्र विद्यमानमेव, अतः उपाधिः।

एवमेवात्र 'रत्याद्यवच्छिन्नामनन्दमयचैतन्यं रसः' इति पक्षे अवच्छेद्ये चैतन्ये रत्यादेः अवच्छेदकतया विशेषणतया भानम्। यतः अवच्छेदकीभूतः रत्यादिः कार्ये रसत्वव्यवहारे अन्वयी, रसान्तरेभ्यः रसेतरेभ्यश्च व्यावर्तकः, विद्यमानश्च। एवञ्च रत्यादेः अवच्छेदकत्वे रसानुभवस्सविकल्पकः। रत्यादेः रसव्यवहारकार्याननन्वयित्वे तु केवलं रसादिव्यञ्जकचर्वणाविषयैः तदानीं विद्यमानैरप्यज्ञातैः रत्यादिभिः रसान्तरेभ्यः व्यावृत्तिसम्पादनात् शब्दग्रहणवेलायामनुपयोगिनः कर्णशष्कुल्या इव रसानुभववेलायामनुपयोगिनः रत्यादेः उपाधिमात्रत्वमेव।

एवञ्च 'रत्याद्युपहितं चैतन्यं रसः' इत्येतन्मते रसास्वादे रत्यादिविकल्पस्य अभावात्, केवलमानन्दाकारा-कारितायाः चित्तवृत्तेरेव अनुभूयमानत्वात् चित्तवृत्तेः आनन्दैकात्मना प्रकाशात् रसप्रतीतिः निर्विकल्पकसुखात्मिका। एतदेव मतम् 'प्रतीतिर्जायते चास्य निर्विकल्पसुखात्मिका' इति भक्तिरसायने मधुसूधनयतीन्द्रेणापि प्रतिपादितम्।

एवञ्च मतेऽस्मिन् रसानुभवः निर्विकल्पकसमाधेः आनन्देन तुल्यः। अत्र स्थायी भावः आनन्दांशसंयोजकतया उपाधिः निमित्तमात्रं भवति। 'रत्याद्यवच्छिन्ना चिदेव रसः' इति मते तु आनन्दे विशेषणविधया रत्यादीनां वैशिष्ट्यं भासते। अतः सः सविकल्पकास्वाद इति वक्तव्यम् ।

**स्वावलोकनप्रश्नाः**

१. अस्मिन् मते रत्यादिः कः ?

२. उपाध्युपाधेयभावे कः दृष्टान्तः ?

३. दार्ष्टान्तिके दृष्टान्तः कथम् अन्वेति ?

४. सविकल्पकास्वादो नाम कः ?

५. रत्यादिभिः रसान्तरेभ्यः कथं व्यावृत्तिः ?

## (ऋ) रसस्य नित्यत्वानित्यत्वव्यवस्था

एवं वेदान्तभाषायां रसः नित्यः चित्स्वरूपश्च। 'रसो वै सः' 'रसँ ह्येवायं लब्ध्वाऽऽनन्दी भवति' इति श्रुतिस्वारस्यात् । अर्थात् 'रसो वै सः' इत्यादिश्रुतेः रत्याद्यवच्छिन्नचैतन्ये वा, रत्याद्युपहितचैतन्ये वा तात्पर्यकल्पनात्, चैतन्यस्य च विशेष्यांशस्य नित्यत्वात् स्वप्रकाशत्वात् रसस्य नित्यत्वं स्वप्रकाशत्वञ्च । विशेषणांशस्य अथवा उपाधिभूतस्य रत्यादेः अनित्यत्वात् इतरभास्यत्वाच्च रसस्य अनित्यत्वम् इतरभास्यत्वञ्च सिद्धम् —इत्येका रसस्य नित्यानित्यत्वव्यवस्था । 'उपहितं विशेषितं वा चैतन्यमेव रसः' इति पक्षे रसस्य नित्यत्वे 'उत्पन्नो रसः, विनष्टो रसः' इत्यादयः व्यवहाराः कथं सङ्गच्छेरन् इत्युक्ते वर्णनित्यतावादिमते गकारादिवर्णस्य उत्पत्तिविनाशवत् इति समाधानम् ।

यथा हि गकारादेः वर्णस्य नित्यत्वं स्वीकुर्वतां मीमांसकवैयाकरणादीनां मते वर्णव्यञ्जकताल्वोष्ठपुटव्यापारगतौ उत्पत्तिविनाशौ वर्णे गकारादौ समारोप्य 'उत्पन्नो गकारः' 'विनिष्टः गकारः' इति व्यवहाराः निरूह्यन्ते, एवमेव रसव्यञ्जकचर्वणागतोत्पत्तिविनाशौ रसे समारोप्य 'उत्पन्नो रसः' 'विनष्टो रसः' इत्यादयः व्यवहाराः कथञ्चिन्निर्वोढव्याः। किञ्च रसानुभवः किं प्रत्यक्षः ? उत शाब्दः इत्युक्ते पण्डितराजस्य इदमुत्तरम्— 'तत्त्वं वाक्यजबुद्धिवत्' इत्याहुः अभिनवगुप्तपादाचार्याः इति।

**स्वावलोकनप्रश्नाः**

१. रत्याद्यवच्छिन्नचिदेव रसः इत्यत्र विशेष्यांशः कः ? विशेषणांश्च कः ?

२. कथं रसः नित्यः ?

३. कथं रसः अनित्यः ?

४. **उत्पन्नो रसः विनष्टो रसः** इत्यादिव्यवहाराः कथं सङ्गच्छेरन् ?

### (ऌ) रसानुभवस्य शाब्दापरोक्षत्वम्

तार्किकमते प्रत्यक्षानुभवः अन्यः शब्दानुभवश्च अन्यः। प्रत्यक्षानुभवस्य च शब्दत्वं तार्किकमते न युज्यते। 'इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं अव्यपदेश्यम्' इत्यादिन्यायसूत्रात्। किन्तु वेदन्तिभिः 'दशमस्त्वमसि' तत्त्वमसि' इत्यादिवाक्यस्थले शाब्दापरोक्षानुभवः स्वीकृतः। यथा 'अहं ब्रह्माऽस्मि' इति चित्तवृत्तेः अथवा 'दशमोऽहमिति' चित्तवृत्तेः 'तत्त्वमसि' 'दशमस्त्वमसि' इत्यादिगुरु-आप्तोपदेशजन्यत्वेन शाब्दत्वम्, स्वतः अपरोक्षतया जायमानत्वात् अपरोक्षत्वम् एवमेव काव्यशब्दजन्यचर्वणाविकसितरत्यादिचित्तवृत्तेः शाब्दत्वम् अपरोक्षसुखालम्बनत्वेन अपरोक्षत्वञ्च । तथा च रत्यादिः शाब्दपरोक्षानुभवविषयः इति पण्डितराजव्याख्यातम् अभिनवगुप्तमतम्।

**स्वावलोकनप्रश्नाः**

१. प्रत्यक्षानुभवस्य शाब्दत्वं कैः नाङ्गीक्रियते ?

२. प्रत्यक्षानुभवस्य शाब्दत्वं कैः अङ्गीक्रियते ?

३. प्रत्यक्षानुभवस्य शाब्दत्वानङ्गीकारे तार्किकाणां किं सूत्रं प्रमाणम् ?

४. रसस्य अपरोक्षत्वं कथम् ?

५. रसस्य शाब्दत्वं कथम् ?

इदानीं भट्टनायकमतं पश्यामः

## III. 2. ii. भट्टनायकमतम्

भावकत्वव्यापारेण भावितः साधारणीकृतः, सत्त्वोद्रेकप्रकाशानन्दमयसंविद्विश्रान्तिरूपेण भोजकत्वव्यापारेण भुज्यमानः रत्यादिः रसः —इति पण्डितराजप्रतिपादितस्य भट्टनायकमतस्य सारांशः।

### (अ) भट्टनायकस्य पूर्वपक्षः

भट्टलोल्लट-श्रीशङ्कुकाभ्यां क्रमेण अनुकार्यगतत्वेन, अनुकर्तृगतत्वेन च रसस्य भानमिति ताटस्थ्येन रसप्रतीतिः अङ्गीकृता। ताटस्थ्येन तथा रसप्रतीतौ नास्ति कश्चित् चमत्कारः। सहृदयगतत्वेन रसप्रतीतिस्तु दुर्लभा। शकुन्तलादीनां सामाजिकान् प्रति अविभावत्त्वात् । न च विभावं विना अनालम्बना रसप्रतीतिः जायते। न च शकुन्तलायामपि कन्तात्वम् अस्तीति, तत एव रसः प्रतीयताम् इति वाच्यम्।

यस्यां कान्तायाम् अप्रामाण्यानिश्चयानालिङ्गितम् अगम्यात्वप्रकारकं ज्ञानं विशेष्यतासम्बन्धेन नास्ति, तादृशकान्तात्वस्य विभावतावच्छेदकत्वात्। अन्यथा कान्तात्वस्य स्वस्रादावपि सत्त्वेन ततोऽपि रसोद्बोधापत्तिः।

अत्र विभावतावच्छेदककोटौ अगम्यात्वप्रकारकज्ञाने अप्रमाण्यनिश्चयानालिङ्गितत्वस्य अनिवेशे केवलागम्यात्मकप्रकारकज्ञानविरहः रसप्रतीतिं प्रति उपायः इति पर्यवस्येत्। एवं सति यत्रागम्यात्वप्रकारत्वज्ञाने 'इदं ज्ञानमप्रमा' इति अप्रामाण्यनिश्चयो जातः, तत्र अगम्यात्वप्रकारकज्ञाने सत्यपि, तस्य अप्रामाण्य- निश्चयालिङ्गितत्वेन रसविरोधित्वाभावात् रसानुभवः, अनुभवसिद्धः। ततश्च तत्र अगम्यात्वप्रकारकज्ञानविरहरूप-कारणाभावेऽपि कार्योत्पत्त्या व्यतिरेकव्यभिचारः स्यात् । अतः विभावतावच्छेदककोटौ अप्रमाण्यनिश्चयानालिङ्गितत्वं विशेषणम् । एवमभावप्रतियोगिभूतं ज्ञानमपि अत्र विशेष्यतासम्बन्धेन निरूप्यते।

तत्र किं कारणमित्युक्ते— आत्मगुणः ज्ञानम्, आत्मनि समवायसम्बन्धेन तिष्ठति। अगम्यात्वप्रकारकज्ञानं तु अत्र कान्तायां न समवायसम्बन्धेन भवितुमर्हति। कान्तायाः इदंशब्दप्रतिपाद्यायाः 'इयमगम्या' इति ज्ञाने विशेष्यत्वात्, विशेष्यतासम्बन्धेन एव तादृशं ज्ञानं कान्तायामनुसन्धीयते। तर्हि विभावतावच्छेदकीभूतम् अगम्यात्वप्रकारकं ज्ञानं कथं नोत्पद्यते

इत्यत्र ज्ञानानुत्पत्तिसामग्री वक्तव्या। स्वात्मनि दुष्यन्ताभेदबुद्धिरेव अगम्यात्वप्रकारकज्ञानप्रतिबन्धे कारणमिति चेन्न। आत्मनः नायकस्य च कापुरुषत्वधीरत्वादिनानाविधधर्मैः भेदस्य उपलम्भात्। अतश्च अनास्वाद्यत्वात् परगतत्वेन, उपायाभावाच्च आत्मगतत्वेन वा रसप्रतीतिः न युज्यते।

किञ्च जायमाना एषा रसप्रतीतिः किं शाब्दी उत मानसी आहोस्वित् स्मृतिर्वा ? यदि शाब्दी इत्युच्येत, व्यावहारिकशब्दान्तरजन्यनायिकानायकमिथुनवृत्तान्तवित्तीनामिव (ज्ञानानामिव) अस्यापि अहृद्यत्वं प्रसज्येत।

न द्वितीयः। चिन्तोपनीतानामेव पदार्थानां मानससाक्षात्कारगोचरताप्रतीतेरस्याः मानसिक-साक्षात्कारगोचरत्वायोगात्। न तृतीयः। इतः पूर्वम् अन्यविधस्य रसानुभवस्य अभावात्। अतः रसः कुत्र प्रतीयते। रसप्रतीतिः कीदृशी ? इत्यादिप्रश्नानां समाधानस्य प्राचीनमते दुर्लभतया भट्टनायकमतं स्वीक्रियते।

**स्वावलोकनप्रश्नाः**

१. तारतम्येन रसप्रतीतिः कैः अङ्गीक्रियते ?

२. तारतम्यं नाम किम् ?

३. स्वस्रादेः रतिः कथं चमत्कारिता ?

४. **अगम्या** इत्यस्य अर्थः कः ?

५. रसप्रतीतिः कुतो न मानसी ?

६. रसप्रतीतिः कुतः न स्मृतिः ?

७. रसप्रतीतिः कुतः न शाब्दी ?

८. भट्टनायकस्य मतस्य किमर्थं स्वीक्रियते ?

## III. 2. iii. भट्टनायकमतसिद्धान्तः

भट्टनायकमते अभिधा-भावना-भोजकत्वम् इति व्यापारत्रयं शब्दे स्वीक्रियते । तत्र अभिधाव्यापारेण सामान्यतया पदार्थाः उपस्थाप्यन्ते । भावकत्वव्यापारेण तु अगम्यात्वादिरसविरोध-ज्ञानप्रतिबन्धद्वारा कान्तात्वादिरसानुकूलधर्मपुरस्कारेण उपस्थाप्यन्ते । नाम दुष्यन्तशकुन्तलादेश-कालवयोऽवस्थादीनां साधारणीकरणं क्रियते । अर्थात् केवलं शकुन्तलाशब्दनिष्ठभावकत्वमहिम्ना आदर्शप्रेममयी नायिकैव प्रतिभाति। शब्दनिष्ठभावकत्वप्रभावादेव अगम्यात्वादिरसविरोधिज्ञानप्रति-बन्धश्च भवति इति तादृशज्ञानानुत्पत्तौ पूर्वपक्षिणा सम्भावितः उपायाभावोऽपि परास्तः । ततः भावकत्वव्यापारस्य महिम्ना भावनोपनीतः साधारणात्मा रत्यादिः स्थायीभावः विषयीक्रियते ।

एवं मतेऽस्मिन् रत्यादेः वासनात्मकत्वानभ्युपगमेऽपि भावनया काव्यनायकदेशात् सुहृदयदेशं प्रति रत्यादेः उपनीतत्वात्, रसनिष्पत्तिकाले पूर्वमविद्यमानस्य रत्यादेः कथमागमः इति शङ्काऽपि परास्ता । एवं भावितः साधारणीकृतः रत्यादिरेव भट्टनायकमते रसः । ततः रत्यादेः रसीभावप्रापणेन भावकत्वे कुण्ठीभूते, तृतीयं भोजकत्वम् उपक्रान्तस्वकार्यं भवति।

भोजकत्वञ्च सत्त्वोद्रेकप्रकाशानन्दमयसंविद्विश्रान्तिलक्षणमिति भट्टनायकः भोजकत्वस्य स्वरूपमभिप्रैति। सहृदयचित्ते त्रयो गुणाः सत्त्वरजस्तमोरूपाः भवन्ति। तत्र यावता रजस्तमसोः चित्ते प्रभावः, तावता सहृदयस्य लौकिक्याः क्रियाशक्तेः, तमः प्रभावेण विषयाभानात्मकावरणस्य च सद्भावात् संविदः रत्यादिचित्तवृत्तेः प्रकाशः न भवति।

किञ्च सुखकारिणः सत्त्वस्यापि उद्रेकाभावे जाताऽपि रत्यादिचित्तवृत्तिः असात्त्विकी सती सुखमाधातुं न प्रभवति। अतः भोजकत्वव्यापारवशात् निगीर्णयोः रजस्तमसोः सत्त्वोद्रेकेण प्रकाशानन्दमयस्य आत्मचैतन्यस्य संविदि रत्यादिचित्तवृत्तौ विश्रान्तौ सत्यां रसानुभवः भवति। तत्र 'रसो वै सः' इति उपनिषत्स्वारस्यस्वीकारे रत्यादिभोगो रसः। अन्यथा तु केवलरससूत्राधारेण भुज्यमानः रत्यादिरेव रसः। भोगोऽयं विषयसंवलनात् ब्रह्मानन्दसब्रह्मचारी इत्युच्यते। अभिनवगुप्तमते भावनायाः शब्दनिष्ठव्यापारत्वेन स्वीकृतिः नास्ति। एतन्मते तु शब्दनिष्ठव्यापारत्वेन स्वीकारः इति विशेषः ।

**स्वावलोकनप्रश्नाः**

१. भट्टनायकमते कति व्यापाराः ?

२. अभिधाव्यापारेण किं ज्ञायते ?

३. भावनाव्यापारस्य कः महिमा ?

४. भोजकत्वव्यापारेण किं जायते ?

५. भोजकत्वं नाम किम् ?

६. सत्त्वोद्रेकः कथं जायते ?

७. भोगो कथं ब्रह्मानन्दसविधवर्ती ?

८. भट्टनायकस्य रसलक्षणं किम् ?

इदानीं नव्यमतम् निरूपयामः।

## III. 2. iv. नव्यमतम्

नव्यमते अनिर्वचनीयः साक्षिभास्यः शकुन्तलादिविषयकः रत्यादिरेव तत्कालोत्पन्नः सन् रसशब्दव्यपदेश्यः।

अयंभावः । वेदान्तिनः अनिर्वचनीयख्यातिं स्वीकुर्वन्ति। तन्मते इतरमतानुसारेण भ्रन्तिज्ञान-विषयः पदार्थः अनिर्वचनीयः। शुक्तिकाशकले जायमानं रजतज्ञानं सद्वा असद्वा इत्यक्ते सदसद्विलक्षण-मिति सिद्धान्तः। सच्चेत् न बाध्येत असच्चेत् न प्रतीयेत । अतः इदं सदसद्विलक्षणमिति तत्प्रतिपादिता युक्तिः।

## १. रसप्रक्रिया

काव्येन कविः, नाट्येन नटश्च विभावादीन् प्रकाशयति। अनन्तरं व्यञ्जनाव्यापारेण दुष्यन्तादौ नायके शकुन्तलादिरतिः गृहीता भवति। सहृदयश्च व्यञ्जनाव्यापारेण गृहीतं रत्यादिकं स्वकीय सहृदयतोल्लासितेन भावनाविशेषरूपेण दोषेण सम्यक् भावयति। दोषवशादेव सहृदयात्मा दुष्यन्तत्वधर्मेण आच्छाद्यते।

अयमभिप्रायः। यथा रजाताकाराविद्यादूषिते अन्तःकरणवृत्तिसंसृष्टे बाह्ये शुक्तिका-सम्बद्धचैतन्ये (शुक्तिकावच्छिन्नचैतन्ये) रजताविद्याकाले अनिर्वचनीयं रजतमुत्पद्यते, एवमेव सहृदयावच्छिन्ने चैतन्ये भावनया दुष्यन्ताकाराविद्यादूषिते दुष्यन्तत्वधर्मः अनिर्वचनीयः उत्पद्यमानः भवति। तेन च साक्षिभास्यानिर्वचनीयशकुन्तलादि-विषयकः रत्यादिरपि प्रातिभासिकतया उत्पद्यते। तथा प्रतिभासकाले भासमानः रत्यादिरेव रसः। तस्मिन् च समये अज्ञानावच्छिन्ने आत्मनि शुक्तिकाशकले रजतखण्डवत् दुष्यन्तत्वावच्छादिते स्वात्मनि अनिर्वचनीयः रत्यादिः उत्पद्यते स एव रसः।

## २. रसादेः नित्यताद्युपपादनम्

अयञ्च रसः भावनात्मकदोषविशेषजन्यत्वात् 'उत्पन्नः' इति, भावनात्मकदोषविशेषनाशात् 'विनष्टः' इति च व्यवहारस्य विषयः। उत्पन्नरत्यादेः सुखप्रदत्वात् स्वोत्तरभाविना लोकोत्तराह्लादेन भेदाग्रहात् सुखपदव्यपदेशश्च भवति। सुखात्पूर्वोपस्थितेन रत्यादिना रसस्य भेदाग्रहात् व्यङ्ग्यत्वम्, वर्णनीयत्वञ्च।

अवच्छेदकं दुष्यन्तत्वमप्यनिर्वचनीयमेव। अवच्छादकत्वञ्च 'दुष्यन्तोऽहं शकुन्तलाविषय-करतिमान्' इत्यादिरत्यादिविशिष्टबोधे विशेष्यतावच्छेदकत्वम्। तत्र च अहं विशेष्यः। विशेष्यतावच्छेदकत्वं तु दुष्यन्तत्वम्।

## ३. भावनात्मकदोषविशेषस्य फलानि

मतेऽस्मिन् भावनात्मकदोषविशेषः स्वीकृतः—

**(अ)** तेन च स्वात्मनि दुष्यन्ताभेदबुद्धिः जायते। तथा सहृदयस्य दुष्यन्तीभवनाच्च शकुन्तलायाः तं प्रति विभावत्वेन निर्बाधं रसोद्बोधः ।

**(आ)** भट्टनायकेन विभावादीनां साधारणीकरणाय, शकुन्तलादौ अगम्यात्वज्ञानपरिहाराय च भावनात्मकः शब्दनिष्ठव्यापारः कल्पितः। किन्तु मतेऽस्मिन् भावनात्मकदोषविशेषस्य सहृदयनिष्ठतया स्वीकारात्, शब्दनिष्ठतया तादृशव्यापारान्तरस्वीकारावश्यकता नास्ति। ततश्च शब्दे भावनात्मकव्यापाराकल्पनेन लाघवम्।

एवं भट्टनायकपूर्वपक्षोक्तः रसप्रतीत्युपायाभावदोषोऽपि नास्ति। भावनादोषेण सहृदयस्य दुष्यन्तीभवनात्। यदयप्यत्र भट्टनायकेन सहृदयस्य रसप्रतीतौ साधारणीकरणमुपायः इति तदपि न शोभनम्। काव्ये शकुन्तलात्वादिप्रकारकबोधजनकेषु शकुन्तलादिशब्देषु सत्सु, चेतने सहृदये भावनात्मकदोषं विना केवलशब्दगतभावनामात्रेण शब्दोपस्थाप्यशकुन्तलात्वादीनामप्रच्युतेः। अङ्गीकृते च सहृदयनिष्ठभावनात्मकदोषे तेनैव रसप्रतीतिनिर्वाहे व्यर्थं साधारणीकरणेन।

### ४. भावनात्मकदोषे दोषः, तन्निवारणम्, करुणादिषु रसव्यवस्था च

ननु भावनात्मकदोषविशेषस्वीकारेण सहृदयात्मनि दुष्यन्तादितादात्म्येन यतः शृङ्गाररसस्थले रतेः सुखविशेषजनकता, एवं करुणरसस्थले शोकादिमद्दशरथादितादात्म्येन सहृदयस्य दुःखमवश्यं भवेत् किल। न च सत्यादेव शोकात् दुःखम्, न कल्पितादिति वाच्यम्। एवं सति रज्जुसर्पादेः भयकम्पाद्यनापत्तेः। तथा कल्पितायाः रतेः सुखप्रदञ्च न स्यात्। तर्हि भावनात्मकदोषेण सहृदये नायकतादात्म्यस्वीकारे सर्वेषु रसेषु नैयत्येन सुखप्रदत्वं कथम् ? कथं वा करुणादिषु रसत्वव्यवस्था इति चेत् अत्रोच्यते।

शृङ्गारप्रधानेभ्यः काव्येभ्यः इव करुणरसप्रधानेभ्यः केवलसुखास्वादः सहृदयहृदयप्रमाणकः, तर्हि कार्यानुरोधेन कारणस्य कल्पनीयतया लोकोत्तरकविव्यापारस्य आह्लादप्रयोजकत्वमिव दुःखप्रतिबन्धकत्वं कल्पनीयम्।

अयं भावः। लोके कश्चित् पुरुषः दुःखसन्निवेशं प्राप्तः तत्र दुःखस्य प्रतीकारादिचिकीर्षया कदाचित् दुःखनिवारणोपायानाकलनाच्च दुःखातिरेकमेव प्राप्नोति। पश्चात् स एव पुरुषः कालान्तरे दुःखविषये प्रतीकारनिवारणौपयिककर्तव्यशून्यः पूर्वदशायामिव दुःखे मग्नो न भवति। किन्तु सहृदयतया दुःखस्य विलक्षणस्मृतिमेव लभते। कालान्तरे तस्यैव पुरुषस्य दुःखसन्निवेशः केनचिन्महाकविना गुण-अलङ्कार-अङ्गभावैः परिपुष्टः वर्णितश्चेत्, तस्य दुःखमपि स्वाद्यमेव भवति। यत्र केवलम् आनन्दांश एव अवशिष्यते। अतः लोकोत्तरकविव्यापारस्य दुःखसामग्री प्रतिबन्धकत्वमनुभवसिद्धम् ।

अथ यदि करुणरसस्थले दुःखं सुखमुभयमप्यास्वाद्यम् इत्यस्ति सहृदयानुभवः, तर्हि तत्र दुःखानुभूतेरपि अपेक्षितत्वात् कार्यानुरोधेन कारणस्य कल्पनीयतया लोकोत्तरकविव्यापारस्य दुःखप्रतिबन्धकत्वं नास्तीत्येव कल्प्यते। ननु तर्हि यदि करुणादिस्थले दुःखमपि भवतीत्युच्येत ; अनिष्टे विषये कवीनां कर्तुं प्रवृत्तिः कथम्? सहृदयानाञ्च श्रोतुं कथं प्रवृत्तिः ? तादृशकाव्यस्य दुःखसाधनत्वेन निवृत्तेरेव उचितत्वात् इति चेत् इष्टस्याधिक्यात् अनिष्टस्य न्यूनत्वात् चन्दनद्रवलेपादाविव प्रवृत्तेः इति समाधानम्। केवलाह्लादवादिनान्तु दुःखस्य ईषदपि स्पर्शाभावात् प्रवृत्तिरुपपन्नैव।

ननु करुणरसस्थले अश्रुपाताद्यनुभावेषु सत्सु, तेषां दुःखैककार्यत्वात् केवलास्वादवादः कथमुपपन्नः इति वाच्यम्। अश्रुपातादीनाम् अपि तत्तदानन्दानुभवस्वाभाव्यादेव उपपत्तिः न दुःखात्। अत एव भगवद्वर्णनाकर्णनात् अश्रुपातादयः उपपद्यन्ते। न हि तत्र जात्वपि दुःखानुभवः अस्ति ।

ननु यदि करुणरसादौ स्वात्मनि शोकादिमद्दशरथतदात्म्यारोपे यद्याह्लादः, तर्हि स्वप्नादौ सन्निपातादौ वा स्वात्मनि शोकादिमद्दशरथतदात्म्यारोपेऽपि कथं न दःखम् इति चेत् उच्यते। स्वाप्निकाविद्याजन्यत्वात्, सन्निपातादिरोगजन्यत्वविलक्षणकाव्यव्यापारजन्यत्वाभावेन न तत्र सुखास्वादः । लोकोत्तरकाव्यव्यापारस्य हि अयं महिमा यत्प्रयोज्याः अरमणीयाः शोकदयोऽपि अलौकिकमाह्लादं जनयन्ति।

एवञ्च पूर्वोक्तयुक्त्या लौकिकदुःखस्य लौकिकसामग्रीप्रयोज्यत्वेन दुःखैकप्रदत्वम्। अलौकिकदुःखास्वादस्य तु लौकिकदुःखभूयिष्ठसामग्रीदूरीकृतत्वेन प्रत्युत सुखोत्पादकरत्यादिभावनाजनककाव्यव्यापारेण परम्परया जन्यत्वात् काव्यव्यापारजत्वेन सुखप्रदत्वमेव । आह्लादे काव्यव्यापारजन्यत्वञ्च स्वजन्यभावनाजन्यरत्यादि-विषयकत्वम्। स्वम् अलौकिककव्यव्यापारः, तज्जन्या रत्यादिभावना, तज्जन्यः रत्यादिविषयकः आस्वादः, तद्विषयत्वं रत्यादौ तत्कत्वं पुनः आस्वादे अस्तीति समन्वयः। ततश्च करुणादीनां केवलानन्दप्रदत्वमपि सुस्थम् ।

**स्वावलोकनप्रश्नाः**

१. **अनिर्वचनीयख्यातिः** नाम का ?

२. सहृदयात्मा केन आच्छाद्यते कथम् ?

३. सामाजिके अनिर्वचनीयरत्यादिः कथमुत्पद्यते ?

४. अस्मिन् मते **रसः उत्पन्नः, विनष्टः** इति कथम् ?

५. रसस्य व्यङ्ग्यत्वं वर्णनीयत्वं च कथम् ?

६. अवच्छेदकम् अनिर्वचनीयं कथम् ?

७. भावनात्मकदोषविशेषकल्पनस्य फलद्वयं किम् ?

८. दुःखप्रतिबन्धकत्वं कुत्र कल्पनीयम् ?

९. करुणरसप्रतीतौ अश्रुपातादि कथं समर्थ्यते ?

१०. आह्लादे काव्यपारजन्यत्वं नाम किम् ?

साम्प्रतम् 'परे तु' मतम् पर्यालोचयामः ।

## III. 2. v. 'परे तु' मतम्

एतन्मतञ्च पण्डितराजेन नव्यन्यायदर्शनद्वारेण कल्पितम्। नैयायिकाः व्यञ्जनाव्यापारं नाभ्युपगच्छन्तीति विदितचरमेव। तर्हि व्यञ्जनाव्यापाराभावे काव्ये दुष्यन्ते शकुन्तलाविषयकरतेः ग्रहणं कथमिति चेत् 'दुष्यन्तश्शकुन्तलाविषयकरतिमान् तदनुकूलचेष्टावत्त्वात्' इति चेष्टालिङ्गकानुमानात् दुष्यन्तरतिग्रहणं कर्तव्यम्। पूर्वनव्यमत इव अत्रापि भावनात्मकदोषविशेषस्य स्थानमस्ति। तेन च अहं दुष्यन्तश्शकुन्तलाविषयकरतिमान् इति स्वात्मनि दुष्यन्तादितादात्म्यावगाही मानसबोधः काव्यार्थभावनया विलक्षणविषयताशाली जायते।

स्वप्नादिज्ञानन्तु रत्यादिविषयकमपि न काव्यार्थभावनाजन्मेति, न रसः। मतेऽस्मिन् स्वस्मिन्नविद्यमानस्य रत्यादेः कथमनुभवः ? इति प्रश्ने उपस्थिते लौकिकसाक्षात्कार एव विषयसद्भावस्य अपेक्षणात्, अलौकिकप्रत्यक्षे चानपेक्षणात् इति पण्डितराजस्य समाधानम्। तथा हि– 'सुरभि चन्दनम्' इति चन्दनचाक्षुषप्रत्यक्षे जायमाने, ज्ञानलक्षणाप्रत्यासत्त्या नीतस्य सौरभस्य तद्देशे घ्राणसन्निकर्षाभावेऽपि यथा अलौकिकप्रत्यक्षम्, एवमेव स्वात्मनि दुष्यन्तत्व-शकुन्तलाविषयकरत्योः अभावेऽपि ज्ञानलक्षणाप्रत्यासत्या उपनीतयोः तयोर्भानम् इति। एतच्च रसज्ञानं विलक्षणविषयताशालि ।

**(१)** तत्र प्रथमे ज्ञाने दुष्यन्तत्वं धर्मितावच्छेदकं स्वात्मा विशेष्यभूतः, शकुन्तलादिरतिश्चात्र प्रकारः। तदाकारश्च 'दुष्यन्तोऽहं शकुन्तला विषयकरतिमान्'।

**(२)** द्वितीयज्ञाने स्वात्मविशिष्टो विशेष्यः शकुन्तलादिविषयकरतिमद्दुष्यन्तः अभेदेन प्रकारः। तदाकारश्च अहम् (स्वात्मत्वविशिष्टः) शकुन्तलाविषयकरतिमद्दुष्यन्तः।

**(३)** तृतीयज्ञाने तु स्वात्मविशिष्टदुष्यन्तत्वं शकुन्तलाविषयकरतिश्च उभयमपि पृथगेव प्रकारः। तदाकारश्च– अहं दुष्यन्तः शकुन्तलाविषयकरतिमांश्च। एवं पृथक् दुष्यन्तत्वशकुन्तला-विषयकरत्योः भानात्, क्वचिद्विशेषणविशेष्यभावापन्नतया भानात् विलक्षणविषयताशाली रसः इति पण्डितराजेन प्रतिपादितम्।

मतेऽस्मिन् रसानुभवः मानसप्रत्यक्षात्मकः, न श्रीशङ्कुकमत इव अनुमितिरूपः। अत एव तार्किकमतादपि तस्मात् एतत् तार्किकमतं विलक्षणम्। भावनात्मकदोषस्वीकारात् नव्यमतेन सलक्षणम्, व्यञ्जनाव्यापारास्वीकारात् तस्मात् विलक्षणञ्च। अनुमानं स्वीकृतमपि रतिज्ञानाङ्गतयैव स्वीकृतम्, न प्रधानीभूत रसास्वादांशे। मुख्यतया मानसरत्यादिबोध एव रसः। रसास्वादः इत्यादौ रसपदन्तु रत्यादिपरमिति शम्।

**स्वावलोकनप्रश्नाः**

१. परकीयमतं केषां भवति ?

२. परकीयमते रसज्ञानं कीदृशम् ?

> ३. परकीयमते रसज्ञानानि कति ?
>
> ४. अस्मिन् ज्ञाने रसानुभवः कीदृशः ?
>
> ५. तार्किकमतात् एतत्तार्किकमतं कथं विलक्षणम् ?

सम्प्रति भट्टलोल्लट-श्रीशङ्कुकमते निरूपणीयतया अवशिष्टे।

## III. 2. vi. भट्टलोल्लटमतम्

अभिनवगुप्तप्रतिपादितदिशा भट्टलोल्लटमते विभावादिभिः उपचितः स्थायी भाव एव रसः। स च रामाद्यनुकार्यनायकनिष्ठः। तस्य च कथं वा साक्षात्कारः इत्युक्ते स्पष्टं उत्तरं अभिनवभारत्यां न दृश्यते। किन्तु पण्डितराजः कमनीयविभावाद्यभिनयप्रदर्शनकोविदे नटे रामादिनायकगतायाः उपचितायाः सीतादिविषयकरत्यादिचित्तवृत्तेः (नटे) समारोप्य साक्षात्कारः भट्टलोल्लटस्य सम्मतः इत्याह। एकधा कथनीये भट्टलोल्लटमते रसानुभवो नाम किञ्चित्भ्रान्तिज्ञानमिति पण्डितराजस्य व्याख्यानम्।

मतेऽस्मिन् रससाक्षात्कारः 'दुष्यन्तोऽयं शकुन्तलाविषयकरतिमान्' इत्येतादृशः। स च 'सुरभिचन्दनम्' इति अलौकिकचाक्षुषवत् धर्म्यंशे लौकिकः, आरोप्यांशे तु अलौकिकः। अर्थात् इदमंशे लौकिकः, इदमंशस्य चाक्षुषत्वात्, आरोप्यांशे रत्याद्यंशे तु अलौकिकः, इदंत्वेन गृहीते दुष्यन्ते विद्यमानस्य रत्यादेः सहृदयमनसा लौकिकसन्निकर्षेण असन्निकृष्टस्य लौकिकसन्निकर्षेणाभानात्, अलौकिकसन्निकर्षवेद्यत्वमेव। यथा दूरात् चन्दनखण्डे-धर्मिणि दृष्टे सति, चक्षिरिन्द्रियस्य रश्मिप्रभावात् चन्दनखण्डस्य साक्षात्कारः इति, धर्म्यंशस्य चाक्षुषत्वम्, घ्राणेन्द्रियस्य दूरस्य पुष्पवर्तिगन्धेन सह असन्निकृष्टत्वात् केवलं पूर्वानुभूतसौरभस्य स्मृत्यात्मकज्ञानसम्बन्धेन उपनीतस्य वेद्यत्वात्, सौरभस्य अलौकिकत्वम्।

**स्वावलोकनप्रश्नाः**

१. पण्डितराजमतानुसारं भट्टलोल्लटमते रसानुभवो नाम कः ?

२. भट्टलोल्लटमते रसज्ञानं कुत्र अलौकिकम् ? कुत्र लौकिकम् ?

३. अस्मिन् मते चन्दनखण्ड-तद्गन्धभानदृष्टान्तः कथं समन्वेति ?

## III. 2. vii. श्रीशङ्कुकमतम्

श्रीशङ्कुकमते रसः नटनिष्ठः। स च विभावादिभिः कृत्रिमैरपि अकृत्रिमतया अभिमन्यमानैः लिङ्गैः

पक्षीभूते दुष्यन्तत्वेन गृहीते नटे अनुमीयते। तथा च अनुमानम्। 'दुष्यन्तोऽयं शकुन्तलाविषयकरतिमान् तदनुकूल विभावानुभावव्यापारवत्त्वात् यन्नैवं तन्नैवम्' इति।

न च धारावाहिकभावनारूपज्ञानस्यैव अलौकिकचमत्कारकारित्वात् सकृत् जातायाः अनुमितेः अचमत्कारित्वात् कथं सहृदयस्य रसेन आनन्दः इत्युक्ते अनुमितेरपि धारावाहिकतया बोध इति सूचयन् पण्डितराजः 'अनुमीयमानो रसः' इत्याह। किञ्च दुष्यन्तोऽयमिति प्रत्यक्षसामग्री एकतः, 'दुष्यन्तोऽयं शकुन्तलाविषयकरतिमान्' इत्यनुमितिसामग्री चापरतः, तत्र 'भिन्ने विषये अनुमितिसामग्री प्रबला' इति न्यायेन अनुमितिसामग्र्याः प्रबलात् दुष्यन्तोऽयं शकुन्तलाविषयाकार-रतिमानिति अनुमितिरेव जायते, न प्रत्यक्षम्। इन्द्रियसम्बद्धमनसः अपेक्षया तर्कवदात्मसम्बद्धमनसः प्राबल्यात्' इति, श्रीशङ्कुकसिद्धान्तं पण्डितराजः कतिपययुक्तिभिः प्रतिष्ठापयामास। नायकत्वेन भासमाने नटे अनुमीयमानः रत्यादिरेव रसः। इत्येवं षण्मतानि निरूपितानि।

ततः मतद्वयं प्राक् दत्तमेव । परिशिष्टमतत्रयन्तु उत्सूत्रतया नाममात्रेणावतिष्ठित इत्युक्तमेव। तदिदानीम् अष्टसु मतेषु पण्डितराजप्रदर्शितं रससूत्रसमन्वयं पश्यामः ।

**स्वावलोकनप्रश्नाः**

१. श्रीशङ्कुकमते रसविषयकानुमानप्रकारः कः ?

२. कुत्र अनुमितिसामग्री प्रबला ?

३. **अनुमीयमानो रसः** इत्यस्य कः आशयः ?

४. श्रीशङ्कुकमते रसस्वरूपं किम् ?

# III. 3. विविधमतेषु रससूत्रसमन्वयः

(१) तत्र प्रथममते विभावानुभावव्यभिचारिभिः संयोगात्-व्यञ्जनात्, रसस्य आनन्द-विशेषणकस्थाय्यात्मनः अथवा स्थायिभावोपाधिकानन्दस्य निष्पत्तिः –स्वरूपेण प्रकाशनम्।

(२) भट्टनायकमते विभावानुभावव्यभिचारिणां भावकत्वव्यापारेण संयोगात्- साधारणतया सम्बन्धात्, रसस्य निजस्वरूपानन्दस्य निष्पत्तिः भोगाख्येन साक्षात्कारेण विषयीकृतिः इति भट्टनायकमते समन्वयः।

(३) विभावानुभावव्यभिचारिणां संयोगात् भावनारूपाद्दोषविशेषात्, रसस्य अनिर्वचनीय-दुष्यन्तरत्यात्मनः, निष्पत्तिः-प्रातिभासिकोत्पत्तिः इति तृतीये 'नव्यमते' समन्वयः।

(४) विभावादीनां संयोगात्-ज्ञानात्, रसस्य ज्ञानविशेषात्मनः निष्पत्तिः, इति चतुर्थे 'परे तु' मते समन्वयः ।

(५) भट्टलोल्लटमते तु विभावादीनां सम्बन्धात्, रसस्य रत्यादेः निष्पत्तिः-आरोपः इति पञ्चमे।

(६) षष्ठे तु संयोगात्-अनुमानात्, निष्पत्तिः अनुमितिः इत्यर्थः।

(७) सप्तमे विभावादीनां त्रयाणां संयोगात्-समुदायात्, रसनिष्पत्तिः रसपदव्यवहारः।

(८) अष्टमे तु संयोगपदस्य सम्यक् चमत्कारात् इत्यर्थः।

एवम् अष्टसु मतेषु रससूत्रसमन्वये ज्ञाते त्रिषु मतेषु रससूत्रविरोधः स्पष्ट एव। एवञ्च मिलितानां व्यञ्जकत्वे प्रामाणिके एकतरस्य नियतरसव्यञ्जकत्वानुपपत्तेः मिलितानामुपादानम्।

**स्वावलोकनप्रश्नाः**

१. पण्डितराजमते कति मतानि सूत्रानुकूलानि ?

२. अभिनवगुप्तमते संयोगनिष्पतिशब्दयोः अर्थः कः ?

३. भट्टनायकमते संयोगनिष्पतिशब्दयोः अर्थः कः ?

४. नव्यमते संयोगनिष्पतिशब्दयोः अर्थः कः ?

५. भट्टलोल्लटमते संयोगनिष्पतिशब्दयोः अर्थः कः ?

६. श्रीशङ्कुकमते संयोगनिष्पतिशब्दयोः अर्थः कः ?

७. सप्तममते संयोगनिष्पतिशब्दयोः अर्थः कः ?

८. अष्टममते संयोगनिष्पतिशब्दयोः अर्थः कः ?

# III. 4. पाठ्यांशेऽस्मिन् सम्भाविताः प्रश्नाः

**विंशत्यङ्कप्रश्नाः**

1. अभिनवमम्मटसम्मतं रसस्वरूपम्, **यद्वा** इति मतान्तरोक्तं रसस्वरूपञ्च विवेचयत ?
2. भट्टनायकमतस्वरूपं पण्डितराजोक्तदिशा विवेचयत ?
3. नव्यमतानुसारेण रसस्वरूपं निरूपयत ?
4. पण्डितराजोक्तदिशा लोल्लटश्रीशङ्कुकाभिनवगुप्तमतानि सङ्गृह्णीत ?

**दशाङ्कप्रश्नाः**

1. पण्डितराजोक्तरसगद्यस्य विवरणं कुरुत ?
2. रसवादेषु यद्वा मतं व्याख्यात ?
3. भट्टनायकमतपूर्वपक्षं सङ्गृह्णीत ?
4. भावनात्मकदोषस्वीकारे करुणादिषु रसव्यवस्थां समर्थयत ?
5. **परे तु** मतानुसारेण रसस्वरूपं निरूपयत ?

**पञ्चाङ्कप्रश्नाः**

1. अभिनवगुप्तमते रसस्य नित्यानित्यत्वव्यवस्था ।
2. रसस्य शाब्दापरोक्षत्वम् ।
3. नव्यमते भावनात्मकदोषस्य फलानि ।
4. यद्वामत-अभिनवगुप्तमतयोः भेदः ।
5. पण्डितराजोक्तं श्रीशङ्कुकमतम् ।
6. पण्डितराजोक्तं भट्टलोल्लटमतम् ।
7. पण्डितराजमते रससूत्रसमन्वयः ।

# IV. रससङ्ख्यादिमीमांसा

एवं रसस्वरूपे विज्ञाते इदानीं रससंख्यादिविषये विचारः प्रवर्त्यते। तत्र शान्तस्य नाट्यरसत्वविषये भक्तेः दशमरसत्वविषये च सन्ति विप्रतिपत्तयः । एवं वात्सल्य-मृगया-क्रीडनकादिष्वपि रसान्तरत्वमस्तीति केचिदाशेरते । अस्तु तासां गतिः कथमिति ? किन्तु शान्त-भक्त्योर्विषये विचारेण तत्त्वं निरूपणीयम्। एवमन्यच्च स्थायिलक्षणम्, शृङ्गारादिरसचतुष्टये सामग्रीनिरूपणादयः विषयाः विज्ञेयाः। अतः विभागेऽस्मिन् छात्राणाम्—

1. शान्तस्य नाट्ये नवमरसत्वम्
2. भक्तेः रसत्वनिराकरणम्
3. स्थायिभावलक्षणम्
4. शृङ्गारादिरसचतुष्टये रससामग्रीनिरूपणम्
5. रसदोषाः (अनौचित्यम्)

इत्यमी विषयाः परिशीलनीयताम् अर्हन्ति। तत्रादौ शान्तस्य नाट्यरसत्वं निरूप्यते—

**स्वावलोकनप्रश्नाः**

१. शान्तस्य नाट्यरसत्वे का विप्रतिपत्तिः ?

२. भक्तेः दशमरसत्वं कः स्वीकृतवान् ?

३. **वात्सल्यादीनां रसत्वमस्ति** इति कथम् ? वात्सल्यादयः के ?

४. अस्मिन्नध्याये के के परिशीलनीयाः ?

# IV. 1. शान्तस्य नाट्ये नवमरसत्वम्

**शृङ्गारहास्यकरुणाः रौद्रवीरभयानकाः ।**
**बीभत्साद्भुतसंज्ञाश्चेत्यष्टौ नाट्ये रसास्स्मृताः ।।**

इति पाठः भरतस्य परमप्रामाणिकतया सम्मतः पाठः इति आधुनिकपरिशोधकानाम् अभिप्रायः। एवं सति रसाः '**अष्टावेव नाट्ये रसाः**' इति वक्तव्ये शान्तस्य कथं वा रसत्वं सिध्यतीति कश्चित् चारित्रिकः प्रश्नः उपतिष्ठते। किञ्च शान्तस्य स्थायीभावः शमः, तत्साध्यस्तु शान्तो रसः। शमश्च नटे न सम्भवति। अतः शान्तरसाभिनयौपयिकस्य शमस्य नटे असम्भवात्, अस्य नाट्यरसत्वं न युज्यते इति सङ्गीतरत्नाकरे कश्चित् पूर्वपक्षः उपक्षिप्तः । तथा हि—

**शान्तस्य शमसाध्यत्वात् नटे च तदसम्भवात् ।**
**अष्टावेव रसा नाट्ये न शान्तस्तत्र युज्यते ।।**

एतच्च अपरे न क्षमन्ते । तथा हि नटे शमाभावात् इति हेतुः असङ्गतः । नटे रसाभिव्यक्तेः अस्वीकारेण, केवलं सामाजिक एव रसाभिव्यक्तेः स्वीकारेण, सामाजिकानां शमवत्त्वेन तत्र रसोद्बोधे बाधकाभावात् । किञ्च कस्यचित् रसत्त्वं प्रति तदुपाधेः स्थायिनः नटे सद्भावः न अपेक्षितः। यदि शमस्य नटे सद्भावाभावात् न शान्तरसाभिव्यक्तिरित्युच्येत, एवं सति नटे भयक्रोधादेरप्यभावेन भयानकादीनामपि नाट्ये अभिव्यक्तिः न स्यात् । यदि च नटे वास्तविकतत्कार्याणाम् अभावेऽपि शिक्षाभ्यासादितः तदभिनयः उपपाद्यते इति उच्यते, तथा सति वास्तविकशमस्याभावेऽपि कल्पितशमस्य अपि सद्भावेन शमाभिनययोग्यतायाः सद्भावात्, शान्ते रसत्वस्य अक्षतत्वात्।

अथ नाट्ये विषयवैमुख्यात्मकस्य शान्तस्य प्रतिकूलानां गीतवाद्यादीनां सद्भावे कथं सामाजिकानां शमस्योद्रेकः इति वाच्यम्। शान्तस्य रसत्वम् अभ्युपगच्छद्भिः फलबलात् वाद्यात्मकस्य मृदङ्गादिविषयस्य प्रतिबन्धकत्वाकल्पनात्। विषयचिन्तासामान्यस्य शान्तरसं प्रति प्रतिकूलत्वाङ्गीकारे, पुराणश्रवण-सत्सङ्ग-पुण्ययात्रातीर्थविलोकनादेरपि विषयत्वेन विरोधितापत्तेः । अत एव सङ्गीतरत्नाकरे चरमाध्याये—

**अष्टावेव रसा नाट्येष्विति केचिदचूचुदन् ।**
**तदचारु यतः कञ्चिन्न रसं स्वदते नटः ।।** इत्युक्तम् ।

एवञ्च शान्तः नाट्ये नवमो रसः । यैरपि नाट्ये शान्तो रसः नास्तीत्यभ्युपगम्यते, तैरपि बाधकाभावात् महाभारतादिप्रबन्धानां शान्तरसप्रधानतया लोकानुभवसिद्धत्वात् शान्तस्य काव्यरसत्वमनिवार्यम्। अत एव मम्मटभट्टाः— **'अष्टौ नाट्ये रसाः स्मृताः'** इत्युपक्रम्य **'शान्तोऽपि नवमो रसः'** इत्युपसमहार्षुः ।

एवञ्च शान्तस्य नैयत्येन तत्प्रधानकाव्यरसत्वम् इति नाट्यरसत्वविषये अनैर्भर्यमेव दर्शयति पण्डितराजः। तत्र च कारणमिदमाभाति यत् शान्तानुभवे तत्त्वज्ञानप्रधाने पामराणां नास्त्यवकाशः। अतः पामराणां विशेषतः अनुभवप्रदानाय नाट्यकलया शान्ताभिनयस्य कर्तव्यतावश्यकता नास्ति। अतश्च काव्यरसत्वमेवास्तु शान्तस्य। ज्ञानिनां सहृदयानां नाट्यादपि शमोद्बोधः भवतीत्यन्यदेतत्। अतः नाट्यशास्त्रपाठोऽपि **'बीभत्साद्भुतशान्ताश्च नव नाट्ये रसाः स्मृताः'** इति प्रामाणिकतया स्वीक्रियते।

ततश्च तत्त्वज्ञानिपुरुषाश्रयः पुण्ययात्रासंसेवनादिना उद्दीपितः चिन्तावितर्कादिभिः सञ्चारितः नित्यानित्यवस्तुविचारजनितविषयविरागाख्यनिर्वेदस्थायिकः शान्तरसः काव्यनाट्ययोः अस्तीति दिक् ।

**स्वावलोकनप्रश्नाः**

१. शान्तस्य नाट्यरसत्वं कथं स्वीक्रियते ?

२. नटे भयादीनामभावेऽपि कथं भयानकादीनामुत्पत्तिः ?

३. **शान्तस्य नवमरसत्वं नास्ति** इति कुत्र प्रतिपादितम् ?

४. मृदङ्गादिविषयाणां कथमानुकूल्यम् ?

५. अत्र मम्मटस्य प्रमाणं किम् ?

६. नाट्यरसत्वेन शान्तस्यानङ्गीकारेऽपि कुत्र वा काव्यरसत्वेन शान्तस्य अङ्गीकार्यः ?

७. शान्तरसस्य स्वरूपं किम् ?

इदानीं भक्तेः रसत्वमस्तीति नवेति जानीमः ।

## IV. 2. भक्तेः रसत्वनिरूपणम्

मुनिना भरतेन नवरससिद्धान्तस्यैव स्वीकारात् भक्तिरसः अस्ति वा इत्यत्र कश्चिदस्ति कल्लोलः। मधुसूदनसरस्वतीप्रभृतयः भक्तेः रसत्वव्यवस्थापनाय एकं ग्रन्थमेव निर्ममुः । वस्तुतोऽपि भक्तिरसस्य विभावानुभावादिसामग्री अस्ति। भक्तिरसोऽयं भगवदालम्बनः रोमाञ्च-अश्रुपातादिभिः अनुभावितः, हर्षादिभिः परिपोषितः, भागवतादिपुराणश्रवणसमये भगवद्भक्तैरनुभूयमानः अनुरागस्थायिकः ।

न चासौ शान्तरसे अन्तर्भवति, वैराग्यविरुद्धस्य अनुरागस्य शान्तरसे स्थायित्वेन अवस्थाना-सम्भवात्। अतः भक्तेः रसत्वाङ्गीकारस्य अस्ति काचिद्युक्तिः । परं भरतमुनिसम्प्रदायगौरवेण मम्मटप्रभृतयः केचित् आलङ्कारिकाः **भक्तिर्नाम कश्चित् भावविशेषः** इत्याहुः । तथा चोक्तम्— **'रतिर्देवादिविषयाव्यभिचारी तथाञ्चितः भावः'** इति ।

न च मम्मटेन देवादिविषयकरतेः भावत्वे कामिनीविषयरतेरपि भावत्वम् उच्यतामिति वाच्यम्। रसभावादिसङ्ख्याविषये भरतादिमुनिवचनानामेव परमप्रमाणिकत्वेन स्वीकारात् विशृङ्खलतयाश्च अयोगात्, भक्तेः केवलभावत्वमेव न रसत्वम्। अन्यथा पुत्रविषयकवात्सल्यस्य रसत्वं किं न स्यात्। जुगुप्साशोकानामपि शुद्धं भावत्वं किं न स्यात् इति महान् व्याकुलीभावः स्यात्। तस्मात् भक्तिरसस्य स्थायी अनुरागः सम्प्रदायगौरवेण शुद्धभाव एव भवितुमर्हति, न रसो भवति।

एवञ्चास्मिन् प्रघट्टके वस्तुतः भक्तेः रसत्वं पण्डितराजस्येष्टमपि मुनिवचनगौरवान्न स्वीक्रियत इति फलितम् । पृ.५६

सम्प्रति स्थायिभावसामान्यविशेषलक्षणादिकं विचार्यते ।

# IV. 3. स्थायिभावलक्षणम्-स्थायिनां लक्षणानि-स्थायिव्यभिचारिणोः भेदाश्च

## IV. 3. i. स्थायिभावलक्षणम्

निरूपितानाञ्च नवरसानाम्----

**रतिः शोकश्च निर्वेदः क्रोधोत्साहाश्च विस्मयः.**
**हासोभयं जुगुप्सा च स्थायिभावाः क्रमादमी ।।**

इति नव स्थायिभावाः शान्तस्य निर्वेदस्थायिनं स्वीकृत्य निरूपिताः। तत्र स्थायिरसयोः को भेदः इत्युक्ते भग्नावरणकचिद्भास्यरत्यादेः रसत्वस्वीकर्तुः अभिनवगुप्तमते घटतदवच्छिन्नाकाशयोरिव स्थायिरसयोः (चैतन्यचित्तवृत्त्योः) अवच्छेद्यावच्छेदकभेदेन भेदः। एवं द्वितीये भट्टनायकमतेऽपि भाव्यमानरत्यादेः संविद्विश्रान्तरूपरसस्यापि घट-आकाशयोरिव अवच्छेद्यावच्छेदकभावेनैव भेदः। तृतीये सत्यरजतादेः शुक्तिकायां भासमानानिर्वचनीयरजतादेरिव वास्तवत्वकल्पितत्वाभ्यां भेदः। चतुर्थे 'परे तु मते' तु रसस्य ज्ञानस्वरूपत्वेन रतिरसयोः विषयविषयिभावेन भेदः।

एवञ्च रसात् स्थायिनः भिन्नत्वात् स्थायिस्वरूपमवश्यं वेदितव्यम्। तत्र किं नाम भावगतं स्थायित्वम् इत्युक्ते 'आ प्रबन्धं स्थिरत्वमेव एतेषां भावानां स्थायित्वम्' इति पण्डितराजस्य समाधानम्। न च चित्तवृत्तिरूपाणाम् एषां भावानामाशुतरविनाशित्वेन भावानां कतिपयनिमेषावस्थायित्वमेव दुर्लभम्, कथञ्च आप्रबन्धं स्थिरत्वम्। यदि वासनारूपतया आप्रबन्धं स्थिरत्वं स्थायिपदार्थः, वासनारूपतया स्थिरत्वस्य व्यभिचारिष्वपि सत्त्वात् तत्र अतिव्याप्तिः । अतः स्थिरत्वं किमात्मकमित्युक्ते मुहुर्मुहुः अभिव्यक्तत्वमेव स्थिरपदार्थः। व्यभिचारिणान्तु स्थायिवत् वासनारूपत्वेऽपि मुहुर्मुहुः अभिव्यक्तेः अभावात् न स्थायित्वम्, यतस्ते व्यभिचारिणः विद्युद्द्योतप्रायाः। अत एव प्राचीनैः स्थायिभावस्य लक्षणम् एवमुक्तम्----

**विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः ।**
**आत्मभावं नयत्याशु स स्थायी लवणाकरः ।।**

**चिरं चित्तेऽवतिष्ठन्ते सम्बध्यन्तेऽनुबन्धिभिः ।**
**रसत्वं ये प्रपद्यन्ते प्रसिद्धाः स्थायिनोऽत्र ते ।।**

एवं चात्र सजातीयविजातीयभावान्तरानभिभूतत्वे सति भावान्तराणामात्मभावप्रापकत्वं स्थायिभावस्य लक्षणम्। 'चिरं चित्तेऽवतिष्ठन्ते' इत्यनेन प्राचीनैरपि आप्रबन्धं मुहुर्मुहुः अभिव्यक्तत्वलक्षणं स्थायित्वमेव प्रतिपादितम्। पूर्वोक्तश्लोके व्यभिचारिष्वतिप्रसङ्गवारणाय 'चिरम्' इति पदमुपात्तम्। श्लोकार्थसंसूचके

परिष्कारे विच्छिद्यमाने स्थायिनि अतिप्रसङ्गवारणाय भावान्तरणामात्मभावप्रापकत्वम् इति दलम्। दशरूपके धनञ्जयेनापि----

**सजातीयैर्विजातीयैरतिरस्कृतमूर्तिमान् ।**
**यावद्रसं वर्तमानः स्थायिभाव उदाहृतः ।।**

इदमेव स्थायिभावलक्षणं समादृतम्। यदत्र केचित् 'आप्रबन्धं स्थिरत्वं स्थायित्वम्' इत्यादिलक्षणमुपेक्ष्य रत्याद्यन्यतमत्वं स्थायित्वम् इत्याहुः ---तन्मन्दम्। रत्यादीनाम् एकस्मिन् भावे प्ररूढे सति भावान्तरस्य अप्ररूढत्वे व्यभिचारित्वस्यैव स्वीक्रियमाणत्वात्, रत्याद्यन्यतमत्वं पुरस्कृत्य स्थायित्वनिर्णयाभावात्। यथा वीररसस्थले उत्साहे प्रधाने क्रोधः अप्रधानः सञ्चारी एव भवति। एवं रौद्रे प्रधाने क्रोधे उत्साहः व्यभिचारी भवति। तदा शृङ्गारेऽपि हासः व्यभिचारी अप्ररूढत्वात्।

ननु किं नाम प्ररूढत्वम् ? किं नाम अप्ररूढत्वम् ? इति चेत् अत्रोच्यते। बहुविभावजत्वं प्ररूढत्वम्, अल्पविभावजत्वम् अप्ररूढत्वम्। ततश्च बहुविभावजः भावः प्ररूढमूलो वटवृक्ष इव न उन्मूलयितुं शक्यत इति स्थायीभावः। अल्पविभावजस्तु भावः विद्युद्द्योतप्राय इव व्यभिचारी भावति । एवञ्च रत्यादिष्वपि उपाधिभेदेन स्थायित्वव्यभिचारित्वयोः द्वयोः सत्त्वात्, रत्याद्यन्यतमत्व-स्थायित्वमिति वक्तुं न शक्यते । विषयेऽस्मिन्------

**रत्यादयः स्थायिभावाः स्युर्भूयिष्ठविभावजाः ।**
**स्तोकैर्विभावैरुत्पन्नास्त एव व्यभिचारिणः ।।**

इति सङ्गीतरत्नाकरकारिकाया अपि प्रमाणत्वात् रत्याद्यन्यतमत्वं स्थायित्वम् इति प्रतिपादनं केवलमापातरमणीयं भविष्यति। अत एतादृशरत्यादिषु मध्ये बहुविभावज एव रत्यादिः यदा अङ्गभावं भजति, तदैव रसवदलङ्कारः। अन्यथा तु अल्पविभावजस्य रत्यादेः अङ्गत्वे तस्य व्यभिचारित्वेन रसालङ्कारत्वमपि न सिद्ध्यति। एवं मुहुर्मुहुः आप्रबन्धमभिव्यक्तत्वलक्षणलक्षितानां स्थायिनां कानि लक्षणानि इत्युक्ते एवं रसगङ्गाधरे क्रमेण निरूपितानि।

**स्वावलोकनप्रश्नाः**

१. अभिनवगुप्तमते स्थायिरसयोः को भेदः ?

२. भट्टनायकमते स्थायिरसयोः को भेदः ?

३. नवमते स्थायिरसयोः को भेदः ?

४. परकीयमते स्थायिरसयोः को भेदः ?

५. रत्यादीनां स्थायित्वं कथम् ?

६. स्थिरपदार्थः कः ?

७. व्यभिचारिणां कथं न स्थायित्वम् ?

८. प्राचीनानां स्थायित्वलक्षणं किम् ?

९. पण्डितराजपरिष्कृतं स्थायिलक्षणं किम् ?

१०. **आप्रबन्धं स्थिरत्वं स्थायित्वम्** इत्यङ्गीकारे को दोषः ?

११. प्ररूढत्वं नाम किम् ?

१२. अप्ररूढत्वं नाम किम् ?

१३. रत्याद्यन्यतरत्वं स्थायित्वं कुतो न ?

## IV. 3. ii. स्थायिनां लक्षणानि

**१. रतिः** ----स्त्रीपुंसयोरन्योन्यालम्बनः प्रेमाख्यश्चित्तवृत्तिविशेषो रतिः स्थायिभावः।

**२. शोकः** ----पुत्रादिवियोगमरणादिजन्मा वैक्लब्याख्यश्चित्तवृत्तिविशेषः शोकः।

**३. निर्वेदः** ----नित्यानित्यवस्तुविचारजन्मा विषयविरागाख्यो निर्वेदः।

**४. क्रोधः** ----गुरुबन्धुवधादिपरमापराधजन्मा प्रज्ज्वलनाख्यः क्रोधः।

**५. उत्साहः** ----परपराक्रमदानादिस्मृतिजन्मा औन्नत्याख्य उत्साहः।

**६. विस्मयः** ----अलौकिकवस्तुदर्शनादिजन्मा विकासाख्यो विस्मयः।

**७. हासः** ----वागङ्गादिविकारदर्शनजन्मा विकासाख्यो हासः।

**८. भयम्** ----व्याघ्रादर्शनादिजन्मा परमानर्थविषयको वैक्लब्याख्यो भयम्।

**९. जुगुप्सा** ----कदर्यवस्तुविलोकनजन्मा विचिकित्साख्यश्चित्तवृत्तिविशेषो जुगुप्सा।

**स्वावलोकनप्रश्नाः**

१. स्थायिनः के ?

२. रतेः लक्षणं किम् ?

३. क्रोधस्य लक्षणं किम् ?

४. जुगुप्सायाः लक्षणं किम् ?

## IV. 3. iii. स्थायि-व्यभिचारिणो भेदाः

**१.** इदमत्र विज्ञेयं स्त्रीपुंसयोः प्रेमाख्यः चित्तवृत्तिविशेषः रतिः स्थायिभावः । गुरुदेवतापुत्राद्यालम्बना रतिस्तु व्यभिचारी इति पण्डितराजेन यद्यप्युक्तम्। किन्तु भावध्वनिनिरूपणावसरे 'त्रयस्त्रिंशत् व्यभिचारिणः' इति कथयता गुर्वादिविषयकरतेः चतुस्त्रिशंत्त्वेन पृथगेव भावशब्दव्यपदेशत्वं प्रतिपाद्यम्। अथ वैक्लब्याख्यः चित्तवृत्तिविशेषः मरणादिजन्मा शोकः। तत्र स्त्रीपुंसयोः वियोगे जीवितत्वज्ञानदशायां वैक्लब्यपोषितायाः रतेरेव प्राधान्यात्, सत्यपि वैक्लब्ये विप्रलम्भशृङ्गारः। वैक्लब्यं तु तत्र केवलं सञ्चारीभाव एव। एवं यत्र स्त्रीपुंसयोः अन्यतरस्य मृतत्वज्ञानदशायां वैक्लब्यमनुभूयते तत्र पोषिकायाः रतेः अप्रधानत्वेन वैक्लब्यमेवेति करुण एव।

यथा तु मृतत्वज्ञाने सत्यपि देवताप्रसादादिना पुनरुज्जीवनज्ञानं कथञ्चित् भवेत्, तदालम्बनस्य आत्यन्तिकनाशाभावात् चिरप्रवास इव विप्रलम्भ एव, करुणः। यथा चन्द्रापीडं प्रति पुण्डरीकविषयकेषु महाश्वेता वाक्येषु।

**२.** केचित् एतादृशस्थले रसान्तरमेव करुणविप्रलम्भाख्यमिच्छन्ति । तथा चोक्तं साहित्यदर्पणे-

**यूनोरेकतरस्मिन् गतवति लोकान्तरं पुनर्लभ्ये ।**
**विमनायते यदैकस्तदा भवेत् करुणविप्रलम्भाख्यः ।।**

एवञ्च अनपह्नवनीयस्य करुणस्य शृङ्गाररस्य च तादृशगाथासु अनुभूयमानत्वात् करुणविप्रलम्भः रसः इति मिश्ररसान्तरम् अनुभूतिविशेषज्ञाः स्वीकुर्वन्ति।

**३.** अथ नित्यानित्यवस्तुविचारजन्मा विषयविरागः निर्वेदः। गृहकलहादिजस्तु व्यभिचारी।

गुरुबन्धुवधादिजनितः मनःप्रज्ज्वलनाख्यः चित्तवृत्तिविशेषः क्रोधः। अयं महापराधजनितश्चेत् रौद्रो रसः। तस्य च वधबन्धादि पर्यवसायित्वम्। अयमेव क्षुद्रापराधजनितश्चेत् स्वयमेव नश्यतीति अमर्षाख्यो भावः ।

**४.** व्याघ्रादिदर्शनजन्मा परमानर्थविषयकः वैक्लब्याख्यः चित्तवृत्तिविशेषः भयम्। स एव परमानर्थविषयकः न भवति चेत् केवलं त्रासाख्यः व्यभिचारी । अपरे तु प्रभावः त्रासः। स्वापराधात् उत्थितन्तु वैक्लब्यं भयम् इत्याहुः ।

एवं स्थायिभावेषु व्यभिचारिभ्यो भिन्नतया ज्ञातेषु केनाप्यन्यतमेन परस्परमतुल्येषु अत्यन्तविभिन्न-स्वभावेषु शृङ्गार-शान्त-करुण-रौद्रेषु पण्डितराजेन विभावादिरससामग्री निरूपिता। तामिह अनुशीलयामः ।

**स्वावलोकनप्रश्नाः**

१. गुरुविषयकरतेः व्यभिचारित्वम् उत स्थायित्वम् ?

२. वैक्लब्यं कः भवति ?

३. मृतत्वज्ञाने देवताप्रसादादिना पुनरुज्जीवने कः ?

४. करुणविप्रलम्भो नाम कः ?

५. तस्य उदाहरणं किम् ?

६. निर्वेदः कुत्र व्यभिचारी ?

७. क्रोधः कीदृशो व्यभिचारी ?

८. त्रासो नाम कः ?

९. वैक्लब्यं भयं कुत्र भवति ?

# IV. 4. शृङ्गारादिरसचतुष्टये रससामग्रीनिरूपणम्

i. तत्र शृङ्गारस्य स्त्रीपुंसौ अन्योन्यमालम्बने। चन्द्रिकावसन्तविविधोपवनरहरस्थानादयः उद्दीपनविभावाः। तन्मुखावलोकनतद्गुणस्मरणकीर्तनादयः अन्ये अनुभावाः । स्मृतिचिन्तादयः व्यभिचारिणः ।

ii. करुणस्य तु बन्धुनाशादयः आलम्बनानि। तत्सम्बन्धिगृह-तुरग-आभरणदर्शनादयः तत्तदाश्रयणादयश्च उद्दीपकाः । गात्राक्षेपाश्रुपातादयः अनुभावाः । ग्लानि-भय-मोह-विषाद-चिन्ता-औत्सुक्य-दीनता-जडतादयः व्यभिचारिणः ।

iii. अथ शान्तरसविषये अनित्यत्वेन ज्ञानं जगदालम्बनम्। वेदान्त श्रवण-तपोवन-तापसदर्शनानि उद्दीपननि। विषयारुचि-शत्रु मित्र-औदासीन्य-चेष्टाहानि-नासग्रदृष्ट्यादयः अनुभावाः। हर्ष-उन्माद-स्मृतिरत्यादयः व्यभिचारणः ।

iv. एवं रौद्रस्य आगस्कृरुत्पुरुषदर्शनम् आलम्बनम्। तत्कृतापराधादिः उद्दीपकः। बधबन्धादिफलकः नेत्रारुण्य-दन्तपीडन-परुषभाषणशस्त्रग्रहणादिः अनुभावः। अमर्ष-आवेग-औत्सुक्य-चपलतादयः सञ्चारिणः ।

एवं यो यस्याश्चित्तवृत्तेः विषयः तदालम्बनम्। तस्याः निमित्तानि उद्दीपकानि विज्ञेयानि। एवं रससामग्री ज्ञानानन्तरं रसास्वादप्रतिबन्धकज्ञानविषयाः दोषविशेषाः निरूप्यन्ते।

**स्वावलोकनप्रश्नाः**

१. शृङ्गारस्य विभावाः, अनुभावाः, व्यभिचारिणः के ?

२. आलम्बनं नाम किम् ?

३. उद्दीपकानि कानि भवन्ति ?

## IV. 5. रसदोषाः

रसानां स्वस्वसामग्र्या परिपोषे कृतेऽपि, विहितेऽपि रसविरोधपरिहारे रसविषये केचिद् दोषाः सम्भवन्ति। ते च दोषाः त्रयोदश रसगङ्गाधरे परिगणिताः।

i. स्वशब्दवाच्यत्वम्-रसः रसशब्देन शृङ्गारादिविशेषवाचकशब्देन वा न अभिधातुमुचितः । तदास्वादश्च व्यञ्जनामात्रनिष्पाद्यः इत्युक्तत्वात्, रसस्य स्वशब्देन अभिधाने को दोषः इति चेत्, अन्तर्गूढतया अवस्थितस्य पदार्थस्य वमने यादृशः दोषः तादृश एव दोषः व्यङ्ग्यस्य स्वशब्दवाच्यत्वे इति सामान्यतया वमनाख्यो दोषः इति पण्डितराजेन निरूपयितुम् इष्यते । अन्यच्च रसपदार्थः आस्वाद्यत्वेन उपस्थितो भवेत्, तादृशस्य रसस्य पुनः वाच्यीकरणे तत् कविचेष्टितं न भवति, अपि तु कपिचेष्टितं भविष्यति । ततश्च कापेयकत्वमप्यत्र विशेषतो दोषः ।

ii. & iii. स्थायिभावानां स्वशब्दवाच्यत्वम् एको दोषः, व्यभिचारिभावानां स्वशब्दवाच्यत्वम् अपरो दोषः ।

iv. & v. एवं विभावस्य असम्यक्प्रत्यये, विलम्बप्रत्यये वा एको रसदोषः। अनुभावस्य असम्यक्प्रत्यये विलम्बेन प्रत्यये वा अपरो दोषः ।

एवं रस-स्थायि-व्यभिचारि-अनुभाव-विभावप्रयुक्ताः पञ्चरसदोषाः निरूपिताः।

vi. सम-प्रबल-प्रतिकूलरसाङ्गनिरूपणम्, समबलाः, प्रबलाः, प्रतिकूलाश्च ये रसाः तेषामङ्गानां निबन्धनम्। प्रकृतरसपरिपोषप्रातीपिकमिति रसदोषः।

vii. विच्छिन्नदीपनम्-प्रबन्धे प्रकृतस्य रसस्य प्रसङ्गान्तरेण विच्छिन्नस्य पुनर्दीपने सामाजिकानां न सामग्र्येण न रसास्वादः इति विच्छिन्नदीनं दोषः।

viii. & ix. अकाण्डे प्रथनं विच्छेदश्च तत्तद्रसप्रस्तावानर्हे अवसरे प्रस्तावः, विच्छेदानर्हे च विच्छेदः । यथा सन्ध्यावन्दनं देवयजनादिधर्मवर्णने प्रसक्ते कयाऽपि कामिन्या कस्यचित् कामुकस्य अनुरागवर्णने । अत्र सन्ध्यावन्दनादिधर्मवर्णने कर्तव्ये तदकृत्वा, अकाण्डे कामिन्यनुरागस्य वर्णनम् अकाण्डे प्रथनम्। यथा च समुपस्थितेषु महाहवदुर्मदेषु प्रतिभटेषु प्रथनम् मर्मभिन्दिवचनानि उद्गिरत्सु सत्सु नायकस्य सन्ध्यावन्दनादिवर्णनम्। अकाण्डे विच्छेदात्मकं दोषमावहति।

x. प्रतिनायकचरितसम्पदादीनामाधिक्यवर्णनम्

एवं प्रतिनायकादेः नानाविधानां चरितानाम् अनेकविधायाश्च सम्पदः प्रकृतनायकसम्बन्धिचरित-सम्पद्भ्यः अतिशयेन वर्णनम्। एवं सति वर्णयितुम् इष्टस्य नायकस्य उत्कर्षो न स्यात्। ततश्च आश्रयोत्कर्षाभावेन तत्प्रयुक्तः रसपोषश्च न स्यात्। न च प्रतिनायकोत्कर्षस्य तदभिभावकनाय-

कोत्कर्षाङ्गत्वात् कथम् अवर्णनीयत्वमिति वाच्यम् । यादृशस्य प्रतिनायकोत्कर्षस्य वर्णने प्रतिनायकतिरस्कारिणः नायकस्य उत्कर्षः सिद्ध्यति, तादृशस्य प्रतिनायकसम्बन्धिनः उत्कर्षस्य वर्णनम् इष्टमेव, नायकोत्कर्षाननुकूलं प्रतिनायकवर्णनन्तु नेष्यते।

न च प्रतिनायकस्य प्रकृतनायकापेक्षया वर्ण्यमानोऽप्युत्कर्षः तादृशप्रतिपक्षनायकहन्तृत्वात् प्रकृतनायकस्य युक्त एवेति वाच्यम्। विषशरक्षेपमात्रेण कञ्चन महाराजं व्यापादितवतः वराकस्येव स्वस्मात् अगणनीयाधिक्यवतः प्रतिपक्षनायकस्य हन्तृत्वे नैच्यमेव नायकस्य सिद्ध्येत्।

xi. रसालम्बनाश्रययोः मध्ये मध्ये अनुसन्धानाभावः

रसस्य प्रतीतेः आलम्बनं सीतादिकम्, आश्रयं रामादिकञ्च आश्रित्याविच्छेदेन भवति। यदि कथा प्रसङ्गवशात् आलम्बनस्य आश्रयस्य वा अनुसन्धानं विना प्रचलति तथा रसविच्छेद एव स्यात् ।

xii. प्रकृतरसानुपकारकस्य वस्तुनः वर्णनमपि प्रकृतरसविरामहेतुत्वात् दोष एव।

xiii. अनौचित्यं तु रसभङ्गहेतुत्वात् सर्वथा परिहरणीयम्। रसभङ्गो नाम पानकरसादौ सिकतादिनिपातजनिता अरुन्तुदतेव रसप्रतीतिविघातकारित्वम्। अनौचित्यञ्च यस्य जातिदेशकालादेः यत् द्रव्य-गुण-क्रियादिलोकतश्शास्त्रश्च सिद्धत्वात् उचितं तद्भिन्नत्वमनौचित्यम्।

**स्वावलोकनप्रश्नाः**

१. रसदोषाः कति निरूपिताः ?

२. वमनाख्यः दोषः नाम कः ?

३. कापेयकत्वदोषो नाम कः ?

४. स्थायि-व्यभिचार्यनुभावविभावप्रयुक्ताः दोषाः कति ?

५. विलम्बनप्रत्ययो नाम कः ?

६. विच्छिन्नदीपनदोषस्य किं लक्षणम् ?

७. प्रतिनायकवर्णनं कुत्र दोषाय भवति ? कुत्र अदोषाय भवति ?

८. रसविच्छेदः कथं भवति ?

९. अनौचित्यं नाम किम् ?

(१) **तत्र जात्या अनौचित्यस्य उदाहरणम्-**

गवादेः तेजोबलकार्याणि पराक्रमादीनि च। सिंहादेः साधुभावादीनि च।

(२) **देशानौचित्यम्** ---स्वर्गे जराव्याध्यादि, भूलोके सुधासेवनादि।

(३) **कालानौचित्यम्** ---शिशिरे जलविहारादीनि, ग्रीष्मे वह्निसेवा।

(४) **वर्णानौचित्यम्** ---यथा ब्राह्मणस्य मृगया, दातुः भाहुजस्य परिग्रहः, शूद्रस्य वेदाध्ययनम्।

(५) **आश्रमानौचित्यम्** ---ब्रह्मचारिणः यतेश्च ताम्बूलचर्वणम्, दारोपसङ्ग्रहः।

(६) **वयसः अनौचित्यम्** ---बालवृद्धयोः स्त्रीसेवनम्, यूनश्च विरागः।

(७) **अवस्थानौचित्यम्** ---दरिद्राणामाढ्याचरणम्, आढ्यानां दरिद्राचरणम्।

(८) **प्रकृत्यनौचित्यम्** ---प्रकृतयश्च दिव्याः, अदिव्याः, दिव्यादिव्याश्च।

एवं क्रमेण उत्साह-क्रोध-कामिनीरति-निर्वेदप्रधानाः धीरोदात्त-धीरोद्धत-धीरललित-धीरशान्ताः, उत्तम-मध्यम-अधमाश्च। तत्र रत्यादीनां भयातिरिक्तस्थायिभावानां सर्वत्र समानत्वेऽपि रतेः सम्भोगरूपायाः मनुष्यादिष्विव उत्तमदेवतासु स्फुटीकृतसकलानुभावं वर्णनमनुचितम्।

इदञ्च दिव्यप्रकृत्यनौचित्यस्य उदाहरणं शृङ्गारस्य विषये। एवं लोकभस्मीकरणपटोः दिनरात्रिव्यत्ययाद्य-नेकाश्चर्यकारिणः क्रोधस्य दिव्येष्विव अदिव्येषु वर्णनम् अदिव्यप्रकृतिप्रयुक्तानौचित्यस्य उदाहरणम्। तथा वर्णने को दोषः इत्युक्ते--- तादृशचेष्टानामालम्बनभूतेषु दिव्येषु आराध्यत्वप्रतीत्या, तद्गतानुभावस्य अदिव्येषु वर्णनेन मिथ्यात्वप्रतीत्या रसानुल्लासापत्तिरेव दोषः। न च भावनाव्यापारेणादिव्य-प्रकृतीनामपि साधारणीकरणात् दिव्यगतानुभावस्य उपपत्तिरिति वाच्यम्। यत्र सहृदयानां रसोद्बोधः तत्रैव साधारणीकरणस्य कल्पनात् । अन्यथा स्वमातृविषयकस्वपितृरतिवर्णनेऽपि सहृदयस्य रसोद्बोधापत्तिः । जयदेवादिभिस्तु गीतगोविन्दादिप्रबन्धेषु दिव्यप्रकृत्यौचित्यं विस्मृत्य सकलसहृदयसम्मतोऽयं समयः मदोन्मत्तमतङ्गजैरिव भिन्न इति तद्दृष्टान्तेन इदानीन्तनैः वर्णयितुं न शक्यते, इति पण्डितराजस्य औचित्यपूर्णः उपदेशः।

(९) **व्यवहारानौचित्यम्**

विद्या-वयो-वर्णाश्रम-तपोभिः उत्कृष्टैः स्वतः अपकृष्टेषु न स बहुमानेन वचसा व्यवहर्तव्यम्; उत्कृष्टेषु तथा व्यवहारः कार्यः, यथा 'तत्र भवन्' 'भगवन्' इत्यादिभिः सम्बोधनैः मुनि-गुरु-देवता-प्रकृतयः एव सम्बोधनीयाः न राजादयः।

एवं जात्या उत्तमैर्द्विजैः ब्राह्मणक्षत्रियवैश्यैरेव 'तत्र भवन्' इत्यादिसम्बोधनं कार्यम् न शूद्रादिभिः। 'परमेश्वर !' इत्यादिसम्बोधनैः चक्रवर्तिन एव सम्बोधनीयाः न मुनिप्रभृतयः। एवं सर्वत्र औचित्यं रसास्वादे निदानम् । अत एवोक्तम् आनन्दवर्धनाचार्यैः----

**अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम् ।**
**प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परा ।।**

यावतात्वनौचित्येन रसस्य परिपोषः, तावदनौचित्यं तु वार्यते। रसप्रतिकूलस्यैव तस्य निषेध्यत्वात्। अत एव----

**ब्रह्मन्नध्ययनस्य नैष समयस्तूष्णीं बहिः स्थीयताम् ।**
**स्वल्पं जल्प बृहस्पते जडमते नैषा सभा वज्रिणः ।।**

**वीणां संहर नारद स्तुतिकथालापैरलं तुम्बुर ।**
**सीताऽरल्लकभल्लभग्नहृदयः स्वस्थो न लङ्केश्वरः ।। पृ.६६**

इति कस्यचित् नाटकस्य पद्ये ब्रह्म-बृहस्पति-नारद-तुम्बुरादीनाम्, देव-देवगुरु-देवर्षि-देवगायकानां रावणदौवारिकेन कृतस्तिरस्कारः यद्यपि प्रकृत्यनौचित्यमादधाति, तथापि रावणशृङ्गारस्यापि जगज्जननीगत्वेन अनुचितत्वात् तादृशानौचित्यपरिपोषाय रावणदौवारिककृतदेवादिधिक्कारजनित-लोकोत्तरैश्वर्यं व्यङ्ग्यम् अनुचितवीरस्य व्यञ्जकमिति, तस्य च प्रधानीभूतविप्रलम्भाभासाङ्गत्वात् अनौचित्येऽपि न कश्चित् दोषः। एवम्----

'अरे अरे रे सद्यस्समुत्पाटितकुशग्रन्थिमयाक्षमालापरिवृत्तिविस्रम्भितबालविधवान्तःकरणाः ब्राह्मणाः' इत्यत्र विदूषककृतं ब्राह्मणेषु वस्तुतः जात्या गौरवार्हेषु तदीयनीचालोचनाप्रकाशकत्वेन तादृशसम्बोधनस्य हास्यानुगुणत्वात् व्यवहारानौचित्यमपि न दोषः ।।

**स्वावलोकनप्रश्नाः**

१. अनौचित्यं कतिविधम् ?

२. अवस्थानौचित्यस्य उदाहरणं किम् ?

३. प्रकृत्यनौचित्यं कथं भवति ?

४. दिव्येष्विव अदिव्येषु चेष्टावर्णने कथं दोषः ?

५. व्यवहारानौचित्यं कथं भवति ?

६. **तत्र भवन्, भगवन्** इति व्यवहारः कुत्र करणीयः ?

७. **रसस्योपनिषत्** इत्यत्र उपनिषच्छब्दस्य कः अर्थः ?

८. कुत्र व्यवहारानौचित्यं दोषाय न भवति ?

## IV. 6. पाठ्यांशेऽस्मिन् सम्भाविताः प्रश्नाः

**विंशत्यङ्कप्रश्नाः**

1. स्थायिभावलक्षणं मतभेदेन निरूप्य स्थायिनां लक्षणानि पण्डितराजोक्तदिशा निरूपयत ?
2. पण्जितराजोक्तान् रसदोषप्रकारान् विवेचयत ?
3. शान्तस्य नाट्यरसत्वं व्यवस्थाप्य भक्तेः रसत्वं पण्डितराजोक्तदिशा विचारयत ?
4. स्थायिव्यभिचारिणोः कयोश्चित् भेदान् निरूप्य शृङ्गारादिरसचतुष्टये रससामग्रीं निरूपयत ?

**दशाङ्कप्रश्नाः**

1. शान्तस्य नाट्ये नवमरसत्वम् ?
2. भक्तेः रसत्वनिराकरणम् ?
3. व्यवहारानौचित्यम् ?

**पञ्चाङ्कप्रश्नाः**

1. शृङ्गारादिरसचतुष्टये पण्डितराजकृतं रससामग्रीनिरूपणम् ?
2. पण्जितराजोक्तदिशा स्थायिनां लक्षणानि ?
3. व्यवहारानौचित्यम् ?
4. भक्तेः रसत्वनिराकरणम् ?

# V. रसप्रभेदविरोधमीमांसा

भागेऽस्मिन् अधोनिर्दिष्टानां विषयाणां निरूपणं क्रियते—

1. रसप्रभेदानाम् उदाहरणसमन्वयादिकम् ।
2. विरोधिरससमावेशोपायाश्च प्राधान्येन विचार्यन्ते ।

तत्रादौ शृङ्गार-वीर-हास्यानां सप्रभेदानां निरूपणं क्रियते ।

## V. 1. शृङ्गार-वीर-हास्यानां सप्रभेदानां निरूपणम्

### V. 1. i. सप्रभेदः शृङ्गारः

तत्र शृङ्गारः द्विविधः । संयोगः विप्रलम्भश्चेति। तत्र रतेः संयोगकालावच्छिन्नत्वे संयोगशृङ्गारः। वियोगकालावच्छिन्नत्वे तु विप्रलम्भशृङ्गारः । संयोगश्च न दम्पत्योः सामानाधिकरण्यम् (एकदेशवृत्तित्वम्) एकतल्पशयनेऽपि नायिकानायकयोः ईर्ष्यादिसद्भावे विप्रलम्भस्यैव वर्णनात् । एवं वियोगोऽपि न वैयाधिकरण्यम्, भिन्नदेशवृत्तितामात्रेण वियोगव्यवहारापत्तेः । तस्मात् 'संयुक्तोऽस्मि 'इति धीविषयत्वं संयोगः, 'वियुक्तोऽस्मि' इति धीः विषयत्वं च वियोगः । तत्र—

**(अ) संयोगशृङ्गारध्वनेः उदाहरणम्—**

**शयिता सविधेऽप्यनीश्वराः...... ।**

इत्यत्र प्राक् प्रतिपादितं द्रष्टव्यम् । (अस्मिन्नेव निबन्धे पृष्ठसङ्ख्या- )

**'वागर्थाविव....' इत्यादिपद्ये शृङ्गाररसध्वनित्वखण्डनम्**

**वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ।।**

अत्र चित्रमीमांसाकारैः अप्पय्यदीक्षितैः पार्वतीपरमेश्वरयोः शब्दार्थोपमाव्यङ्ग्यनिरतिशयप्रेमशालित्वस्य व्यञ्जनात्, इदं शृङ्गाररसध्वनेः उदाहरणमिति प्रत्यपादि। परमिदं शृङ्गाररसध्वनित्वनिरूपणं ध्वनिमार्गानाकलननिबन्धनम्। 'जगतः पितरौ वन्दे' इति नमस्कारकरणेन अभिव्यक्तायां पार्वतीपरमेश्वरविषयककविगतरतौ तयोः प्रेम्णा गुणीभावेन, 'भिन्नो रसाद्यलङ्कारात् अलङ्कार्यतया स्थितः'इति ध्वनिकारसिद्धान्तात् रसध्वनित्वायोगात्। न हि गुणीभूतस्य रत्यादेः रसध्वनित्वं युक्तम्।

**(आ) विप्रलम्भशृङ्गारो यथा—**

**वाचो माङ्गलिकीः प्रयाणसमये जल्पत्यनल्पं जने**
**केलीमन्दिरमारुतायनमुखे विन्यस्तवक्त्राम्बुजा।**

**निःश्वासग्लपिताधरोपरि पतद्बाष्पार्द्रवक्षोरुहा**
**बाला लोलविलोचना शिव शिव प्राणेशमालोकते ।।**

अत्र नायकः आलम्बनम्। निःश्वासाश्रुपातादयः नायिकाकृताः अनुभावाः। विषादचिन्तावेगादयश्च व्यभिचारिणः। तेषां संयोगात् वियोगकालावच्छिन्ना रतिः प्राधान्येन व्यज्यमाना विप्रलम्भरसपदव्यपदेशहेतुः। यथा वा—

**आविर्भूता यदवधिमधुस्यन्दिनी नन्दसूनोः**
**कान्तिः काचिन्निखिलनयनाकर्षणे कार्मणज्ञा ।**
**श्वासो दीर्घस्तदवधिमुखे पाण्डिमा गण्डयुग्मे**
**शून्या वृत्तिः कुलमृगदृशां चेतसि प्रादुरासीत् ।।**

अत्र श्रीकृष्णालम्बना दीर्घश्वासगण्डयुग्मपाण्डिमाद्यनुभाविता, विषादप्रमुखेन व्यभिचारिणा सञ्चारिता कुलमृगाक्षीनिष्ठा वियोगकालावच्छिन्ना रतिः प्राधान्येन व्यज्यमाना विप्रलम्भशृङ्गारध्वनिः।

**नयनाञ्चलावमर्शं या न कदाचित्पुरा सेहे।**
**आलिङ्गितापि जोषं तस्थौ सा गन्तुकेन दयितेन ।।**

इति पद्ये तु सहजचापलनिवृत्त्या अनुभाविता, जडतया प्रवत्स्यत्पत्यालम्बना विप्रलम्भरतिः प्रधान्येन ध्वन्यते । यद्यपि प्राचीनैः मम्माटादिभिः प्रवास-अभिलाष-विरह-ईर्ष्या-शापभेदात् पञ्चविप्रलम्भप्रकाराः निरूपिताः । तथाऽपि विप्रलम्भभेदेषु विशेषाभावात् न अस्माभिः ते भेदाः पृथक् परिगण्यन्ते इति पण्डिराजः अभिप्रैति ।

**स्वावलोकनप्रश्नाः**

१. शृङ्गारस्य द्वौ भेदौ कौ ?

२. संयोगो नाम कः ?

३. सामानाधिकरण्यं नाम किम् ?

४. विप्रयोगो नाम कः ?

५. संयोगशृङ्गारस्य उदाहरणं किम् ?

६. विप्रलम्भशृङ्गारस्य उदाहरणं किम् ?

७. प्राचीनानां मते विप्रलम्भः कतिविधः ?

८. जगन्नाथेन विप्रलम्भस्य भेदाः कुतो न परिगण्यन्ते ?

९. **वागर्थाविव** इत्यत्र शृङ्गारः रसः इति केनोक्तम् ?

१०. **वागर्थाविव** इत्यत्र रसध्वनिः कुतो न भवति ?

# V. 2. वीररसस्य चातुर्विध्यम्-अनेकविधत्वात् तदसामञ्जस्यञ्च

## V. 2. i. वीररसस्य चातुर्विध्यम्

शृङ्गार-हास्य-करुण-रौद्र-वीर-भयानक-बीभत्स-अद्भुत-शान्तभेदेन रसाः नव। वीररसस्य उत्साहः स्थायी। स च परपराक्रमदानादिस्मृतिजन्मा औन्नत्याख्यः भावविशेषः। तस्य च उत्साहस्य उपाधीनां दान-दया-युद्ध-धर्माणां चतुर्विधत्वात् वीरोऽपि चतुर्विधः। तत्र–

**(अ) दानवीरः यथा—**

**कियदिदमधिकं मे यद्द्विजायार्थयित्रे**
**कवचमरणीयं कुण्डले चार्पयामि ।**
**अकरुणमवकृत्य द्राक्कृपाणेन निर्यद्-**
**बहलरुधिरधारं मौलिमावेदयामि ।।**

एषा द्विजेन्द्रवेषाय इन्द्राय कवचकुण्डलदानोद्यतस्य कर्णस्य दद्दानविस्मितान् सभ्यान् प्रति उक्तिः । अत्र याचमानः बाह्यणः आलम्बनम्। तदुदीरिता स्तुतिः उद्दीपिका। कवचादिवितरणम्, तत्र लघुत्वबुद्ध्यादिकञ्च अनुभावः । मे इति अर्थान्तरसंक्रमितवाच्यध्वन्युत्थापितः गर्वः, स्वकीय-लोकोत्तरपितृजन्यत्वादिस्मृतिश्च सञ्चारिणौ। अत्र च वृत्तिरपि अर्थानुरूपम् उद्गमविरामशालितया सहृदयैकचमत्कारिणी । तथा च कवचकुण्डलार्पणयोः लघुत्वबुद्धिमुत्पादयितुं पूर्वार्धे उद्धता । उत्तरार्धे तु गर्वपरिपोषाय उद्धतैव। एवं चात्र कर्णनिष्ठदानोत्साहस्य अभिव्यक्तेः प्रधानतया तस्य एव चमत्कारकारित्वाच्च दानवीर ध्वनिः। किन्तु—

**यस्योद्दामदिवानिशार्थिविलसद्दानप्रवाहप्रथा-**
**माकर्ण्यावनिमण्डलागतवियद्वन्दीन्द्रवृन्दाननात् ।**
**ईर्ष्यानिर्भरफुल्लरोमनिकरव्यावल्गदूधः स्त्रव-**
**त्पीयूषप्रकरैः सुरेन्द्रसुरभिः प्रावृट्पयोदायते ।।**

इति पद्ये तु विभावानुभावव्यक्तस्यापि कामगवीगतदानोत्साहस्य प्रकृतवर्णनीयराज-स्तुत्युत्कर्षाधायकतया गुणीभावात् रसवदलङ्कारत्वेन न वीररसध्वनित्वव्यपदेशहेतुत्वम्। 'भिन्नो रसाद्यलङ्कारात् अलङ्कार्यतया स्थितः 'इत्यालङ्कारिकसिद्धान्तात्। एवम्—

**साब्धिद्वीपकुलाचलां वसुमतीमाक्रम्य सप्तान्तरां**
**सर्वां द्यामपि सस्मितेन हरिणा मन्दं समालोकितः।**
**प्रादुर्भूतपरप्रमोदविदलद्रोमाञ्चितस्तत्क्षणं**
**व्यानम्रीकृतकन्धरोऽसुरवरो मौलिं पुरो न्यस्तवान् ।। पृ.४७**

इति पद्ये भगवद्वामनालम्बनः तत्कर्तृकमन्दनिरीक्षणोद्दीपितः, रोमाञ्चादिभिः अनुभावितः, हर्षादिभिः सञ्चारिभिः परिपोषितः उत्साहः विद्यमानोऽपि न वीररसध्वनिशब्देन व्यवदिश्यते । किन्तु

कविनिष्ठबलिविषयकभक्तौ बलिनिष्ठोत्साहस्य अङ्गत्वात् इदमपि गुणीभूतव्यङ्ग्यस्य वीररसस्यैव उदाहरणम् ।

तथा 'त्यागः सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिः' इति काव्यप्रकाशसारबोधिनीटीकाकारेण श्रीवत्सलाञ्छनभट्टाचार्येण यदुदाहृतम्, तत्रापि परशुरामनिष्ठस्य उत्साहस्थायिकस्य वीरस्य कविनिष्ठपरशुरामविषयकरतौ गुणीभावेन वीररसध्वनित्वं नोदाहर्तव्यम् । किन्तु तत्र वीररसं पुरस्कृत्य रसवदलङ्कार एव । न च 'अकरुणमवकृत्य' इत्यादिपद्येऽपि प्रतीयमानस्य दानवीरस्य कर्णस्तुत्यङ्गत्वात् कथं तत्रापि दानवीरस्य ध्वनित्वमिति वाच्यम् । कवेः कर्णवचनानुवादमात्रतात्पर्यकत्वेन कर्णस्तुतौ तात्पर्यविरहात्, तस्य च महानुभावत्वेन आत्मस्तुतेरनुपपत्तेः ।

**स्वावलोकनप्रश्नाः**

१. वीररसस्य स्थायीभावः कः ?

२. उत्साहस्य लक्षणं किम् ?

३. वीरः कतिविधः ?

४. दानवीरस्य उदाहरणं किम् ?

५. **कियदिदमधिकं मे** इत्यादिश्लोके गर्वः केन व्यज्यते ?

६. प्राचीनोदाहृतेषु वीररसः कुतो न भवति ?

७. तत्र ध्वनिः न भवति चेत् कः भवति ?

८. रसवदलङ्कारस्य लक्षणं किम् ?

९. **कियदिदमधिकं मे** इत्यत्र रसवदलङ्कारः कुतो न भवति ?

**(आ) दयावीरो यथाः-**

**न कपोत भवन्तमण्वपि स्पृशतु श्येनसमुद्भवं भयम् ।**
**इदमद्य मया तृणीकृतं भवदायुः कुशलं कलेबरम्' ।।**

अत्र याचमानः कपोतः दयोत्साहस्य आलम्बनम् । तदीयव्याकुलत्वम् उद्दीपनम् । शरीरार्पणम् अनुभावः । धृत्यादयश्च व्यभिचारिणः । एषा च सामग्री शिबिचक्रवर्तिनि दयोत्साहं परिपुष्णातीति दयावीरध्वनिः । न च अत्र शरीरदानप्रत्ययात् दानवीरध्वनित्वापत्तिरिति वाच्यम् । श्येनकपोतयोः भक्ष्यभक्षकभावापन्नत्वेन शिबिचक्रवर्तिशरीरस्य अर्थ्यमानत्वाभावात् तदप्रतिपत्तेः । ततोऽपि कपोतशरीर-परित्राणप्रधानस्य दयावीरस्यैव अभिव्यक्तेः ।

**स्वावलोकनप्रश्नाः**

१. **न कपोत** इत्यत्र दयावीरस्य उद्दीपनादीन् दर्शयत ?

२. अत्र दानवीरत्वं कुतो न भवति ?

**(इ) युद्धवीरो यथा—**

**रणे दीनान् देवान् दशवदन विद्राव्य वहति**
**प्रभावप्रागल्भ्यं त्वयि तु मम कोऽयं परिकरः ।**
**ललाटोद्यज्ज्वाला कवलितजगज्जालविभवो**
**भवो मे कोदण्डच्युतविशिखवेगं कलयतु ।।**

एषा दशवदनं प्रति भगवतः रामस्य उक्तिः । अत्र भवः आलम्बनम्। रणदर्शनमुद्दीपनम्। दशवदनावज्ञा अत्र अनुभावः । रणे दीनान् देवान् इत्यादौ देवतानां दैन्यप्रकाशनाय शिथिला वृत्तिः । 'ललाटोद्यज्ज्वाला 'इत्यादौ तु उत्साहालम्बनस्य परमेश्वरस्य उत्कर्षसूचनाय उद्धता।

**स्वावलोकनप्रश्नाः**

१. **रणे दीनान्** इत्यादिश्लोके विभावादयः के ?

२. शिथिला, उद्धता च वृत्तिः नाम का ?

३. शिथिलावृत्तिः कां सूचयति ? उद्धतावृत्तिः कां सूचयति ?

**(ई) धर्मवीरो यथा—**

**सपदि विलयमेतु राज्यलक्ष्मी-**
**रुपरि पतन्त्वथवा कृपामधाराः ।**
**अपहरतुतरां शिरः कृतान्तो**
**मम तु मतिर्न मनागपैति धर्मात् ।।**

एषा 'अधर्मेणाऽपि रिपुर्जेतव्यः'इति वदन्तं प्रति युधिष्ठिरस्य उक्तिः । अत्र धर्मविषयः आलम्बनम् । 'न जातु कामात् न भयान्न लोभात् धर्मं त्यजेत् जीवीतस्यापि हेतोः' इत्यादिवाक्यालोचनमुद्दीपनम्। शिरश्छेदाद्यङ्गीकारः अनुभावः । धृतिः सञ्चारिणी । एवञ्चात्र धर्मवीरः ।

**स्वावलोकनप्रश्नाः**

१. **सपदि विलयमेतु** इत्यत्र कथं धर्मवीरः ?

२. अत्र उद्दीपनविभावः कः ?

## V. 2. ii. वीरस्य चातुर्विध्ये असामञ्जस्यम्

इत्थं वीररसस्य चातुर्विध्यं प्राचामनुरोधात् प्रपञ्चितम्। वस्तुतस्तु बहवो वीररसस्य शृङ्गाररसस्येव प्रकाराः निरूपयितुं शक्यन्ते। तथा हि— 'सपदि विलयमेतु 'इत्यादिप्राचीनोक्त पद्य एव 'मम तु मतिः न मनागपैति सत्यात् 'इति चरमपादव्यत्यासेन सत्यवीरोऽपि प्रतीयते। न च सत्यस्य धर्मान्तर्गततया धर्मवीर एव तद्वीरस्य अन्तर्भावः इति वाच्यम्। दानदययोरपि धर्मवीरात् पृथक् गणनायाम् अनौचित्यात्। एवं पाण्डित्यवीरोऽपि प्रतीयते । यथा–

**अपि वक्ति गिरां पतिस्स्वयं यदि तासामधिदेवतापि वा ।**
**अयमस्मि पुरो हयाननस्मरणोल्लङ्घितवाङ्मयाम्बुधिः ।।**

इति पद्ये बृहस्पत्यालम्बनः सभादर्शनोद्दीपितः निखिलकवितिरस्कारानुभावितः पाण्डित्यवीरः प्रतीयते। न चात्र वादसाधारणः युद्धवीर एवेति वाच्यम् । एवमपि क्षमावीरबलवीरयोः अपलापस्य दुष्करत्वात्–

**अपि बहलदहनजालं मूर्ध्नि रिपुर्मे निरन्तरं धमतु ।**
**पातयतु वाऽसिधारामहमणुमात्रं न किञ्चिदाभाषे ।।** इत्यत्र क्षमावीरानुभूतेः ।

**परिहरतु धरां फणिप्रवीरः सुखमयतां कमठोऽपि तां विहाय ।**
**अहमिह पुरुहूत ! पक्षकोणे निखिलमिदं जगदण्डके वहामि ।।**

इति पद्ये बलवीरानुभूतेरपि दुरपह्नवत्त्वात् । ननु 'अपि वक्ति गिरां पतिः ' 'परिहरतु धाराम् 'इति पद्यद्वये गर्वध्वनिरेव नोत्साहः । **'अपि बहलदहनजालम्.....'** इति पद्ये तु धृतिध्वनिरेव्, न क्षमावीरध्वनिः । तथा च आक्षेपरूपेण पूर्वमुदाहृताः सर्वे भावध्वनय एव न रसध्वनयः इति चेत् तर्हि युद्धवीरादिष्वपि गर्वध्वनित्वापत्तिः । एवं रसध्वनिसामान्यमेव भावध्वनावन्तर्भूतं स्यात्। यदि च रसध्वन्युदाहरणेषु स्थायिप्रतीतिः दुरपह्नवा इत्युच्यते, एवं सति पूर्वोक्तपाण्डित्यवीर-क्षमावीर-बलवीरादिष्वपि स्थायिप्रतीतेः दुरपन्मवत्वात् वीरस्यानेकप्रभेदवत्त्वमेव न चातुर्विध्यम् । ततश्च वीररसस्य नानात्वे सिद्धे वीररसः चतुर्विधः इत्युक्तिः अविचारितरमणीयैव ।

**स्वावलोकनप्रश्नाः**

१. सत्यवीरस्य किमुदाहरणम् ?

२. पाण्डित्यवीरस्य किमुदाहरणम् ?

३. क्षमावीरस्य किमुदाहरणम् ?

४. सत्यस्य धर्मवीरान्तर्भावे को दोषः ?

५. **अपि वक्ति, परिहरतु धराम्, अपि बहलदहनजालम्** इत्युदाहरणेषु पूर्वपक्षे भावध्वनयः कथं भवन्ति ?

६. युद्धवीरे प्रतिपक्षे गर्वध्वनिः कथं भवति ?

७. वीररसस्य अनन्तभेदाः कथं सम्भवन्ति ?

## V. 2. iii. हास्यरसप्रभेदाः

वागङ्गादिविकारदर्शनजन्मा विकासाख्यः चित्तवृत्तिविशेषः हासः । तत्स्थायिकश्च हास्यो रसः यथा–

**श्रीतातपादैर्विहिते निबन्धे निरूपिता नूतनयुक्तिरेषा ।**
**अङ्गं गवां पूर्वमहो पवित्रं न वा कथं रासभधर्मपत्न्याः ।।**

अत्र तार्किकपुत्रः आलम्बनम् । तदुक्ता 'रासभधर्मपन्त्याः पूर्वाङ्गं परित्रम् पूर्वाङ्गत्वात् गोपूर्वाङ्गवत् 'इति निःशङ्कानुमानरचनागर्भा उक्तिः उद्दीपिका । रदनप्रकाशादिः आक्षेपलभ्य अनुभावः । उद्वेगादयश्च व्यभिचारिणः । अनया सामग्र्या अत्र स्मृतिबाधितानुमानेन प्रमाणाभासरूपेण वचसा मनोविकासस्य सृष्टेः इदं हास्यस्य उदाहरणम् ।

अयञ्च हास्यः शाङ्र्गदेवेन सङ्गीतरत्नाकरे षोढा निरूपितः। प्रथमतः हास्यः आत्मस्थः परसंस्थश्चेति द्विविधः । तत्र विभावेक्षणमात्रतः द्रष्टुः उत्पन्नः आत्मस्थः । यत्र हसन्तमपरं दृष्ट्वा हासः जायते तत्र परसंस्थः । सोऽयं हास्यः उत्तम-मध्यम-अधमात्मकप्रकृतिभेदात् त्रिविधः ।

एवं च हास्यरसस्य त्रैविध्ये प्रकृतिभेदात् सम्पन्ने प्रकारान्तरेण षाड्विध्यम् अत्र सम्पद्यते । तत्र उत्तमे— १. स्मितम् २. हसितम्, मध्यमे ३. विहसितम् ४. उपहसितम्, अधमे— ५. अपहसितम् ६. अतिहसितम्—इति हास्यस्य षाड्विध्यम् । तथा च उक्तम्—

**स्मितञ्च हसितं प्रोक्तमुत्तमे पुरुषे बुधैः ।**
**भवेद्विहसितं चोपहसितं मध्यमे नरे ।।**

**नीचेऽपहसितं चातिहसितं परिकीर्तितम् ।**

**१. स्मितम् :-** ईषत् फुल्लकपोलाभ्याम् अस्पष्टैः कटाक्षैश्च अदृश्यदशनं यथा तथा जायमानः मधुरो हासः स्मितम्।

**२. हसितम् :-** उत्फुल्लैः वक्त्रनेत्रकपोलैः उपलक्षितः किञ्चित् लक्षितदन्तः हासः हसितम् । एतत् द्वयमपि उत्तमप्रकृतिगतम् ।

**३. विहसितम्** :- सशब्दः, मधुरः, कायगतः, वदनरागवान् आकुञ्चिताक्षिमन्द्रः हासः विहसितम् ।

**४. उपहसितम् :-** निकुञ्चित अंस-शीर्ष-जिह्मदृष्टिविलोकनः उत्फुल्लनासिकः हासः उपहसितम्। एतत् द्वयमपि मध्यमप्रकृतिगतम्।

**५. अपहसितम् :-** अस्थानजः साश्रुदृष्टिः स्कन्ध-मूर्धजकम्पवान् हासः शार्ङदेवेन प्रत्येकशः परिगणितः।

**६. अतिहसितम् :-** स्थूलेन कर्णकटुना ध्वनिना युक्तः, बाष्पपूरपर्याकुलेक्षणः करसंवृतपार्श्वः हासः अतिहसितम्। एतत् द्वयमपि अधमप्रकृतिगतम्।

एषु रसेषु ध्वन्युदाहरणप्रत्युदाहरणनिरूपणपुरस्सरं विचारः पण्डितराजेन प्रवर्तितः ।

**स्वावलोकनप्रश्नाः**

१. **श्रीतातपादैः** इत्यादिश्लोके कथं हास्यरसः ?

२. हास्यरसस्य स्थायीभावः कः ?

३. हास्यस्य लक्षणं किम् ?

४. **हास्यः षड्विधः** इति केन कस्मिन् ग्रन्थे निर्दिष्टः ?

५. प्रथमं हास्यस्य कति भेदौ ? कौ च तौ ?

६. आत्मस्थः नाम कः ? परस्थः नाम कः ?

७. प्रकारान्तरेण हास्यः पुनः कतिविधः ?

८. आहत्य हास्यस्य कति भेदाः ? कुत्र कुत्र भवन्ति ?

९. स्मितस्य लक्षणं किम् ?

१०. लक्षितदन्तः हासः कः ?

११. विहसितं कस्यां प्रकृतौ भवति ?

१२. साश्रुदृष्टिः हासः कः भवति ?

१३. अतिहसितस्य लक्षणं किम् ?

१४. उत्फुल्लनासिकः हासः कः ?

# V. 3. शान्त-रौद्र-अद्भुतानां निरूपणम्

## V. 3. i. शान्तः

नित्यानित्यवस्तुविचारजन्मा विषयविरागाख्यः चित्तवृत्तिविशेषः निर्वेदः । तत्स्थायिक एव शान्तो रसः । स एव गृहकलहादिजन्मा चेत् व्यभिचारी एवा शान्तो यथा—

**मलयानिलकालकूटयोः रमणीकुन्तलभोगिभोगयोः ।**
**श्वपचात्मभुवोर्निरन्तरा मम जाता परमात्मनि स्थितिः ।। पृ. ४३**

अत्र अनित्यत्वेन ज्ञातः सर्वः प्रपञ्चः आलम्बनम्। सर्वत्र साम्यम् अनुभावः। मत्यादयः सञ्चारिणः। अनया च सामग्र्या तत्त्वविचारजन्मा विषयवैराग्यलक्षणः निर्वेदः शान्तत्वेन समुल्लसति। यद्यप्यत्र प्रथमार्धे मलयानिल-कालकूटात्मकयोः तथा रमणीकुन्तल-भोगिभोगात्मकयोः उत्तम-अधमयोः उपक्रमात्, द्वितीयार्धे श्वपच-आत्मभूरूपाधमोत्तमयोः निरूपणेन प्रक्रमभेदेन उपादानात् प्रक्रमभङ्गदोषः यद्यपि सम्भवति, तथाऽपि वक्तुः ब्रह्मात्मभावानुभवात् उत्तम-अधमज्ञानवैकल्यं सम्पन्नमिति सूचनाय तदुपयुज्यत इति, प्रक्रमभङ्गोऽप्यत्र गुण एव । इदं तु शान्तरसध्वनेः प्रत्युदाहरणम् ।

**सुरस्रोतस्विन्याः पुलिनमधितिष्ठन्नयनयो-**
**र्विधायान्तर्मुद्रामथ सपदि विद्राव्य विषयान्।**
**विधूतान्तर्ध्वान्तो मधुरमधुरायां चिति कदा**
**निमग्नः स्यां कस्याञ्चन नवनभस्याम्बुदरुचि ।।**

इदं च पद्यं जगन्नाथपण्डितराजनिर्मितायां भगवद्भक्तिप्रधानायां करुणालहर्यम् उपनिबद्धम् इति भक्तिभावस्यैव अत्र प्राधान्येन ध्वनित्वम् । यद्यपि तत्र विषयगुणालम्बनः सुरस्रोतस्विन्युद्दीपितः नयनिमीलनादिभिः अनुभावितः निर्वेदः स्थायी प्रतीयते, तथाऽपि तस्य निर्वेदस्य भगवद्वासुदेवालम्बनायां कविरतौ गुणीभूतत्वमिति न शान्तरसध्वनिव्यपदेशहेतुत्वम्, अपि तु तत्र शान्तेन रसालङ्कारत्वम् एव । अन्यच्च शान्तरसाननुगुणश्च ओजस्वी गुम्फः, इति, नात्र शान्तरसध्वनिः । न च 'मलयानिलेत्यादिपद्येऽपि शान्तस्य भक्तिभावाङ्गत्वात् रसालङ्कारत्वमेव, न रसध्वनित्वमिति वाच्यम् । तत्र पद्ये 'मम जातापरमात्मनि स्थितिः 'इति परब्रह्म-तादात्म्यावगमात् कविगतब्रह्मविषयक-भक्तिभावस्य अप्रतीतेः ।

**स्वावलोकनप्रश्नाः**

१. गृहकलहादिजन्या निर्वेदः कः भवति ?

२. शान्तरसस्य उदाहरणे विभावादयः के ?

३. शान्तरसस्य स्थायी कः ?

४. शान्तरसोदाहरणे प्रक्रमभङ्गदोषः कथम् ?

५. प्रक्रमभङ्गदोषः अत्र कथं वार्यते ?

६. **सुरस्रोतस्विन्याः** इत्यादिपद्यं कुत्र वर्तते ?

७. अत्र भावध्वनिः कथम् ? कः भावः ?

८. ओजस्वी गुम्फो नाम कः ?

## V. 3. ii. रौद्रः

गुरु-बन्धुवधादिपरमापराधजन्मा प्रज्ज्वलनाख्यः क्रोधः। तत्स्थायिकश्च रसः रौद्रः। क्षुद्रापराधजन्मा तु पुरुषवचनासम्भाषणादिहेतुः, अयमेव क्रोधः अमर्षाख्यः व्यभिचारी। यथा—

**नवोच्छलितयौवनस्फुरदखर्वगर्वज्वरे**
**मदीयगुरुकार्मुकं गलितसाध्वसं वृश्चति ।**
**अयं पततु निर्दयं दलितदृप्तभूभृद्गल-**
**स्खलद्रुधिरघस्मरो मम परश्वधो भैरवः ।। पृ. ४४.**

एषा च धनुर्भङ्गध्वनिभग्नसमाधेः भार्गवस्य उक्तिः । अत्र तदानीं रामत्वेन अज्ञातः गुरुकार्मुकभञ्जकः आलम्बनम् । यद्यपि गुरुकार्मुकभञ्जकस्य विशेष्यस्य रामस्य उपादानम् अत्र कर्तव्यम् तथापि गुरुद्रुहः नामग्रहणे अनौचित्यात् क्रोधाविष्काराद्वा, अत्र कविनाऽपि नामोपादानं न कृतम् । ध्वनिविशेषानुमितः निश्शङ्कधनुर्भङ्गोऽत्र उद्दीपकः । परुषोक्तिः अनुभावः । गर्व-

उग्रत्वादयः अत्र सञ्चारिणः । एभिः विभावाद्यैः परमापराधजन्मा प्रज्ज्वलनाख्यः क्रोधः व्यज्यमानः सन् रौद्ररसतामेति । वृत्तिरप्यत्र महोद्धता रौद्रस्य परमौजस्वितां पुष्णाति । अत्र यद्यपि 'मदीयगुरुकार्मुकम्' इति परशुरामस्य गुरोः परमशिवस्य स्मरणेन परशुरामेण निगर्वेण भाव्यम् ।

तथाऽपि परशुरामस्य 'मदीय' इत्यनेन गर्वस्यैव प्रकाशनात् तस्य विवेकशून्यत्वं प्रस्फुटीभवति इति क्रोधाधिक्यमेव । एवं च रौद्ररसध्वनेरिदमुदाहरणम् ।

**रौद्ररसस्य प्रत्युदारणं यथा—**

**धनुर्विदलनध्वनिश्रवणतत्क्षणाविर्भव-**
**न्महागुरुवधस्मृतिः श्वसनवेगधूताधरः ।**
**विलोचनविनिःसरद्बहलविस्फुलिङ्गव्रजो**
**रघुप्रवरमाक्षिपञ्जयति जामदग्न्यो मुनिः ।।**

अत्र कविः 'जयति जामदग्न्योमुनिः' इति परशुरामस्य प्रभावं वर्णयति। तेन च कविनिष्ठा परशुरामालम्बना भक्तिः द्योत्यते । तत्र च अपराधास्पदरघुनन्दनालम्बनस्य धनुर्विदलनध्वनि-श्रावणोद्दीपितस्य निश्वासनेत्रज्वलनादिभिः अनुभावितस्य महापराध-गुरुवधस्मृति-गर्व-उग्रत्वादिभिश्च सञ्चारितस्य क्रोधस्य अभिव्यक्तावपि, तस्य पूर्वोक्तकविगतभक्तिभावे गुणीभूतत्वात् रौद्रस्य गुणीभूतव्यङ्ग्यत्वमेव न ध्वनित्वम्।

'कृतमनुमतं दृष्टं यैरिदं गुरुपातकम्' इति काव्यप्रकाशोदाहृतपद्ये रौद्ररसवव्यञ्जनाक्षमा वृत्तिः नास्ति इति कवेः तत्र अशक्तिरेव। एवं च तत्रापि रौद्ररसध्वनित्वं सम्यक् उदाहर्तुं न शक्यते।

**स्वावलोकनप्रश्नाः**

१. अमर्षः कथं जायते ?

२. **नवोच्छलितयौवन** इत्यादिपद्ये विभावादयः निरूपणीयाः ?

३. **मदीयगुरुकार्मुकम्** इति पदं कथं क्रोधाधिक्यं दर्शयति ?

४. **धनुर्विदलन** इत्यादिश्लोकं रौद्ररसः कुतो न भवति ?

५. तत्र ध्वनिः न भवति चेत् कः भवति ?

६. गुणीभूतव्यङ्ग्यस्य लक्षणं किम् ?

७. **कृतमनुमतं दृष्टं वा** इत्यादिपद्ये कथं न रौद्रः ?

## V. 3. iii. अद्भुतः

अलौकिकवस्तुदर्शनादिजन्मा विकासाख्या विस्मयः। तत्स्थायिकः रसश्च अद्भुतः। यथा—

**चराचरजगज्जालसदनं वदनं तव ।**
**गलद्गगनगाम्भीर्यं वीक्ष्यास्मि हृतचेतना ।।**

एषा च कदाचित् भगवतो वासुदेवस्य वदनम् अवलोकितवत्याः यशोदायाः उक्तिः । अत्र च- वदनालम्बनः, अन्तर्गतचराचरजगज्जालदर्शनाद्युद्दीपितः, हृतचेतनत्वादिभिः अनुभावितः, त्रासादिभिः परिपोषितः विकासाख्यः चित्तवृत्तिविशेषः ध्वन्यते । अतः अद्भुतरसध्वनिः । न च अत्र मातुः पुत्रे वात्सल्यं प्रतीयते, व्यञ्जकाभावात् । प्रतीयतां वा प्रकरणात् वात्सल्यम्, तत्र विस्मयस्य गुणत्वं तु युज्यते ।

'वीक्ष्यास्मि हृतचेतना' इति हृतचेतनत्वेन अद्भुतविभावेन वाच्यकक्षावाक्यार्थीभूतेन अद्भुतस्य अभिव्यक्तेरेव उचितत्वात्। एवम् 'कश्चित् महापुरुषोऽयम्' इति भक्तिरपि तस्याः यशोदायाः न घटते । ममायं बालः इति तस्याः निश्चयेन प्रतिबन्धात् भक्तिभावोत्पत्तिरपि न युज्यते । अतः तस्यामपि विस्मयस्य गुणीभावः न शङ्क्यः ।

यत्तु सहृदयशिरोमणिभिः प्राचीनैः काव्यप्रकाशकारैः—

**चित्रं महानेष नवावतारः, क्व कान्तिरेषाऽभिनवैव भङ्गिः।**
**लोकोत्तरं धैर्यमहो ! प्रभावः ! काप्याकृतिर्नूतन एष सर्गः।।**

इति पद्ये अद्भुतरसध्वनिः इत्युदाहृतम्। प्रतीयतां नामात्र विस्मयः, परन्तु असौ कथङ्कारं ध्वनिपदव्यपदेशहेतुः । प्रतिपाद्यमहापुरुषविशेषविषयायाः प्रधानीभूतायाः स्तोतृनिष्ठायाः भक्तेः उपस्कारकत्वेन गुणीभूतत्वात् । यथा हि—

'पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसङ्घान्' इत्यादौ वाक्यसन्दर्भे भगवद्गीतासु विश्वरूपं दृष्टवतः पार्थस्य उक्तिषु विस्मयः भक्तिभावोपस्कारकः, तथा अत्रापि इति, चित्रं महानेष इत्यादिमम्मटोदाहृतपद्येऽपि रसालङ्कारत्वमेव युक्तम्, न रसध्वनित्वम् ।

एवमुदाहरणप्रत्युदाहरणसङ्कुलेषु रसेषु निरूपितेषु केवलमेकैकोदाहरणालङ्कृताः करुण-भयानक-बीभत्सा निरूप्यन्ते ।

**स्वावलोकनप्रश्नाः**

१. विस्मयस्य लक्षणं किम् ?

२. **चराचरजगज्जालसदनम्** इत्यादिश्लोके वात्सल्यभावः कथं न भवति ?

३. **चित्रं महानेषः** इत्यादिश्लोकः कुत्र केन अद्भुतस्य उदाहरणतया दत्तः ?

४. अत्र विस्मयः कुत्र गुणीभवति ?

५. दृष्टान्ततया अत्र कः श्लोकः दत्तः ?

# V. 4. करुण-भयानक-बीभत्सानां निरूपणम्

## V. 4. i. करुणः

पुत्रादिवियोगमरणादिजन्मा वैक्लब्याख्यः चित्तवृत्तिविशेषः शोकः। तत्स्थायिकः करुणः यथा—

**अपहाय सकलबान्धवचिन्तामुद्वास्य गुरुकुलप्रणयम् ।**
**हा तनय विनयशालिन् कथमिव परलोकपथिकोऽभूः ।।**

अत्र प्रमीततनयः आलम्बनम् । तत्कालावच्छिन्नबान्धवदर्शनादि उद्दीपनम् । रोदनम् अनुभावः । दैन्यादयः सञ्चारिणः । एभिः पुत्रमरणजनितवैक्लब्यात्मा शोकः करुणरसताम् उपैति ।

| **स्वावलोकनप्रश्नाः** |
|---|
| १. शोकस्य लक्षणं किम् ? |
| २. करुणरसोदाहरणे विभावादयः लक्षणीयाः ? |

## V. 4. ii. भयानकः

व्याघ्रादिदर्शनजन्मा परमानर्थविषयकः वैक्लब्याख्यः चित्तवृत्तिविशेषो भयम् । तत्स्थायिकः रसश्च भयानकः । यथा—

**श्येनमम्बरतलादुपागतं, शुष्यदाननबिलो विलोकयन् ।**
**कम्पमानतनुराकुलेक्षणः, स्पन्दितुं न हि शशाक लावकः ।।**

अत्र श्येनालम्बनम्, सवेगापतनोद्दीपितम्, आननशोषाद्यनुभावितम्, दैन्यादिना सञ्चरितं लावकनिष्ठं भयं भयानकत्वेन रसीभवति । तच्चात्र प्राधान्येन व्यज्यते इति भयानको रसः।

**स्वावलोकनप्रश्नाः**

१. भयस्य लक्षणं किम् ?

२. भयानकरसे विभावादयः के ?

## V. 4. iii. बीभत्सः

कदर्यवस्तुविलोकनजन्मा विचिकित्सख्यः चित्तवृत्तिविशेषः जुगुप्सा । तत्स्थायिकश्च रसः बीभत्सः । यथा—

**नखैर्विदारितान्त्राणां शवानां पूयशोणितम् ।**
**आननेष्वनुलिम्पन्ति, हृष्टा वेतालयोषितः ।। पृ. ५५.**

अत्र शवालम्बना अन्त्रविदारणादुद्दीपिता रोमाञ्च-नेत्रनिमीलनाद्यनुभाविता आवेगादिना व्यभिचारिणा सञ्चारिता जुगुप्सा बीभत्सरसत्वं प्राप्नुवन्ती, प्राधान्येन अभिव्यज्यमानत्वात् बीभत्सरसध्वनिः ।

हास-जुगुप्सयोः आश्रयस्य अप्रतीतेः, केवलम् आलम्बनस्यैव प्रतीतेः, आश्रयः द्रष्टृपुरुषः रसास्वादोपयुक्तया आक्षेप्यः । तथा आक्षेपाभावेऽपि स्वकान्तावर्णनपद्यादिव अलौकिकरसोद्बोधे बाधकाभावात् रसास्वादे नास्ति कश्चित् प्रतिबन्धः ।

**स्वावलोकनप्रश्नाः**

१. जुगुप्सायाः लक्षणं किम् ?

२. बीभत्सरसः उदाहरणे प्रतिपादनीयः ?

३. आश्रयस्य अभावे कथं रसप्रतीतिः ?

४. आश्रयस्य आक्षेपाभावेऽपि रसप्रतीतिः कथं जायते ?

एवं रस प्रभेदेषु ज्ञातेषु सम्प्रति रसविरोधपरिहारप्रकारान् जानीमः ।

## V. 5. विरोधिरससमावेशप्रकारः

रसानां मध्ये वीरशृङ्गारयोः, शृङ्गारहास्ययोः वीराद्भुतयोः वीररौद्रयोः शृङ्गाराद्भुतयोश्च अविरोधः। शृङ्गारबीभत्सयोः वीर-भयानकयोः, शृङ्गारकरुणयोः, शान्तरोद्रयोः, शान्तशृङ्गारयोश्च विरोधः । तत्र रसविरोधपरिहारप्रकाराश्च अनेकविधाः सन्ति । मुख्यतया च रसगङ्गाधरे षट् रसविरोधपरिहारप्रकाराः प्रतिपादिताः ।

कविना प्रकृतरसं परिपोष्टुकामेन तदभिव्यञ्जके काव्ये विरुद्धरसाङ्गानां निबन्धनं न कार्यम् । तथा सति विरुद्धरसाङ्गैः अभिव्यक्तः विरुद्धो रसः प्रकृतरसं बाधेत । अथवा सुन्दोपसुन्दन्यायेन उभयोर्वा उपहतिः स्यात् । यदि तु विरुद्धयोः रसयोः एकत्र समावेशः इष्यते तर्हि विरोधं परिहृत्य विधेयः ।

तथा हि--- विरोधस्तावत् द्विविधः । (i) स्थतिविरोधः, (ii) ज्ञानविरोधश्चेति । तत्र--- स्थितिविरोधः तदधिकरणावृत्तितारूपः । ज्ञानविरोधस्तु तद्ज्ञानप्रतिबध्यज्ञानकत्वलक्षणः ।

**स्वावलोकनप्रश्नाः**

१. कयोः कयोः रसयोः अविरोधः ?

२. कयोः कयोः रसयोः विरोधः ?

३. रसगङ्गाधरे कति रसविरोधपरिहाराः दर्शिताः ?

४. स्थितिविरोधो नाम कः ? किं तस्य लक्षणम् ?

५. ज्ञानविरोधः कः ? किं तस्य लक्षणम् ?

## V. 5. i. स्थितिविरोधः

तत्र एकस्मिन् अधिकरणे एकस्य रसस्य, अन्यस्मिन् अधिकरणे च अन्यस्य च रसस्य निवेशेन स्थितिविरोधः निवर्तते । यथा नायकगतत्वेन वीररसे वर्णिते प्रतिनायकगतत्वेन भयानकस्य उपनिबन्धे स्थितिविरोधः निवर्तते । तद्यथा---

**कुण्डलीकृतकोदण्डदोर्दण्डस्य पुरस्तव ।**
**पुरारातेरिव मृगाः परे नैवावतस्थिरे' ।। पृ. ५८.**

अत्र नायकगतत्वेन वीररसस्य प्रतिनायकगतत्वेन भयानकस्य च उपनिबन्धात् स्थितिविरोधः निवृत्तः ।

**स्वावलोकनप्रश्नाः**

१. स्थितिविरोधः कथं वार्यते ?

२. किमुदाहरणं तत् कथं वारितम् ?

## V. 5. ii. ज्ञानविरोधः

(अ) विरुद्धयोः द्वयोः रसयोर्मध्ये सन्धिकर्तुरिव अन्तराले अवस्थापनेन ज्ञानविरोधोऽपि निवर्तते । यथा--- जगन्नाथपण्डितराजनिर्मितायामेव आख्यायिकायाम् **'किमिदम् अनाकलितपूर्वं रूपम्'** इत्यत्र । यद्यपि श्वेतकेतुमहर्षेः वरवर्णनीं प्रत्यनुरागवर्णने शान्त-शृङ्गारयोः अस्ति विरोधः, तथापि रसद्वयस्य मध्ये अद्‌भुतरसस्य सन्धिकर्तृताया अवस्थापनात् ज्ञानविरोधः निवृत्तः । एवं श्लोके---

**सुराङ्गानाभिराश्लिष्टाः व्योम्नि वीरा विमानगाः ।**
**विलोकन्ते निजान् देहान् फेरुनारीभिरावृतान् ।।**

इत्यादौ सुराङ्गनामृतशरीरालम्बनयोः शृङ्गारबीभत्सरसयोः अन्तर्वर्तिना सन्धिकर्त्रा, स्वर्गलाभाक्षिप्तेन वीररसेन विरोधः निवर्तते । **'भूरेणुदिग्धान्....'** इत्यादिकाव्यप्रकाशगतपद्यकदम्बके तु प्रथमश्रुतबीभत्स-

सामग्रीतवशात् बीभत्सचर्वणोत्तरं तत्सामग्र्याक्षिप्तं निश्शङ्कप्रणत्यागादिरूपसामग्रीव्यङ्ग्यस्य वीरस्य चर्वणे सति शृङ्गारचर्वणा इति विशेषः ।

**स्वावलोकनप्रश्नाः**

१. ज्ञानविरोधस्य परिहारस्य लघु उदाहरणं किम् ?

२. **सुराङ्गनाभिः** इत्यादिपद्ये ज्ञानविरोधः कथं वारितः ?

३. **सुराङ्गनाभिः, भूरेणुदिग्धान्** इत्युदाहरणयोः को भेदः ?

४. अत्र कथं ज्ञानविरोधः परिहृतः ?

**(आ)** विरुद्धयोः रसयोः अङ्गाङ्गिभावप्रकल्पनेनापि विरोधो निवर्तते । यथा---

**प्रत्युद्गता सविनयं सहसा सखीभिः**
**स्मेरैः स्मरस्य सचिवैः सरसावलोकैः ।**
**मामद्य मञ्जुरचनैः वचनैश्च बाले**
**हा ! लेशतोऽपि न कथं वद सत्कारोषि ।।**

इत्यत्र प्रमीतनायिकालम्बनस्य नायकाश्रयस्य शृङ्गारस्य अङ्गत्वेन करणात्, करुणस्य च अङ्गित्वेन करणात् शृङ्गारकरुणयोः विरोधः निवृत्तः।

**स्वावलोकनप्रश्नाः**

१. अङ्गाङ्गिभावो नाम कः ?

२. तदुदाहरणे कयोः रसयोः विरोधः कथं वारितः ?

**(इ)** विरुद्धयोः द्वयोः रसयोः अन्याङ्गत्वकरणेन विरोधः निवर्तते । यथा----

**उत्क्षिप्ताः कबरीभरं, विवलिताः पार्श्वद्वयं, न्यक्कृताः**
**पादाम्भोजयुगं, रुषा परिहता दूरेण चेलाञ्चलम्।**
**गृह्णन्ति त्वरया भवत्प्रतिभटक्ष्मापालवामभ्रुवाम्**
**यान्तीनां गहनेषु कण्टकचिताः के के न भूमीरुहाः' ।। पृ.६०**

अत्र च प्रकृतराजगतप्रतापातिशयस्य वाक्यार्थत्वेन तरु-कामिकर्तृकरिपुकामिनीकबर्यादि-ग्रहणरूपाभ्यां प्रकृताप्रकृतव्यवहाराभ्यां प्रतीतयोः करुणशृङ्गारयोश्च तदङ्गत्वेन प्रकृतराजप्रभावाति-शयाङ्गत्वेन अन्याङ्गभावसाधनेन, विरुद्धरसयोः विरोधः निवृतः । यद्यपि रसस्य चित्स्वरूपत्वेन एकत्वात् तयोः विरोधस्यैव सम्भावनावकाश एव नास्ति । तथापि प्रकरेणेऽस्मिन् रसपदेन रत्यादिः स्थायीभावः गृह्यते ।

**स्वावलोकनप्रश्नाः**

१. **उत्क्षिप्ताः** इत्यादिपद्ये कयोः रसयोः विरोधः ?

२. अत्र वाक्यार्थः कः ?

३. **रसयोः विरोधो नास्ती**ति जगन्नाथः कथं समर्पयति ?

४. रसपदेन विरोधपरिहारप्रकरणे कः ग्राह्यः ?

**(ई)** किञ्च प्रकृतरसपरिपोषमिच्छता विरोधिनोऽपि रसस्य बाध्यत्वेन निबन्धनं कार्यमेव । तथा सति वैरिविजयकृता वर्ण्यस्य कापि शोभा सम्पद्यते । रसगतं बाध्यत्वञ्च किमात्मकमित्युक्ते विद्यमानेष्वपि स्वाङ्गेषु रसनिष्पत्तेः रसाभिव्यक्तेः रसास्वादनिष्पत्तेः, प्रतिबन्धः । व्यभिचारिगतं बाध्यत्वं तु रसगतं बाध्यत्वमिव न स्वास्वादस्य अनिष्पत्तिरूपम्, किन्तु रसास्वादप्रतिबन्धकत्वम् । एवं व्यभिचारिणां बाध्यत्वं यदि रसविषय इव भावविषयेऽपि स्वास्वादप्रतिबन्ध एव बाध्यत्वं स्यात् भावशबलतास्थले बहूनां भावानाम् आस्वादस्य अभावात्, भावशबलतैव उच्छिद्येत ।

अन्यच्च एकरसाङ्गाभिव्यञ्जकशब्दार्थज्ञानवेलायाम् अपरविरोध्यङ्गाभिव्यञ्जकशब्दार्थज्ञानस्य असान्निहित्यात् स्वव्यञ्जकशब्दार्थज्ञानेन अङ्गाभिव्यक्तेः सिद्धत्वात्, अङ्गाभिव्यक्तिप्रतिबन्धः वक्तुं न शक्यते। अतश्च रसनिष्पत्तिप्रतिबन्ध एव विरोध्यङ्गगतं बाध्यत्वम्, न स्वास्वादप्रतिबन्धः ।

**स्वावलोकनप्रश्नाः**

१. बाध्यत्वे नाम किम् ?

२. व्यभिचारिगतं बाध्यत्वं नाम किम् ?

३. रसविषये बाध्यत्वे नाम किम् ?

४. भावशबलतायाः विच्छित्तिः कथं प्रसज्यते ?

**उ)** एवं यत्र साधारणविशेषमहिम्ना विरुद्धयोरभिव्यक्तिः, तत्रापि विरोधः निवर्तते । यथा--

**नितान्तं यौवनोन्मत्ता गाढरक्ताः सदाहवे ।**
**वसुन्धरां समालिङ्ग्य शेरते वीर तेऽरयः' ।। पृ. ६२.**

अत्र 'गाढरक्ताः' वसुन्धरां समालिङ्ग्य' इति शृङ्गारकरुणसाधारणविशेषणैः प्रतीतस्य शृङ्गारस्य प्रथमप्रतीतेन करुणरसेन वस्तुतो विरोधेऽपि साधारणविशेषणबलेन विरोधनिवृत्तिः क्रियते । एवं षट् रसविरोधपरिहारप्रकाराः पण्डितराजेन वर्णिताः ।

**स्वावलोकनप्रश्नाः**

१. **नितान्तं यौवनोन्मत्ताः** इत्यत्र कथं वार्यते ?

२. अत्र कौ विरुद्धौ रसौ स्तः ?

## V. 6. पाठ्यांशेऽस्मिन् सम्भाविताः प्रश्नाः

**विंशत्यङ्कप्रश्नाः**

1. वीररसस्य चातुर्विध्यमुदाहृत्य पण्डितराजोक्तं बहुप्रभेदत्वं समर्थयत ?
2. शान्त-रौद्र- अद्भुतानाम् उदाहरणप्रत्युदाहरणे समन्वयपूर्वकं प्रदर्शयत ?
3. विरोधिरससमावेशप्रकारान् पण्डितराजोक्तदिशा विवेचयत ?

**दशाङ्कप्रश्नाः**

1. सप्रभेदं शृङ्गारमुदाहृत्य **वागर्थाविव...** इत्यादिपद्ये दीक्षितोक्तशृङ्गाररसध्वनित्वं दूषयत ?
2. हास्यरसं सोदाहरणं लक्षयित्वा हास्यरसप्रभेदान् विवृणत ?
3. करुण-भयानक-बीभत्सरसान् सोदाहरणं निरूपयत ?

**पञ्चाङ्कप्रश्नाः**

1. स्थितिविरोध-ज्ञानविरोधौ
2. दयावीरः
3. रसभावगतबाध्यत्वस्वरूपम्
4. दानवीरः
5. शान्तरसः